चतुर्थाङ्कः

परिशीलनम्

उत्तरप्रदेशसंस्कृताकादम्याः षाण्मासिक्यनुसन्धानपत्रिका

उत्तर-प्रदेश-संस्कृत-अकादमी, लखनऊ

चतुर्थाङ्कः

परिशीलनम्

उत्तरप्रदेशसंस्कृताकादम्याः षाण्मासिक्यनुसन्धानपत्रिका

वैशाख २०४८तमे वैक्रमाब्दे मई १९९१

प्रबन्धसम्पादकः
मधुकरद्विवेदी
निदेशकः

उत्तर-प्रदेश-संस्कृत-अकादमी, लखनऊ

प्रकाशकः
मधुकरद्विवेदी
निदेशकः
उत्तर-प्रदेश-संस्कृत अकादमी

वार्षिक मूल्यम् : १० रूप्यकाणि

प्राप्तिस्थानम्
विक्रय-विभागः
उत्तर-प्रदेश-संस्कृत-अकादमी
संस्कृत-भवनम्, नया हैदराबाद
लखनऊ-७

मुद्रकः
पनार मुद्रक, ११७ नजीराबाद, लखनऊ

विषयानुक्रमणिका

भरतनाट्यशास्त्रम्—सिद्धान्त प्रयोगश्च	डा० भोलाशंकरव्यासः	१
वेणीसंहारे प्राचीननाट्यकर्मणां प्रभावः	डा० अशोक शास्त्री	२६
विंशशताब्दिकं संस्कृतनाटकम्	प्रो० रामजी-उपाध्यायः	४०

भरत-नाट्यशास्त्रम्—सिद्धान्त प्रयोगश्च

डा० भोलाशंकरव्यासः

वाराणसी

यस्तन्मयान् हृदयसंवदनक्रमेण
द्राक् चित्रशक्तिगणभूमिविभागभागी ।
हर्षोल्लसत्परविकारजुषः करोति
वन्देतमां तमहमिन्दुकलावतंसम् ।।

विदितमेवात्रभवतां भवतां साहित्यविदां यद्भारतेऽस्मिन् वर्षे नाट्यप्रयोगस्य सुदीर्घा परम्परा वरीर्वति । परम्परेष ग्रीकनाट्यपरम्परातोऽपि प्राचीनतरा । भरतनाट्यशास्त्रस्य ग्रीकनाट्याचार्यरिस्तू-महोदयरचितेन पोयटिक्सनाम्ना ग्रन्थेन सह तुलनयेदं स्पष्टं प्रतीयते यद् भारतीया नाट्यप्रयोगपरम्परा न केवलमृद्धतरा वर्तते, अपितु प्राचीनाऽपि दरीदृश्यते । केचन पाश्चात्या विद्वांसो महता संरम्भेण भारतीय-नाट्यप्रयोगाणामाविर्भावं ग्रीकनाट्योत्पत्तेरर्वाचीनं घोषयन्तोऽत्र ग्रीकनाटकस्य प्रभावमुररीकुर्वन्ति, किन्तु तेषामेतन्मतं विचारविधुरमेव । अलक्षेन्द्राक्रमणात् पूर्वमेव भारते नाट्यप्रयोगस्य सुसमृद्धा परम्परा प्रचलिताऽसीदित्यत्र बहूनि प्राक्तनानि प्रमाणानि राजन्तेतराम् ।

यद्यपि भासनाटकचक्रात् प्राचीनतराणि रूपकाणि नाटकानि वाऽस्माभिरद्यावधिर्नोपलब्धानि तथापि विक्रमात्पूर्व-द्वितीय-तृतीयशताब्द्यां भरतनाट्यशास्त्रसामग्री भारते नाट्यप्रयोगस्य प्रौढ़ं परिष्कृतञ्च कलासंविधानकमभिव्यञ्जयन्ती ग्रीकसम्राडलक्षेन्द्राक्रमणात् बहु प्राक्तनमस्या नाट्यपरम्पराया आविर्भावं प्रमाणयति । यजुर्वेदे शैलूषशब्दप्रयोगः, रामायणे नटसंघानामुल्लेखः[1], महाभारतस्य शेषपर्वणि हरिवंशे[2] प्रद्युम्नसाम्बादिभिर्वज्रनाभदैत्यस्य राजधानीं गत्वा नटच्छद्मवेषेण रम्भाभिसारसंज्ञकस्य नाटकस्य प्रदर्शनोल्लेखः, पाणिनिसूत्रे नटसूत्राणां[3] संकेतः, महाभाष्येच व्यंजनध्वनिप्रकृतिं स्पष्टीकुर्वता भगवता पतंजलिना तेषां नटीभिः सह तुलनास्थापनमन्यत्र स्पष्टतया कंसवधे-बलिबन्धनेतिनाट्यद्वयस्य[4] प्रदर्शनवर्णनं

---

1. नटनर्तकसंघानां गायकानाञ्च गायताम् ।
   मनःश्रोत्रसुखावाचः शुश्राव जनता ततः ।। —वाल्मीकिरामायणे (2, 6, 14)
2. हरिवंशपुराणम्—93-21-32 (गीताप्रेस सं०) पृ० 591
3. कर्मन्दकृशाश्वादिभिः (भिक्षुनटसूत्रयोः) (पाणिनि) 4, 3, 10, 111
4. 1–व्यंजनानि पुनर्नटभार्यावद्भवन्ति महाभाष्यम् । पंचमखण्डम् (6, 1, 2) पृष्ठ 13
   2–ये तावदेते शोभनिका नामैते प्रत्यक्षं कंसं घातयन्ति प्रत्यक्षं च बलिबन्धयन्ति (3, 126) पृ० 69
   तदेव तृतीयखण्डम् निर्णयसागरतः

च भारतीयनाट्यप्रयोगपरम्पराया भास-कालिदासाश्वघोषादिभ्योऽपि प्राक्तनत्वं प्रतिष्ठापयन्ति ।

विक्रमात् पूर्वप्रथमशताब्द्यां विद्यमानः कविकुलगुरुः कालिदासः स्वीये विक्रमोर्वशीये त्रोटके नाट्याचार्यं भरतं मुनित्वेन संस्मरन्—भरतनाट्यसिद्धान्तस्य मान्यत्वं प्रतिपादयति । तेन तत्र भरतानुसारं नाट्यप्रयोगे ललिताभिनयस्य महत्त्वं, रसस्य चाष्टविधत्वं स्वीकृतम् यथा—

"मुनिना भरतेन यः प्रयोगो भवतीष्वष्टरसाश्रयो निबद्धः ।
ललिताभिनयं तमद्य भर्ता मरुतां द्रष्टुमनाः स लोकपालः ॥"

(विक्रमो० 2.17) इति । अन्यत्रापि कविकुलगुरुणा नाट्य-संगीत-वाद्य-नृत्य-संबद्धानां पारिभाषिकाणां संज्ञानाम् अभिज्ञत्वम् प्रदर्शितम् यथा—मायूरी मदयति मार्जना मनांसि (माल० 1.21) भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती (मेघ० 84), किन्नराणाम्-तानप्रदायित्वमिवोपगन्तुम् (कुमार० 1.8) इति । कुमारसम्भवस्य सप्तमे सर्गेऽपि तेन नवपरिणीतयोः शिवपार्वत्योः समक्षमप्सरोभिर्विहितस्य नाट्यप्रयोगस्य वर्णनं कृतवता केचन नाट्यपारिभाषिकशब्दाः प्रयुक्ताः यथा—

"तौ सन्धिषु व्यञ्जितवृत्तिभेदं रसान्तरेषु प्रतिबद्धरागम् ।
अपश्यतामप्सरसां मुहूर्तं प्रयोगमाद्यं ललितांगहारम् ॥ (7-91) इति ।

भरतनाट्यशास्त्रं केन कदा वा प्रस्तुतमित्यस्मिन् विषये विदुषामनेकानि मतानि दरीदृश्यन्ते । नाट्यशास्त्रस्य पर्यालोचनेनेदं स्पष्टं प्रतिभाति यद् ग्रन्थोऽयं शुंगकालेऽन्तिमां परिष्कृतिरूपां परिणतिमवाप । ग्रन्थेऽत्र रंगदैवतपूजने यानि दैवतानि वर्णितानि तानि शुंगकालस्यैव धार्मिकपरिस्थितिं संसूचयन्ति, यदा गणेशस्य नवग्रहाणाञ्च पूजा प्रचलिता नासीत् । गणेशादीनि दैवतानि सर्वप्रथमं याज्ञवल्क्येन स्वस्मृतौ वर्णितानि न सन्त्यतो विक्रमात् प्राचीनतराणि । पुनश्च नाट्यशास्त्रे कौटिलीयार्थशास्त्रस्य, वात्स्यायनीय-कामसूत्रस्य च नामापि नोपलभ्यते, येनास्य ग्रन्थस्य रचनाकालः पाश्चात्यविदुषामनुसरणं विधाय ख्रीस्त्रस्य तृतीयशताब्द्यामुररीक्रियेत नाट्यशास्त्रे राजनीतिविषये शुक्रबृहस्पत्योः सिद्धान्ताः संकेतिताः[1], सन्ति, कामशास्त्रे कामतन्त्राभिधानः कोऽपिप्राक्तनो ग्रन्थः प्राक्तना वा काचित् परम्परा स्पष्टं संसूचिता,[2] यान् समधीत्य नाट्यकर्तारो नाट्यप्रयोगकुशलाश्च रूपकेषु तेषां यथा प्रसंगं समायोजनं विद्धतु ।
अतः स्पष्टमेतत्प्रतिभाति यन्नाट्यशास्त्रस्य सैद्धान्तिकं चिन्तनं मूलतो विक्रमात् पंचशताब्दीपूर्वमेव समारब्धं बभूव । चिन्तनमेतद् विविधनाट्यप्रयोगानुशीलनात् परवर्तिशताब्दीषु समृद्धं जातं यस्य परिष्कृतं रूपं नाट्यशास्त्रस्योपलब्धसंग्रहरूपे ग्रन्थे समुपलभ्यते । एतद् रूपमपि विक्रमात् पूर्वं द्वितीयशताब्द्या अर्वाचीनं न विद्यत इति निश्चप्रचमेव ।

भरत नाट्यशास्त्रस्याधुना द्वे पाठपरम्परे प्राप्येते—उदीच्यः पाठो, दाक्षिणात्यश्च । उदीच्यः सप्तत्रिंशदध्यायात्मको दाक्षिणात्यस्तु षट्त्रिंशदध्यायात्मकः । पाठद्वयेऽस्मिन् दाक्षिणात्यः पाठः खलु प्राचीनतर इति विदुषां मतम् । अभिनवभारत्यामादावभिनवगुप्तपादाचार्यैर्नाट्यशास्त्रस्याध्यायानां षट्त्रिंशती एव घोषिता । तद्यथा—

---

1. ना० शा० 24.88 (गायकवाड सं०) ।
2. ना० शा० 22.192 (तदैव) ।

"षट्त्रिंशकात्मक जगद्गगनावभास—
संविन्मरीचिचयचुम्बितविश्वशोभम् ।
षट्त्रिंशकं भरतसूत्रमिदं विवृण्वन्
वन्दे शिवं श्रुतितदर्थविवेकि धाम ।। इति ।[1]

किन्त्वाभिनवगुप्तपादैरेवाभिनवभारतीपाठे सप्तत्रिंशदध्यायात्मकं नाट्यशास्त्रं स्वीकृत्य सप्तत्रिंशाध्यायस्य टीकां रचयद्भिः स्वतन्त्रे मंगलाचरणे प्रत्यभिज्ञादर्शनानुसारं षट्त्रिंशत्तत्त्वोत्तीर्णमनुत्तरं तत्वं वन्द्यास्पदतां नीतम्, यथा—

आकाङ्क्षाणाम् प्रशमनविधेः पूर्वभावावधीनां
धाराप्राप्तस्तुतिगुरुगिरां गुह्यतत्त्वप्रतिष्ठा ।
ऊर्ध्वाधायः परभुवि च वा यत्समानं चकास्ति
प्रौढ़ानन्तं तदहमधुनाऽनुत्तरं धाम वन्दे ।। इति ।[2]

भरतनाट्यशास्त्रस्य प्राक्तनरूपे षट्त्रिंशदध्यायं विभज्याध्यायद्वयमभिनवगुप्तेनैव विहितं यद्वा तद्गुरुणा भट्टतौतेनेति विचारणाविषयः ।

न केवलमध्यायसंरचनायामेवोदीच्यदाक्षिणात्यपाठयोः परस्परं भेदः समुपलभ्यते, अपितु काव्यमाला-चौखम्भा-गायकवाडौरियन्टलसिरीज—डा० मनमोहनघोष-सम्पादनेषु सम्मतानां पाठानामथ च फ्रेंचविदुषो रेन्नो-ग्रासे-महाभागयो सम्पादितग्रन्थांशपाठयोरपि तुलनात्मकानुशीलनेन अध्यायक्रमे, कारिकाणां क्रमे, कारिकाणां संख्यायां च भूयान् भेदो दरीदृश्यते ।[3]

इदमत्रावधेयं यद्भरतनाट्यशास्त्रं तावदेकः संग्रहग्रन्थो वर्तते यत्र कस्याप्येकस्य रचयितुरचना न विद्यते, अपि च भरतनाट्यसिद्धान्तरूपेण प्रचलितानां परम्परासिद्धानां मतानां संग्रहः केनापि नाट्याचार्येण शुंगकाले किंचित्पूर्वं वा विहितो यः खलु भरतपरम्परामनुसरन् विराजते । अतोऽत्र ग्रन्थसंरचनायां नैकरूपता समुपलभ्यते । अत्र गद्यात्मकं सूत्रं तद्भाष्यञ्च, प्रायशोऽनुष्टुप्छन्दोबद्धाः कारिकाः क्वचिदन्यच्छन्दोबद्धा अपि कारिकाश्च ग्रन्थस्य मूलभागोऽस्ति किन्तु स्थाने स्थाने सिद्धान्तं स्पष्ठीकर्तुं केचन प्राचीन आनुवंश्य-श्लोकाः काश्चनार्याश्चापि समुद्धृता ये उपलब्धसंग्रहग्रन्थादपि प्राचीनतराणां नाट्यशास्त्रीयग्रन्थानामस्तित्वं प्रमाणयन्ति । अन्यच्च छन्दःप्रकरणे ध्रुवगीतिप्रकरणे चात्रोदाहरणरूपेण क्रमशः संस्कृतपद्यानि प्राकृत-ध्रुवपदानि च यान्युपन्यस्तानि तानि मूलसंग्राहकेणैव विरचितानि यद्वा प्राचीनरचनारूपाणि, इत्यपि प्रश्नः समुदेत्येव । अस्मिन् विषये प्राचीना चैकाऽनुश्रुतिरस्ति यद्भरतमुनिना मूलतः सूत्ररूपं शास्त्रं रचितमासीत् तच्छिष्येण कोहलेन तत् कारिकारूपेण परिवर्तितम् । अन्यच्च मूलतो द्वादशसाहस्त्रीरूपं शास्त्रं षट्साहस्त्री-रूपेणापि संक्षिप्तम् अपरञ्च प्रयोगादिविषये यत् खलु लोकानुमानादिसिद्धत्वे मूलशास्त्रे नोक्तमासीत् तदपि कोहलेनैवोत्तरतन्त्ररूपेणात्र विहितम् प्रमाणञ्चात्र, "शेषमुत्तरतन्त्रेण कोहलस्तु करिष्यति" इति ।[4]

---

1. अभिनवभारती श्लोकः 2 पृष्ठांकः (प्रथमोभागः, गायक० सं०)
2. अभिवन भारती (चतुर्थो भागः पृ० 509, गायक० सं०)
3. विस्तृत विवरणार्थं द्रष्टव्यम्—Kane : History of Sanskrit Poetics पृष्ठ 10-14
4. ना० शा० (चौखम्भा सं० 1929 ई० 36.65) (गायकवाड सं० 37.18) (4 भाग पृ० 5.10)

इदमप्यनुमीयते यत्संग्रहग्रन्थस्यास्यमूलभागः षष्ठाध्यायतः पंचत्रिंशाध्यायपर्यन्तमेव वर्तते । आदितः पंचाध्याया अंतिमः षट्त्रिंशाध्यायश्च परवर्तिकाले मूलसंग्राहकभिन्नेनकेनापि भरतनाट्यशास्त्रस्य महत्त्वं शूद्रकल्पानां नाट्यप्रयोक्तृणां सामाजिकप्रतिष्ठां च द्रढ़यितुं प्रक्षेपरूपेण मिश्रिताः । प्रकरणेऽस्मिन्नादौ नाट्योत्पत्तिः, नाट्यगृहनिर्माणं, रंगदैवतपूजनं, तदंगरूपेण च ध्रुवागीतिनृत्यकरणादिविवरणं, शास्त्रस्यास्य वेदविहितत्वं, नाट्यप्रयोगस्य चेतिकर्तव्यतारूपेण वैदिकयज्ञानुष्ठानवदपूर्वनिष्पादकत्वं, अन्तिमेऽध्याये च नहुषनृपेण मर्त्यलोके आदृतस्य नाट्यप्रयोगस्य भरतशिष्यैरप्सरोभिस्सार्धं प्रदर्शनं, प्रहसनप्रदर्शनेन कुपितानामृषीणां शापाद् भरतानां शूद्रत्वप्राप्तिः, नाट्यप्रयोगेणैव तेषां सामाजिकमर्यादायाः संरक्षणमित्यादि ये विषयाः संकेतितास्ते नाट्यसिद्धान्तेन सहानुषङ्गिकमेव सम्बन्धं व्यंजयन्तो प्रक्षिप्ताशाः सन्तीति म० म० काणेमहाभागानां[1] नव्यविदुषाञ्च मतम् ।

परम्परावादिनां मते तु ग्रन्थेऽस्मिन् न कोप्यंशः प्रक्षिप्तो वर्तते । अभिनवभारतीलेखनसमयेऽपि केषांचिन्मते ग्रन्थेऽत्र केनापि भरतशिष्येण प्रक्षिप्तांशो व्यरचीति पूर्वपक्षमतं प्रचलितमासीत् तच्चाभिनवगुप्तपादैः खण्डितम्—

"अन्ये त्वियन्तं ग्रन्थं कश्चिच्छिष्यो व्यरीरचत् ।– अत्र षट्त्रिंशदध्याय्यां यानि प्रश्नप्रतिवचनयोजनवचनानि तानि तच्छिष्यवचनमित्येवाहुः । तच्चासत् । एकस्य ग्रन्थस्यानेकवक्तृवचनसन्दर्भमयत्वे प्रमाणाभावात् । स्वपरव्यवहारेण पूर्वपक्षोत्तरपक्षादीनां श्रुतिस्मृतिव्याकरणतर्कादिशास्त्रेष्वेकविरचितेष्वपि दर्शनात् । एतेन सदाशिवब्रह्मभरतमतत्रयविवेचनेन ब्रह्ममतसारताप्रतिपादनाय मतत्रयीसारासारविवेचनं तद्ग्रन्थखण्डप्रक्षेपेण विहितमिदं शास्त्रम् न तु मुनिविरचितमिति यदाहुर्नास्तिकधुर्योपाध्यायास्तत्प्रत्युक्तम् ।" इति[2]

भारते नाट्योत्पत्तिविषये नानामतानि प्रचलितानि सन्ति । जर्मनविदुषः पिशेलमहोदयस्य मतानुसारं भारते नाट्यप्रयोगस्योद्भवः पुत्तलिकानृत्यात् समजनि ।[3] प्राध्यापकहिलेब्रान्ट-स्टेनकोनो—

महाभागयोरनुसारं भारते नाट्योत्पत्तिर्धार्मिकेतर (Secular) सामाजिकमनोरंजनादेव संजाता ।[4] प्राध्यापकल्यूडर्समहोदयस्तु छायानाटकं भारते नाट्योत्पत्तिमूलकं मन्यते ।[5] वेबरविंडिशमहोदयौ तु भारतीये नाट्येग्रीकप्रभावमुररीकुरुतः ।[6] किन्तु नाट्यप्रयोगस्य बीजानि भारते वैदिकसंवादसूक्तेष्वेवोपलभ्यन्ते । यथा इन्द्रमरूत्संवादसूक्तम् (1, 165) इन्द्राणीवृषाकपिसूक्तम् (10, 86), विश्वामित्रनदीसूक्तम् (3.33) यमयमीसंवादसूक्तम् (10, 10) उर्वशी-पुरूरवःसंवादसूक्तम् (10, 10) इत्यादिषु ऋक्सूक्तेषु वाचिकाभिनयरूपं नाट्यतत्त्वं विद्यत एव । मैक्समूलरमहोदयेनानुमितं यत् सूक्तानां शंसनं मन्त्रवाचक-ऋत्विग्भिरूक्तिप्रत्युक्तिरूपेण वक्तृबोद्धव्यतयाद्विधा विभज्याऽक्रियत ।[7] वैदिककर्मकाण्डानुशीलनेनेदमपि स्फुटं

---

1. Kane : History of Sanskrit Poetics page 19.
2. अभिनवभारती (प्रथमोभागः) पृ० 8-9 (गा० सं०)
3. Keith : Sanskrit Drama page 52-53
4. Ibid, pp., 49-50
5. Ibid, pp., 55-56
6. Ibid, pp., 57-ff,
7. Ibid, pp. 15

भवति यद् यज्ञसत्रेषु महाव्रतादिषु ऋत्विजां संवादरूपोऽभिनयः प्रावर्तत । अतः स्पष्टमेतद् यद् भारते नाट्य-प्रयोगो वैदिककाल एवं धार्मिक कर्मकाण्डादुद्भूतः । डा० जागीरदारमते रामायणदिपुरोणेतिहासानां गायकाः सूताः पुराणकथावाचनसमये ग्रीकमहाकाव्य-इलियड-ओडेसीवाचकानां रैप्सोड संज्ञकानां मागधानां सदृशं भारतेऽपि कथासु वर्णितानां पात्राणां कार्यव्यापारमभिनयेनापि दर्शयन्तिस्म एते सूतास्त्वादौ वैदिक-भरतजात्युत्पन्ना आसन्, अतो भरता एवं प्रथमो नाट्यप्रयोक्तारः । परवर्तिकाले जातिवाचकोऽयं भरतशब्दः भरतमुनेर्व्यक्तिवाचको जातः । नाट्यप्रयोगकर्तारश्चापि सर्वे भरताः इति संज्ञया अभिहिता दृश्यन्ते ।[1]

नाट्यशास्त्रस्य प्रथमाध्याये नाट्योत्पत्तिसंबन्धिनी कथा संकेतिता । इन्द्राद्या देवाः दृश्यश्रव्यरूपं किमपि सार्ववर्णिकं क्रीडनीयकामिच्छन्तस्तदुत्पत्तिहेतवे ब्रह्मणः समीपंगताः । भगवता वेधसा चतुर्भ्यो वेदेभ्य एकैकं तत्त्वमादाय स्त्रीशूद्रादीनामप्यनिषिद्धः सार्ववर्णिकः पंचमो नाट्यवेदो रचितः । उक्तञ्च—

"न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु ।
तस्मात्सृजापरं वेदं पंचमं सार्ववर्णिकम् ॥

× × ×

जग्राह पाठ्यं ऋग्वेदोत्सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि इति ॥[2]

अनन्तरं च नाट्यवेदो यं प्रयोगार्थं ब्रह्मणा मुनये भरताय दत्तः । स च पंचममेनं वेदं शतसंख्याकान् स्वपुत्रा-नध्यापयामास । एते नाट्यप्रयोगे ललिताभिनयेऽक्षमा आसन् । अतो हेतोर्भरतमुनिनाऽप्सरसः सृष्टाः । ततो भरतो मंजुकेशीप्रमुखाभिरप्सरोभिः स्वात्मजैश्च सार्धं प्रथमं नाट्य प्रयोगं शिवाय प्रदर्शितवान् ।

भगवान् शिवस्तु प्रीतः सन् नाट्यप्रयोगेऽस्मिन्नुद्धतं ताण्डवनृत्यं, भगवती पार्वती च सुकुमारं नृत्यरूपं लास्यं समायोजितवन्तौ । तदनन्तरं भगवाञ्छिवः स्वगणं तण्डुं भरतात्मजेभ्योऽप्सरोभ्यश्च नृत्यांगभूतानामंगहाराणा-मष्टोत्तरशतसंख्यकानां करणानाञ्च प्रयोगविधिमध्यापयितुमादिदेश ।[3]

भरतनाट्यशास्त्रे तावत् काव्य-रूपक-गीतक-वाद्य-नृत्यानां समन्वितरूपेण प्रयोगनिष्ठाः सिद्धान्ताः समुट्टंकिताः । अतोऽयं ग्रन्थः काव्यशास्त्रस्य नाट्यशास्त्रस्य, संगीतशास्त्रस्य नृत्यशास्त्रस्य चादिमः प्रस्थान-ग्रन्थः, मुनिश्च भरतः सर्वेषामेतेषां शास्त्राणामाद्यः सिद्धान्तकृदाचार्यः । परवर्तिकाले शास्त्राण्येतानि पृथक्-पृथग्रूपेण पल्लवितानि । तेषाञ्च तत्तदाचार्यैः स्वतन्त्राः ग्रन्थाः निर्मिताः । यथा काव्यशास्त्रे भामह-दण्डि-वामन-ध्वनिकारादिभिः,[4] नाट्यशास्त्रे धनंजयसागरनन्दि[5]–रामचन्द्रगुणचन्द्र[6]–विश्वनाथादिभिः[7], संगीतशास्त्रे

---

1. विषयोऽयं—Jagirdar : Sanskrit Drama इत्याख्ये ग्रन्थे द्रष्टव्यः
2. भरतनाट्यशास्त्रम् 1, 12-16
3. भरतनाट्यशास्त्रम्-चतुर्थोध्यायः 2-18
4. दशरूपकम् ।
5. नाट्यरत्नकोशः ।
6. नाट्यदर्पणः ।
7. साहित्यदर्पणे षष्टः परिच्छेदः ।

दत्तिलमुनि मतङ्ग–शार्ङ्गदेव–कुम्भनृपादिभिः,[1] नृत्यशास्त्रे च नन्दिकेश्वर-कुम्भनृपति-पुण्डरीक[2] विट्ठलपंडितादिभिश्च पृथक् पृथक् ग्रन्थाः लिखिताः । इत्थं मूलतः समन्वितं नाट्यशास्त्रं विविधासु शाखासु विभक्तं दरीदृश्यते ।

भरतनाट्यशास्त्रं विश्वकोषात्मको ग्रन्थः । ग्रन्थस्यास्य महत्ता तु भारतीयैः पाश्चात्यैरपि च विद्वद्भिर्मुक्तकण्ठं स्वीकृता । अस्मिन् विषये काणेमहोदयानामधस्तनं मतम्—

"Hardly any work on dramaturgy in any language has the comprehensiveness, the sweep and the literary and artistic flair of Natyasastra.

(Kane : History of Sanskrit Poetics page 38)

फॉबियन बॉवर्स इत्याख्येनामेरीकादेशवास्तव्येन विदुषा भरतनाट्यशास्त्रस्य महत्वं स्वीकृतवता स्वग्रन्थे लिखितम्—

The massive treatise called Bharata Natyasastra or Bharata's Canons of Dance and Drama, although considerably more exhaustive and comprehensive in content, is roughly analogous to Aristotle's Codification of Greek Drama. After centuries of oral transmission, the Sastra was finally recorded in writing around the Fourth or Fifth century A. D. . In it you find lists of fullest details of a performance from costume and makeup, to the permissible movements of neck and eyeballs, and from the plot situations and scenes except which are disallowed, (Eating, Adultery and Death were not proper for onstage depiction), to the various body positions and postures of dance. Every aspect of stagecraft is prescribed and anotated. No other theatre of ancient times has been so exhaustively documented in a single work.[3]

नाट्यशास्त्रं तावत् प्रयोगनिष्ठं शास्त्रम् । विविधनाट्यप्रयोगेषु प्रचलितानां विधीनां पर्यालोचनेन ये सिद्धान्ता निष्कर्षत्वेन निर्णीतास्तेषामेवात्र शास्त्रे इतिकर्तव्यतारूपेण निर्देशो विहितः । नाट्यं खलु नाट्य-गीत-वाद्य-नृत्यानां समन्वितं कलासंविधानकम् । अतस्तौर्यत्रिकव्यतिरिक्तता नाट्ये सर्वथैवोपेक्षितव्येति भरतनाट्यशास्त्रस्य सिद्धान्तः । तौर्यत्रिकाभावे नाट्यस्य रसचर्वणाजनकत्वं नोत्पद्यते । यदाहाभिनवगुप्त-पादाचार्याः —

तदेवं नाट्यादिरूपकोपक्रमं गीतातोद्यप्राणाभिनयवर्गपरिपुष्यद्रसचर्वणात्मकं परप्रीतिमयमेव नाट्यमिति ।[4]

अतएव वाचिकाभिनयरूपेणात्र न केवलं पात्राणां संवादविधिरेव गृह्यते, अपितु गीतातोदयप्रयोग-समन्वितो वाचिकाऽभिनयः । अतो हेतोः शास्त्रेऽस्मिन् सप्तस्वरवर्धनपुरस्सरं द्वाविंशच्छ्रुतीनां तदनुसारं च षट्ज-मध्यम-गान्धारग्रामाणां संकेतः कृतः ।

---

1. दत्तिलम्, बृहद्देशी, संगीतरत्नाकरः संगीतराजश्चेति यथाक्रमं तेषां ग्रन्थाः ।
2. अभिनवदर्पण-नृत्यरत्नकोश-नृत्यनिर्णयादयो ग्रन्थाः ।
3. Faubion Bowers : Theatre in the East page 9.
4. अभिनवभारती (प्रथमो भागः) (गा० सं०) पृष्ठ 16

षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा ।
पंचमो धैवतश्चैव सप्तमोऽथ निषादवान् ॥

\+ \+ \+ \+

चतुः श्रुतिर्भवेत् षड्ज ऋषभस्त्रिश्रुतिः स्मृतः ।
द्विश्रुतिश्चैव गान्धारो मध्यमश्च चतुःश्रुतिः ॥
पंचमस्तद्वदेव स्यात् त्रिश्रुतिर्धैवतो मतः ।
द्विश्रुतिश्च निषादः स्यात् षड्जग्रामे विधिर्भवेत् ॥ इति ।[1]

भरतसमये षड्जग्रामादिषु त्रिषु देवेष्वेव प्रचलितस्य गान्धारग्रामस्य प्रचलनं आसीत् । केवलं षड्ज-मध्यमग्रामयोरेव प्रयोगविधिः प्रचलितो बभूव । आधुनिके भारतीयसंगीते मध्यमग्रामस्यापि लोपो जातः । स्वराणामेतेषां शारीर्यां वीणायां मूलतः सत्ता स्वीकृता तदनुसारमेव दारव्यां वीणायामेतेषां सत्ता स्थिरी-क्रियते ।[2] एतेषां स्वराणां क्रमेण द्वयोर्ग्रामयोः विविधा मूर्च्छनाभेदाः सम्भवन्ति । स्वरा एव विशिष्टसन्नि-वेशभाजो रक्तिमदृष्टाभ्युदयं च जनयन्तो जातिरित्युक्ताः । ता एता जातयोऽष्टादश । षड्जग्रामाश्रिताः षाड्जीत्यादयः सप्त, मध्यमग्रामाश्रिताः षड्जमध्यमादयश्च एकादश ।[3] भरतसंगीतशास्त्रे जातिगानपरम्परा-जीविताऽऽसीत्,[4] सा पुनर्देशीरागपरम्परायाः प्रभावाद्विलुप्ता । अतो वृहद्देशीकर्तुर्मतंगसमये जातिगान-परम्परानष्टा बभूव । वीणा-वेणु-पुष्कर-कांस्य-तालानां तत-सुषिरातोद्यतालनिष्ठानां वाद्यानां वादनविधिस्तु शारीर्यां वीणायाः स्वरानेवाश्रित्य समधितिष्ठति । भरतनाट्यशास्त्रे ऐषोऽपि विषयः सविस्तरं व्याख्यातः ।[5] प्रकरणेऽत्र विविधानां ध्रुवागीतीनामपि विवरणं लभ्यते ।[6] अपरुचाङ्गिकाऽभिनयप्रकरणे नृत्यांगतयाऽङ्गोपाङ्-गापाङ्गनां तत्तद्रसव्यञ्जनायां, भावव्यंजनायां, वर्ण्यविषयव्यञ्जनायाञ्च कथमभिनयः प्रदर्शयितव्य इत्यपि शिरोहस्तकटीवक्षःपार्श्वपादसमन्विताङगप्रत्यङगव्यापारवर्णनेन शास्त्रे संकेतितम् । एव । चाङि्गकोऽभिनयो लोकधर्मितया नाट्यधर्मितया वयथाप्रसंगं नटेननट्या च विधातव्य एवं यद्यपि नाट्याभिनयस्तावत् प्रमुखतया वागङ्गसत्त्वजस्तथाप्याहार्यं बिना नाट्यप्रयोगः सर्वथाऽनावर्जकोभवति । कथितं हि शास्त्रेण—

---

1. ना० शा० 28.21, 25-26
2. ना० शा० 28, 14-15
3. ना० शा० (चतुर्थो भागः) पृ० 38, प्रकरणमेतत् पुनः डा० बृहस्पतेः भरत का संगीतसिद्धान्त नामक ग्रन्थे 74-78 पृष्ठेषु दृष्टव्यम् ।
4. जातिगानपरम्परा चेषा वैदिकसामगानपरम्परावत् न मनागपि गायकेन परिवर्तितुं शक्या तस्याः पवित्ररुपत्वात् द्रष्टव्यम्—Mukund Lath : A study of Dattilam (A treatise on the sacred music of ancient India—pp. 91-129 ch. V) इयं जातिपरम्पराऽभिनयेन गान्धर्व-परम्परेति कथ्यते । जातिगानपरम्परा लोकगीतिपरम्परामिश्रिता सती मतंगादीनांदेशीरागपरम्परां जनितवती ।
5. ना० शा० क्रमशः अध्यायाः एकोनत्रिंशः, त्रिंशः, एकत्रिंशः, चतुःस्त्रिंशश्च दृष्टव्याः ।
6. ना० शा० द्वात्रिंशोध्यायः ।

यस्मात् प्रयोगः सर्वोऽयमाहार्याभिनये स्थितः ।
नानावस्थाः प्रकृतयः पूर्वं नेपथ्यसाधिताः ।।
अंगादिभिरभिव्यक्तिमुपगच्छन्प्रयत्नतः ।

आहार्याभिनयो नाम ज्ञेयो नेपथ्यजो विधिः ।। इति (ना० शा० 20, 1-3)[1]
अत्राभिनवभारत्यमभिनवगुप्तपादैः स्पष्टीकृतं यत्—

"समस्ताभिनयप्रयोगचित्रस्य भित्तिस्थानीयमाहार्यम् । तथा च समस्ताभिनयव्युपरमेऽपि नेपथ्यविशेषदर्शनाद् विशेषोऽवसीयते" इति ।[2] अतो भरतनाट्यशास्त्रस्यैकविंशाध्याये पुस्तादीनां चतुर्विधनेपथ्यानामपि विवरणं प्रदत्तं, पात्राणाञ्च मुखरागादि वेश-भूषा-केशप्रसाधन-श्मश्रु-कर्मादिकमपि प्रकृतिभेदाद् देशभेदाच्च संकेतितम् । नाट्यप्रयोगे रंगे प्रदर्शितानां प्राणिनां कृत्रिमांगरचनायाः पात्रप्रयोज्योपकरणानामलंकारप्रहरणादीनामपि प्रयोगविधिर्निर्माणविधिश्चाप्यत्र वर्णितौ । पाश्चात्यैर्नाटकालोचकैरपि नाट्यप्रयोगे आहार्याभिनयस्य महत्ता समुद्घोषिता यथा—

"But setting and decor fall also under The Law of Expressive, as well as representational imagery, which means that they can be made to serve, often with impressive force, the emotional and effective aspects of the play."[3]

वागङ्गसत्त्वजोऽभिनयस्तु नाट्ये समन्वितरूपेण विधीयते । शास्त्रे तत्तत्प्रकरणे व्यस्तरूपतया वर्णिता अभिनयाः समानीकृतसकलोपाङ्गकर्मणाऽलातचक्रप्रतिमरूपाः सन्तो विशिष्टां रसनिष्पत्तिं साधयन्ति ।[4] एष्वपि सात्त्विकोऽभिनयस्तु प्राधान्यं भजते । यथा—

"सामान्याभिनयो नाम ज्ञेयो वागङ्गसत्त्वजः ।
तत्र कार्यः प्रयत्नस्तु नाट्यं सत्त्वे प्रतिष्ठितम् ।।[5] इति ।

एतेषां व्यस्तानां वागङ्गसत्त्वाभिनयानां समष्टिरूपेण प्रयोगे पूर्वापरीभूतरूपतया सम्भावनीय-विशेषभावनादेरेकीकारात्मा सामान्याभिनयो यत्नेन कथं नटैः सम्पादनीय इति तु द्वाविंशाध्याये सामान्या-भिनयप्रकरणेन शास्त्रे प्रदर्शितम् । आहार्यस्य नात्रोपादानं कृतम् । आचार्याभिनवगुप्तपादैराहार्यस्यानुपादान-ताहेतुस्तु तस्य सिद्धरूपता एव संसूचिता न त्वभिनयान्तरेभ्यो न्यूनता—

"आहार्योहि यद्यप्यभिनयान्तरेभ्योऽन्यूनस्तथापि तस्य सिद्धरूपत्वान्नात्रोपादानम् ।"
(अभिनवभारती भागः 3, पृ० 149)

---

1. ना० शा० (तृतीयो भागः पृष्ठ 108-109)
2. तदैव पृ० 109
3. Ronald Peacock : The Art of Drama (London 1957) p. 176.
4. एवं गानं च वाद्यं च नाट्यं च विविधाश्रयम् ।
अलातचक्रप्रतिमं कर्तव्यं नाट्ययोक्तृभिः (28, 7) ना० शा० 4 भाग पृ० 4
(पुनश्च अभिनवभारती, 3 भागः पृ० 109)
5. ना० शा० (22, 1), 3 भागः पृ० 146-147

एतेष्वभिनयेषु शास्त्रकारेण सात्त्विकाभिनयस्य प्राधान्यं संसूचितम् उक्तं हि अभिनवगुप्तपादैः—

"यदि त्वितरापेक्षया सात्त्विको न्यूनस्तर्हि अभिनयक्रिया स्वरूपेणाऽपूर्वा सम्पद्यते। सात्त्विकाभावे ह्यभिनयक्रिया नामापि नोन्मीलति। अभिनयं हि चित्तवृत्तिसाधारणतापत्तिप्राणसाक्षात्कारकल्पाध्यवसाय-सम्पादनमिति, अतएवोक्तं सत्त्वेनाट्यं प्रतिष्ठितमिति।"

(तदैव पृ० 150)

संस्कृतनाट्यप्रयोगस्य वैशिष्ट्यं एलड्राईस निकोलमहोदयेनेत्थं सूचितम्—

"Costumes, makeup, gestures, all are highly stylized and since dance and music play a significant part in the production, the stylization is harmonized with other elements to make one unified whole."[1]

सामान्याभिनयस्तु रसात्मकप्रधानोऽभिनयः। किन्तु यदा विभावादिविषयनिष्ठोऽभिनयो वागाङ्ग-सत्त्वैकरूपोविधीयते, तदा स चित्राभिनय इति कथ्यते। एषा सामान्याभिनयस्यैव शेषरूपेण पंचविंशाध्याये वर्णितः। अत्र नाट्यधर्मितया तत्तद्विभावादिव्यंजनाय नाट्यधर्मितानिष्ठचेष्टाभिः कथं निरूपणं स्यादिति शास्त्रे विस्तरेण व्याख्यातम्।[2]

प्राचीनभारते नाट्यप्रयोगार्थं रंगगृहस्य रंगमण्डपस्य वा निर्माणं समुपलभ्यते। रंगगृहमेतद्देशमंदिरेषु, राज्ञां प्रासादेषु च निर्मितं बभूव। नाट्यमण्डपोऽयं शैलगुहाकारो द्विभूमिकः त्र्यस्त्रः, चतुरस्त्रो दीर्घचतुरस्त्र इति त्रिविधः, पुनश्च मानदृष्ट्योत्तममध्यमाधमरूपः त्रैविध्यं भजते। एष मण्डपो रंगप्रेक्षकस्थाने च द्विधा विभक्तो भवति स्म। प्रेक्षकाणां कृते सोपानाकृतीनि इष्टिकानिर्मितानि आसनानि भवन्ति स्म यत्र तत्तत्सामाजिकमर्यादानुसारं प्रेक्षका उपविशन्ति स्म। रंङ्गस्तावत्पुनर्नेपथ्य-रंगपृष्ठ-रंगमध्य-रंगशीर्ष-मत्तवारणीद्वय-विभक्तो भवति। रङ्गे च जवनिकाद्वयप्रयोगोऽप्यासीत् एका जवनिका नेपथ्यं रंगाद्विभजते स्म, अन्या च रंगशीर्षे निबद्धाऽभवत् मत्तवारणीद्वयं तु रंगमध्यस्योभयतो निर्माप्यते स्म, तत्रापि जवनिका-व्यवस्था क्रियते स्म।[3] एम्फीथियेटरेतिसंज्ञके ग्रीकरंगमंचेन प्राचीनभारतीयरंगमण्डपस्य तुलनयेदं प्रतीयते यन्नेह मुक्तरंगव्यवस्था (Open Theatre) आसीत्। एषा रंगमण्डपव्यवस्था ग्रीकरंगाद् विशेषतः समृद्धा प्रतीयते, यत्र विशिष्टानामेव कलाविदांसामाजिकानां नाट्यप्रेक्षणव्यवस्था विधीयते स्म।

इन्द्रध्वजादिमहोत्सवेषु प्रायो ग्रीष्मान्ते वर्षादौ, शरदि वाऽत्र रंगमण्डपे विविधप्रदेशेभ्य आगतानां नाट्यमण्डलीनां प्रयोगाः प्रतियोगिताश्च समायोज्यन्ते स्म। अन्येष्वप्यवसरेषु नाट्यप्रयोगा विधीयन्ते स्म। एता नाट्यमण्डल्यः प्रायोगायकानां नर्तकानञ्च "घराना" परम्परावत् कामपि विशिष्टां परम्परां व्यक्तीकुर्वन्तीति नाट्यशास्त्राध्ययनात् स्फुटीभवति। आशैशवादेवाचार्यः स्वघरानापरम्परया संबद्धाँश्छा-

---

1. Allardyce Nicoll : World Drama page 630
2. विषयोऽयमस्माभिरांग्लभाषानिबद्धे—Composite representation and pictorial representation in the Classic Indian Theatre. इति शोधपत्रे विस्तरेणालोचितम्।
3. भरतनाट्यशास्त्रम्–द्वितीयोध्यायः।

ताँश्छात्रींश्च नाट्यप्रविधेः पाठ्यगाननृत्यादिविषयान् सप्रयोगमध्यापयति स्म ।[1] न केवलं तेभ्यो नाट्ययोगशिक्षैव प्रदीयते स्म, वाद्ययन्त्राणां, आभरणवेशभूषा-प्रहरण-पुस्तादीनां रचनायाः प्रशिक्षणमपि दीयते स्म । एता मण्डल्यः स्वयमेव नाट्यप्रयोगसामग्रीमपि निर्मापयन्ति स्मेति भरतनाट्यशास्त्रात् स्पष्टीभवति ।[2] केरले कथाकलिप्रयोक्तृषु, आन्ध्रे च कुचिपुड़ीप्रयोक्तृष्वद्यापि परम्परेषा दृश्यते । इदमपि ज्ञायते यत् प्राचीनभारते नैका नाट्यमण्डल्यः देशात् देशान्तरं भ्रमित्वाऽधुनिकनौटंक्यादिमण्डलीवत् सर्कसकम्पनीवच्च नाट्यप्रयोगं प्रदर्शितवत्यः । अस्यामेवशताब्द्यां चलचित्रप्रचलनात्पूर्वं पारसी-नाट्यमण्डलीनांमेषैव नाट्यप्रयोगपद्धतिरासीत् । एतासां नाट्यमण्डलीनाम् सत्ता कौटिलीयार्थशास्त्रादप्यवगम्यते, यत्र नाट्यमण्डलीभ्यः प्रशासने नियुक्तैः राजसेवकैः पणादिकरग्रहणविधानं संकेतित वर्तते ।[3] प्राचीनभारते नाट्यमण्डलीनां नाट्यप्रयोगप्रतियोगिता राज्ञां समक्षं समायोजिता बभूव । तत्र च विजेतृ-मण्डल्यै राज्ञां वित्तपताकारूपः पुरस्कार प्रदीयते स्म । प्रतियोगितापरिणामनिर्णायकरूपेण राज्ञा नव प्राश्निका नियुक्ता आसन् । ते खलु यज्ञवित्, नर्तकः, छन्दोवित्, शब्दवित्, अस्त्रवित्, चित्रकृत्, वेश्या, गान्धर्वः, राजसेवकश्च । एते प्राश्निका गुणदोषा-नुसारं मण्डलीभ्योऽङ्कप्रदानं विधाय परिणामं घोषयन्ति स्म । तदनुसार च नृपतिः पुरस्कार प्रदत्तवान् ।[4] एतावता भारते यूरोपदेशादतिसमृद्धा नाट्यप्रयोगपरम्परा प्रचलिताऽऽसीदिति भरतनाट्यशास्त्राद् दृढं प्रमाणीकर्तुं शक्यम् ।

नाट्ये समस्तस्य लोकस्य भावानुकीर्तनमभिनयद्वारा विधीयते । त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तन" मिति नाट्ये लोकवृत्तानुकरणं नाट्यमेतन्मयाकृतम् इति च ।[5] भरतस्त्वत्र ग्रीकनाट्याचार्यास्तूवन्नाट्ये अनुकरणं स्वीकरोति । किंञ्चाभिनवगुप्तपादाचार्या अनुकरणसिद्धान्तं नानुमन्यन्ते । तेषां मतेऽत्रानुकरणशब्दस्य अनुव्यवसाय इत्यर्थो ग्रहीतव्यः । यतो हि रामादिपात्राणां न तावन्नटैरनुकरणं विधीयते । न हि नटो रामसदृशं स्वात्मनः शोकं करोति । तेनानुव्यवसायवद् विशेषविषयीकार्यं नाट्यम् ।[6] इदमेव नाट्यं रामादिपात्राणां नटेषु रूपारोपाद् रूपकमित्यभिधीयते—रूपारोपात्तु रूपकम् इति ।[7]

---

1. ना० शा० पंचत्रिंशोध्यायः
2. ना० शा० तदैव
3. अर्थशास्त्रम्—2, 27, 25, 26 प्रथमो भागः पृ० 82 डा० कांग्लेसम्पादितं संस्करणं, 1986 ।
4. ना० शा० 27.64-78

   प्राचीनग्रीसदेशेऽपि एतादृश्यः नाट्यमण्डलीप्रतियोगिताः ग्रीकदैवत-दायनोसिउसो महोत्सवे समायोज्यन्ते स्म विजेत्र्ये नाट्यमण्डल्यै पुरस्कारः प्रदीयते स्म । अस्मिन् विषये हार्समहोदयः कथयति—"The ancient theatre was not a commercial enterprise, but a religious institution under the direction of the state...........three dramatists participated in each festival, and three prizes were awarded them by a panel of judges chosen in a very elaborate manner in order to prevent bribery and intimidation. Harsh : A Handbook of Classical Drama p. 4.
5. ना० शा० 10, 107, 10, 112, 10, 117-118
6. अभिनवभारती (प्रथमो भागः) पृ० 37
7. साहित्यदर्पणः 6.1 पृ० 371 (जीवानंद सं० कालिकत्ता, 1916)

कैश्चित् पाश्चात्यैरपि समीक्षकैः कलानां नाट्यस्य च कृते अरस्तू महोदयस्यानुकरणसिद्धान्तो न स्वीकृतः। तेऽपि अभिनवगुप्तपादाचार्यवदनुव्यवसायसिद्धान्तं (Re-enactment Theory) स्वीकुर्वन्ति। यथा—

"Art is expereince reenacted as idea, a formula of imagery, or imagery-within language, being the instrument of the re-enactment."[1]

भरतनाट्यसिद्धान्तानुसारं रूपकाणां दश भेदाः सन्ति। तद्यथा—

"रूपकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
इंहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश"॥ इति[2]

"एतेषां परस्परं भेदः वस्तु-नेतृ-रस-दृष्ट्या क्रियते—"वस्तु नेता रसस्तेषां भेदकः इति।[3]

नाट्यवस्तु द्विविधं भवति-प्रख्यातमुत्पाद्यञ्च। प्रथमं तावत् पुराणेतिहासादिप्रसिद्धेतिवृत्तनिष्ठं, द्वितीयं कविकल्पितकथानिष्ठञ्च नाटक-समवकार-डिमेहामृग-व्यायोगाङ्केषु रूपकेषु प्रख्यातं वस्तु भवति प्रकरण-भाण-वीथी-प्रहसनेषु चतुःषु च उत्पाद्यम्। यथा, विक्रमोर्वशीयाभिज्ञानशाकुन्तलवेणीसंहार-मुद्राराक्ष-सोत्तररामचरितादिषु नाटकेषु वत्सराजस्य रूक्मिणीहरणे ईहामृगे, भासस्य च मध्यमव्यायोगे वस्तुनः प्रख्यातत्वम्, मृच्छकटिक-मालतीमाधवादिषु प्रकरणेषु, श्रृंगारभूषणादिषु भाणेषु, भगवदज्जुकलटकमेलकादिषु च प्रहसनेषु वस्तुनः कविकल्पितत्वं दरीदृश्यते।

अपरञ्च नाटकप्रकरणयोर्न्यूनतया पञ्चाऽधिकतया च दशपर्यन्ता अंका निबध्यन्ते। समवकारस्त्र्यंकः, डिमश्च चतुरंकः। अन्ये षड् रूपकभेदा एकांका भवन्ति। अतो नाटकप्रकरणयोः पञ्चसन्धिसमन्वितं कथावस्तु कविना संयोज्यते, किन्तु समवकारडिमयोर्वस्तुसंविधानं चतुःसंधियुक्तं च भवति यत्र विमर्शस्य योजना न क्रियते। एकांकेषु रूपकेषु वस्तुनि प्रतिमुखगर्भ-विमर्शानां लोपात् मुखनिर्वहणयोरेव समायोजना विधीयते। यदुक्तम्—"द्विसन्धि तु प्रहसनं वीथ्यङ्को भाण एव च"[4] तत्राभिनवगुप्तपादाचार्या:—"तत्रोपक्रमोपसंहारौ तावत् सर्वत्रावश्यम्भाविनौ" इति।[5] व्यायोगेहामृगौ त्रिसन्धिको, गर्भावमर्शरहितौ भवतः।

नाटकस्य नेता धीरोदात्तो दिव्यो दिव्यादिव्यो मर्त्यो वा राजर्षिः, अंगीरसश्चश्रृंगारवीरयोरन्यतमः। यथाऽभिज्ञानशाकुन्तले मर्त्यो राजर्षिर्दुष्यन्तः, रसश्चश्रृंगारः। उत्तरामचरिते दिव्यादिव्योऽवताररूपो रामो नेता, रसश्चश्रृंगारः न वयमुत्तररामचरिते करूणमङ्गिनं रसं मन्यामहे, तत्र च गर्भविमर्शसंधिद्धये चित्रितस्य करुणविप्रलम्भस्य निर्वहणे नायकयोर्मिलनेन श्रृंगारेपर्यवसानात्। शास्त्रदृष्ट्या वेणीसंहार-मुद्राराक्षसयोर्नायकौ युधिष्ठिरचन्द्रगुप्तौ धीरोदात्तप्रकृतिकौ, रसश्च वीरः। किन्तु सहृदयदृष्ट्या प्रथमनाटके नायको भीमः द्वितीये च चाणक्यः। यद्यपि शास्त्रदृष्ट्या वेणीसंहारे युधिष्ठिरस्य राज्यलाभरूपफलप्राप्तिः, मुद्राराक्षसे च चन्द्र-गुप्तस्य निर्विघ्नराज्यस्थापनारूपा फलप्राप्तिस्तथापि तत्र तत्र नाटके यथाक्रमं भीमस्य चाणक्यस्य चैव

1. Ronald Peacock : The art of drama p. 67
2. साहित्यदर्पण: 63
3. दशरूपकम् 1.11
4. ना० शा० 19, 45-47
5. अभिनवभारती (तदैव)

कार्यव्यापारव्यग्रता प्रेक्षकैरनुभूयते। भीम एव कृष्णाया वेणीसंहारं करोति, चाणक्य एव च कूटनीत्या पराजितं राक्षसं चन्द्रगुप्तमन्त्रिपदे नियोज्य मौर्यराज्यं निष्कण्टकं विधत्ते। नाटकस्याङ्गी रसः शान्तो-भवितुमर्हति न वेत्यस्मिन् विषये, "अष्टौ नाट्येरसाः स्मृताः" इति भरतानुयायिनो लोल्लटधनञ्जयादयः। तेषां मते रागद्वेषरहितस्य निर्वेदस्य स्थायिनोऽभिनयोऽसंभाव्य एव, तदभावे शान्तरसचर्वणाया नाट्येऽति-प्रसंगात्।[1] किन्त्वभिनवगुप्त-रामचन्द्रविश्वनाथादयः "शान्तोऽपि नवमोरस" इति मन्यमानाः नागानन्द-नाटके, प्रबोधचन्द्रोदयादौच शान्तमेवाङ्गिनं मन्यन्ते।[2]

प्रकरणे तावद् धीरप्रशान्तोनायकः स तु विप्रो वैश्यो वा, रसश्चश्रृंगारः। प्रकरणमेतत् वस्तुदृष्ट्या पात्रदृष्ट्या च शुद्धं संकीर्णमिति द्विधा। संकीर्णं धूर्तविटगणिकादि—संकुलं यथा मृच्छकटिकं शुद्धं यथा मालतीमाधवम् समवकारे युद्धरता देवासुराः पात्राणि धीरोद्धतप्रकृतीनि द्वादश, रसस्तु रौद्रसमन्वितः श्रृंगारः। डिमे षोडशपात्राणि धीरोदात्तप्रकृतीनि, श्रृंगारहास्यव्यतिरिक्ताः षड् रसाः। व्यायोगस्तु वीर-रौद्रात्मको धीरोद्धतनायकः स्वल्पस्त्रीजनो रूपकभेदः, यथा मध्यमव्यायोगः। अंके करुणरसस्य प्राधान्यं भवति पात्राणि च प्रायशोऽदिव्यानि। प्रहसनं तावद्धास्यरसप्रधानं यत्र मध्यमाधमकोटीनां पात्राणामुपहासः कवेरभीष्टः भाणे हास्यसंवलितः श्रृंगारो रसः, विटश्चैकमेव पात्रं, तेनैवाकाशभाषितरीत्या एकाभिनयेन धूर्तानां विटानां गणिकानां वेशवाटस्य च वर्णनं विधीयते। वीथ्यां द्वे यद्वा एकं, पात्रं, सर्वेरसाः सर्वप्रकृति-काश्च नायकाः।[3]

भरतसम्मतास्त्वेत एव रूपकभेदाः। उपलब्धशास्त्रे नाटकप्रकरणयोर्लक्षणसांकर्यरूपाया नाटिकाया अप्युल्लेखः कृतः। यथा—

> "प्रकरणनाटकभेदाहुत्पाद्यं वस्तु नायकं नृपतिम्।
> अन्तःपुरसंगीतकन्यामधिकृत्य कर्तव्या॥
> स्त्रीप्रायाचतुरंका ललिताभिनयात्मिकासुविहितांगी।
> बहुगीतनृत्यवाद्यरतिसंभोगात्मिका चैव" इति।[4]

अभिनवगुप्तेन पाठोऽयं मूलग्रन्थरूपेण स्वीकृत्य व्याख्यातः।[5]

अत्र श्रृंगारोरसः, धीरललितश्च बहुपत्नीको नायकः चतुरंगिका च संरचना। इदं प्रतिभाति यन्मालविकाग्निमित्रं नाम नाटकं यद्यपि संरचनादृष्ट्या पंचाङ्कं तथापि लक्षणेन नाटिकाकल्पं दरीदृश्यते। तदेवादर्शीकृत्य हर्षेण प्रियदर्शिका—रत्नावलीति नाटिकाद्वयं रचितम्। तदनन्तरमेव केनापि नाट्यशास्त्रेऽत्र नाटिकालक्षणं प्रक्षिप्तम्।

---

1. दशरूपकम् 4.16 तदवलोकश्च पृ० 229 (अस्मत्संपादितं सं०)
2. तस्मादस्ति शान्तोरसः।……तत्र सर्वरसानां शान्तप्राय एवास्वादो न विषयेभ्योः विपारवृत्या"।— अभिनवभारती पृ० 339 (प्रथमोभागः), सा० द० तृ० प० पृ० 256 (जीवानंद सं०), नाट्यदर्पणः 3.20
3. नाट्यदर्पणः 2.930
4. ना० शा० 18-58-59
5. तदैव

विश्नाथादयस्तु अष्टादशोपरूपकाण्यपि निर्दिशन्ति । तेषु दिव्यमानुषरतियुक्तं त्रोटकं, प्राकृतभाषा-निबद्धं चतुर्जवनिकान्तरविभक्तं गीतनृत्यबहुलंनाटिकाकल्पंसट्टकं च विशेषतः प्रसिद्धे, यथा विक्रमोर्वशीय-त्रोटकं, कर्पूरमंजरीसट्टकं च । अन्यानि श्रीगदित-हल्लीसक-रासकादीनितु शास्त्रे लोकनाट्यात् समाविष्टा रूपकप्रकाराः सन्ति । नाट्यदर्पणकारौ त्रयोदशरूपकाण्येव निर्दिशतः ।[1] एताभ्यां रूपकाणां तु द्वादश संख्या स्वीकृता, नाटिकाप्रकरणिकयोरपि तत्रोल्लेखात् ।[2]

इतिवृत्तं नाम नाट्यस्य शरीरम्, तस्य च नाट्यशास्त्रे पंचभिः संधिभिर्विभागः कल्पितः । तच्चेति-वृत्तं द्विविधमाधिकारिकं प्रासंगिकं च । आधिकारिकं मुख्यफलयोगेन सम्बद्धं भवति, यथा रामकथायां रावण-विजय-सीताप्रत्यानयनरूपफलनिष्ठं कथाबस्तु प्रासंगिकं च तत्रैब प्रसंगेन तदंगत्वेनोपात्तौ सुग्रीवश्रमणा-वृत्तान्तौ, एतौ तु रामकथानाटकेषु पताकाप्रकरीत्यर्थप्रकृतिद्वयरूपेण निबद्धौ । यथा महावीरचरितानर्घराघव-बालरामायणादिषु नाटकेषु दृश्यते प्रकरणेस्वपि प्रांसगिककथासन्निवेशो दरीदृश्यते, यथा मृच्छकटिके शर्विलक-मदनिकावृतान्तः, मालतीमाधवे च मकरन्द-मदनिकावृतान्तः । सर्वेषु नाटकेषु प्रकरणेषु च प्रासंगिकेति-वृत्तस्याऽवश्यंभाविता नास्ति । विक्रमोर्वशीयेऽभिज्ञानशाकुन्तले, वेणीसंहारे, मुद्राराक्षसे च न किमपिप्रासंगिक-मितिवृत्तं वस्तु वा समुपलभ्यते नचात्र कोऽपि पीठमर्दसंज्ञकः पताकानायकः । कथावस्तुनः पुनरर्थप्रकृति-दृष्ट्याऽवस्थादृष्ट्या च क्रमशः पंचधी विभाजनं विधीयते । फलप्राप्त्यर्थं नायकेन यः खलु व्यापारोविधीयते तस्यानुपूर्व्यां पंचावस्था नाट्यप्रयोगे प्रदर्श्यन्ते । यथा—

प्रारम्भश्च फलप्राप्तिस्तथा प्राप्तेश्च सम्भवः ।
नियता च फलप्राप्तिः फलयोगश्च पञ्चमः ॥ इति[3]

एता एवं दशरूपके "आरभ्ययत्न प्राप्त्याशानियताप्तिफलागमाः ।" इति कारिकांशेनोल्लिखिताः ।[4] कथा-वस्तुनोऽवस्थापंचके विभाजनं नेतुर्मानसिकावस्थादृष्ट्या कृतं मनःशास्त्रीयं विभाजनं (Psychological Division of Plot) वर्तते । तस्यैव अर्थप्रकृतिपंचके विभाजनं संरचनादृष्ट्या कृतं नाट्यवस्तुशरीरनिष्ठं विभाजनं (Structural or Physical Division of Plot) । तद्यथा बीजः बिन्दुः पताका च प्रकरी कार्यमेव चेति । फलप्राप्तिरूपकार्यस्य बीजरूपेणैव कथांशे यत् स्वल्पमात्रं कविना प्रक्षिप्यते तद् बीजम्, यथा शाकुन्तले राजानं प्रति वैरवानसोक्त्याऽऽशीर्वचनद्वारा कविना फलप्राप्तयर्थं—

अस्य यस्य पुरोर्वंशे युक्तरूपमिदं तव ।
पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि ।[5]

इति पद्येन बीजप्रक्षेपः कृतः । यदा तद्बीजं किंचिदुच्छूनतया परिणमते, जलपतिततैलविन्दुवद्वा प्रसरति तदा प्रसिद्धावयवत्वेन बिन्दुसंज्ञयाऽभिधीयते । यथा शाकुन्तले, "असंशयं क्षत्रपरिग्रह-क्षमा यदार्यमस्यामभिलाषि मे मनः "इत्यादि पद्ये । अभिनवपादाचार्योऽनयोर्भेदः इत्थं

1. नाट्यदर्पणः 4.55-63
2. तदैव 103
3. ना० शा० 21.8
4. दशरूपकम् 1.19
5. ना० शा० 21.21

परिभाषितः—"बीजं तु मुखसन्धेरेव प्रवर्त्यात्मानमुन्मेषयति, बिन्दुस्तदनन्तरमिति, विशेषोऽनयोः, द्वे अपितु समस्तेतिवृत्तव्यापके"।[1]

यच्च सम्बन्धि वृत्तं आधिकारिक कथानेतुः प्रयोजनसम्पत्तये भवदपि स्वप्रयोजनं सम्पादयति सा पताका। यथा रामकथानाटके रावणविजय-सीताप्रत्यानयन प्रयोजनद्वयसम्पत्तये सुग्रीववृत्तं किष्किन्धाराज्यरूपं स्वप्रयोजनमपि सम्पादयति। यथा च मृच्छकटिके शर्विलकस्यापि मदनिकालाभः। पताका चैषा पताका-स्थानकसंज्ञकान्नाट्यतत्त्वाद् भिन्ना यत्र समासोक्त्या श्लिष्टार्थोक्त्याऽन्येन वा विधिना भाविनः कथांशस्य पूर्वमेव नाट्यकर्त्रा व्यंजना विधीयते। यथा—"अन्तर्हिते शशिनि सैवे कुमुद्वतीमें दृष्टिं न नन्दयति संस्मरणीय-शोभा" इति कण्वशिष्योक्त्या भाविन्याः शकुन्तलावियोगदशायाः नाट्यवक्रता—(Dramatic Irony) रीत्या व्यंजना कृताऽस्ति। यथावा उद्यानलतां पश्यतः उदयनस्य श्लिष्टार्थोक्त्या "उद्दामोत्कलिकां विपाण्डुररुचं" इत्यादि पद्येन रत्नावली—निष्ठानुरागवन्तं राजानं प्रति महादेव्या भाविनः कोपस्य व्यंजना। प्रकरीवृत्तं तावदाधिकारिककथानेतुः प्रयोजनमात्रं सम्पादयति, न तु किमपि स्वस्य प्रयोजनं, यथा रामकथायां शबरीकथा। अर्थप्रकृतिविभाजनं चैतत् मुख्य कार्यानुषंगि वर्तते। इति वृत्ताङ्गभूताः बीजायर्थप्रकृतयः पंच, पंच च नेतृव्यापारनिष्ठाः प्रारम्भाद्या अवस्थाः मिलित्वा नाट्येतिवृत्ते पंचसन्धिरूपेण समायोज्यन्ते। ते च सन्धयः —

"मुखं प्रतिमुखं चैव गर्भो विमर्श एव च।
तथा निर्वहणं चेति नाटके पञ्च सन्धयः॥" इति।[2]

यथा च दशरूपके—"अर्थप्रकृतयः पञ्च पंचावस्थासमन्विताः। यथासंख्येन जायन्ते मुखाद्याः पंच सन्धयः।" इति।[3]

मुखसन्धौ तावत् नानार्थरससम्भवा बीजसमुत्पत्तिर्निबध्यते यथा शाकुन्तले प्रथमोऽङ्कः तत्रैव द्वितीय-तृतीयांकयोर्मुखन्यस्तस्य शकुन्तलाप्राप्तिरूपबीजस्योद्घाटनं दृष्टनष्टत्वं च यच्चित्रितं तत्प्रतिमुखम्। गर्भे तु "विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्" इत्यादिपद्येन दुर्वाससः शापादनन्तरं चतुर्थेऽङ्के बीजस्योद्भेदः प्राप्तिरप्राप्तिर्वा तदन्वेषणञ्च निबध्यते। यत्र च गर्भनिर्भिन्नबीजार्थः विलोभनकृतः क्रोधव्यसनजो वा चित्र्यते तत्र विमर्शसन्धिः, यथा शाकुन्तले हंसपदिकागीतश्रवणानन्तरं मुद्रिकादर्शनादारभ्य शकुन्तलाप्रसादनं यावत् सबीजिनां मुखाद्यानां संधीनामर्थानाञ्च समानयननिबन्धने निर्वहणसन्धिः।[4]

भरतनाट्यशास्त्रे पुनः पञ्चानां संधीनां क्रमशः मुखस्य द्वादश, प्रतिमुखगर्भयोः प्रत्येकस्य त्रयोदश, अवमर्शस्य पुनर्द्वादश, निर्वहणस्य च चतुर्दशेत्थं चतुःषष्टिसंख्याकानि संध्यंगान्यपि सलक्षणं निरूपितानि। एतेषां सन्ध्यंगानां षड्विधं प्रयोजनं भवति—

---

1. अभिनवभारती (तृतीयो भा०, पृ० 14 (गायकवाड सं०)
2. ना० शा० 19.371
3. दशरूपकम् 1.22-23 (अस्मत्सम्पादितं संस्करणम्, चौखम्भा पृ० 165)
4. ना० शा० 19.39-43

इष्टस्यार्थस्य रचना, वृतान्तस्यानुपक्षयः, प्रयोगस्य रागप्राप्तिः, गुप्तानामर्थानां गूहनं, आश्चर्यवदितिवृत्तस्य वर्णनं, प्रकाश्यानामर्थानाञ्च प्रकाशनमिति ।[1] भरतेन सन्ध्यंगेभ्यो व्यतिरिक्तानि एकविंशति सन्ध्यन्तराण्यपि प्रकरणेऽस्मिन् वर्णितानि,[2] तान्येतानि नाट्यदर्पणकाराभ्यां न स्वीकृतानि, यथा—

"अत्रान्तरे च केचिदेकविंशिति सन्ध्यंतराणि स्मरन्ति......सामेति ।

एषु च केषांचित् सामादीनां स्वयमङ्गरूपत्वात्, केषांचिन्मायादीनां व्यभिचारिरूपत्वात्, दूतलेखादीनामितिरूपत्वात् अन्येषामुपक्षेपाद्यन्तर्भावाच्च न पृथग् लक्षणप्रयासः इति ।[3]

कविर्नाट्यप्रबन्धे समस्तमेवेतिवृत्तं सामाजिकेभ्यो रंगेऽभिनयद्वारा न प्रदर्शयति, अपितु इतिवृत्तांशान् दृश्य-सूच्य-रूपेण द्विधा विभज्य इतिवृत्ते गौणानामर्थानां विष्कम्भक-प्रवेशक-चूलिकांङ्वताराङ्कास्यरूपाणां पञ्चानामर्थोपक्षेपकाणामन्यतमेन संसूचयति ।[4] विष्कम्भके प्रवेशके चातीतानागतेतिवृत्तांशानां संसूचनं यथाक्रमं मध्यमपात्रैरधमपात्रैर्वाविधीयते । विष्कम्भकं प्रथमाङ्कस्य पूर्वमपिरूपके निबध्यते, यथा उत्तररामचरिते प्रथमाङ्कात् पूर्वं विष्कम्भवस्य निबन्धनं, यत्र आयोध्यिकौ नागरिकौ सामाजिकान् संसूचयतः, यदयोध्यामुत्सवार्थमागतोजनकः मिथिलां प्रत्यावृतस्तेन च विमनस्कां जानकीं सान्त्वयितुं रामभद्रः प्रथमांके बासगृहं विशति । एतत्तु तयोर्वार्तालापेन "स्नेहात्सभाजयितुमेत्य दिनान्यमूनीति" पद्येन च कविना संसूचितम् । यथा वा रत्नावल्यामादावेव नाट्यप्रस्तावनानन्तरं यौगन्धरायणप्रवेशद्वारा विष्कम्भकरचना । मृच्छकटिकेऽपि प्रथमाङ्कात् पूर्वं विदूषकप्रवेशद्वारा सार्थवाहचारुदत्तस्य दारिद्र्यापत्तिसंसूचनम् । विष्कम्भको यदा मध्यमपात्रकृतस्तदा शुद्धः, यदा च मध्यमाधमपात्रकृतस्तदा संकीर्णः । प्रवेशकस्तु न कदापि नाटकादौ प्रयोक्तव्यः । अर्थोपक्षेपक एष प्राकृतभाषाचारैर्नीचपात्रैरेव द्वयोरंङ्कयोरन्तरा निबध्यते । यथा शाकुन्तले पंचमषष्ठाँकयोर्मध्ये रक्षिद्वयमत्स्यजीविभिर्नीचपात्रैः प्रयुक्तः प्रवेशकः, यत्र शचीतार्थे स्नातवत्या शकुन्तलया मुद्रिका प्रभ्रष्टा, मत्स्यजीविना च सा मत्स्योदरान्तरात् समुपलब्धेति इतिवृत्तार्थः सूच्यत्वेन निबद्धः । चूलिकायां नेपथ्येनान्तर्जवनिकासंस्थैः सूतादिभिरर्थोपक्षेपणं क्रियते । यथा उत्तररामचरिते द्वितीयांकस्यादौ नेपथ्योत्क्या "स्वागतं तपोधनायाः" इति चूलिकारूपार्थोपक्षेपेण आत्रेयीप्रवेशात्मकवस्तुनः संसूचनम् । अंकावतारे तु बीजार्थसूचनार्थमङ्कान्ते एव काव्यंकनिबन्धनं क्रियते, यथा, मालविकाग्निमित्रे प्रथमाङ्के "अहवा मुदंगसद्दो य्येवणं उत्थावइस्सदि" इत्युपक्रमे मृदंगश्रवणानन्तरं तानि प्रथमाङ्कपात्राण्येव सर्वाणि द्वितीयांकमारभन्ते । अंकमुखेतु अंकस्य विश्लिष्टमुखं स्त्रिया पुरुषेण वा एकपात्ररूपेण अंकस्य पूर्वमुपक्षिप्यते, यथा महावीरचरिते द्वितीयांकान्ते एवं सुमन्त्रद्वारा तृतीयांके वशिष्ठ—विश्वामित्रादीनां प्रवेशो भविष्यतीति सूचितम् ।

यद्यपिग्रीकनाट्यवत् कालदेशयोरन्विती[5] संस्कृतरूपकेषु न निबध्येते, तथापि वृत्तस्य कालदेशयोर्व्यवस्थायामवधानं दीयत एव, यथा ।

---

1. तदैव 190.51-52
2. ना० शा० 19.107-109
3. नाट्यदर्पणः 1.65 कारिकायाः विवृतिः (दिल्ली सं० पृ० 198)
4. ना० शा० 19.110-116 (तृतीयोभागः पृ० 64-65)
5. द्रष्टव्यम्—Harsh : A Handbook of Classical Drama p. 25-26

अंकच्छेदं कृत्वा मासकृतं वर्षसंचितं वापि ।
तत्सर्वं कर्तव्यं वर्षादूर्ध्वं नतु कदाचित् ।।[1] इति

अभ्यच्च संस्कृतरूपके एकस्मिन्नङ्के एकस्यैव देशस्य समायोजना क्रियते, न तु शेक्सपियरादीनां रोमंटिक-नाट्यपरम्परावदंकांनां (Acts) दृश्येषु (Scenes) विभज्य देशान्तरयोजना। किन्तु एकस्यैव देशस्यांगानि पात्रव्यापारभेदेन एकस्मिन्नेवांके पृथक्तयानिबद्धुं शक्यानि । यथा मृच्छकटिकस्य प्रथमाङ्के गृहाभ्यन्तरे स्थितयोः चारुदत्तविदूषकयोः मदनिकायाश्च वार्तालापः, रथ्यायां च गृहाद्बहिः वसन्तसेनामनुसरतां शकार-विट-चेटानां व्यापारश्च युगयत् रंगे कक्षाविभागमात्रेणैव प्रदर्शितौ न तु दृश्यान्तरकल्पनया। संस्कृतनाट्ये कार्यान्वितिरपि ग्रीकनाट्यकार्यान्वितितो भिन्नरूपेण निबध्यते। तत्र तु कार्यरूपेणैकरूपतैव वर्ण्यते,[2] किन्त्वत्र संस्कृतनाट्ये यद्यपि महाकार्यमेव मुख्यप्रयोजनरूपेण निबध्यते, तथापि तदंगरूपेण प्रासंगिककथावस्तुनः कार्य-मन्यान्यपि च कार्यान्तराशि निबद्धानि भवन्ति ।

नाट्यस्यान्यत्तत्वं पात्राणि सन्ति, यानि नेतुः परिकरत्वात् सिद्धान्ते नेतृशब्दे समाविष्टानि भवन्ति । संस्कृतरूपकेषु नेता प्रकृतिवशात् चतुर्विधः—धीरोदात्तो यथा राम—दुष्यन्तौ, धीरललितौ, यथा अग्निमित्रो-दयनौ, धीरप्रशान्तौ यथा, चारुदत्त—माधवौ, धीरोद्धतौ यथा भीमसेनः । शृंगाररसे नायिकां नायिका वा प्रति नेतुर्व्यवहार दृष्ट्या पुनश्चतुर्विधत्वम् । एकनायिकोऽनुकूलः यथा रामः, सर्वाभ्यो नायिकाभ्यः समानव्यवहार-कर्ता दक्षिणः, नायिकायाः सगोपनं प्रतिकूलाचारणकर्ता शठः, प्रत्यक्षं च प्रतिकूलाचरणकर्ता धृष्टः । नाटिकासु उदयनादिः प्रकरणभेदेन अनुकूलभिन्नाचरणत्वात् त्रिधैव चित्रितो दृश्यते । नायिका च प्रथम सामाजिक-स्थितिदृष्ट्या त्रिविधा-स्वकीया यथा सीता, परकन्याऽनूढा यथा शकुन्तला रत्नावली च, सामान्या गणिका यथा उर्वशी वसन्तसेना च । रूपकेषु परोढायाः परकीयायाश्चित्रणं तु अनौधित्यकरत्वान् न निबध्यते । मुक्तक-काव्येषु परोढायो नायिकायाश्चित्रणं दृश्यत एवं यथा हालस्य गाथासु अन्येषु च संस्कृतमुक्तकेशु तत्राचार्याणां मते शृंगाररसाभास एव । नायिका पुनर्वयोभेदेन त्रिविधा-मुग्धा, मध्या, प्रौढ़ा च । शृंगारप्रकरणे मध्याया प्रौढ़ायाश्च नायकं प्रति धीरा-धीराधीरा-अधीरेति पुनस्त्रिधा वर्गीकरणम् । अधीरा मध्या यथा मालविकाग्नि-मित्रे इरावती, धीरा प्रौढ़ा तथा तत्रैव धारिणी, मुग्धा तत्रैव मालविका । ताश्च नायकानुरागस्य न्यूनता-धिक्यभेदेन कनिष्ठात्वं ज्येष्टात्वं च क्रमशो भजन्त्यः पुनर्द्विधा वर्गीक्रियन्ते । अवस्थाभेदेन ताः पुनः स्वाधीन-पतिका, वासकसज्जा, विरहोत्कण्ठिता, विप्रलब्धा, खण्डिता, कलहान्तरिता, अभिसारिका, प्रोषितभर्तृका चेति पुनरष्टविधा भवन्ति ।[3] भरतनाट्यशास्त्रे शृंगारोपचारविधौ विविधानां नायिकानां स्वभावचेष्टा-दिदृष्ट्या देवशीला, असुरशीला, पिशाचसत्त्वा, यक्षसत्त्वा, खरसत्त्वा, सूकरसत्त्वेत्यादयो द्वाविंशति भेदा उपलक्षणतयोपनिबद्धा नैते परवर्तिग्रन्थकारैः स्वीकृताः । अपित्वत्र वात्स्यायनोक्तं पद्मिनी-चित्रिणी-शंखिनी-

---

1. ना० शा० 18.31
2. There are no minor plots, and the development of the action is essentially simple, precisely as we should expect in the early period of dramatic activity.
—Philip Harsh : A hand book of classical drama p. 24.
3. विस्तरशो द्रष्टव्या—विश्वेश्वरपर्वतीयस्य रसचन्द्रिका पृ० 19-29

हस्तिनीतिचतुर्विधत्वं नायिकानामुपलभ्यते ।[1] शास्त्रे नायिकानां भावरसाश्रयाणामलंकाराणामुल्लेखोऽपि कृतोऽस्ति ये खलु नायिकानां शोभामुद्भासयन्ति । एतेऽलंकारास्तासां देहमात्रनिष्ठाः, न तु चित्तवृत्तिरूपाः, अतस्तेषां सात्त्विकभावेभ्यः स्पष्टं भेदः ।

नेतृपरिकररूपेणैव नाटकेऽन्यानि पात्राणि निबध्यन्ते । तेषु प्रतिनायकः प्रमुखः यथा वेणीसंहारे दुर्योधनः, मुद्राराक्षसे मलयकेतुः, महावीरचरिते रावणः, मृच्छकटिके शकारः मालतीमाधवे घोरघण्टः । किन्तु संस्कृतरूपकेषु प्रतिनायकं विनाऽपि संघर्षकल्पनया फलप्राप्तो विघ्नो निबध्यते, यथा शाकुन्तलेशापस्यकल्पना, उत्तररामचरिते च जनापवादकल्पना । एतादृशेषु रूपकेषु संघर्षस्याधिकं कलात्मकं समायोजनं दृग्गोचरीक्रियते । अन्यानि पात्राणि नायकस्य प्रतिनायकस्य वा सहायकीभूतानि भवन्ति । तेषु पीठमर्दसंज्ञकः पताकानायकः, नायकस्य च नर्मसुहृद विदूषकोऽयं प्रामुख्यं भजतः संस्कृतरूपकस्य विशिष्टं पात्रम् । हास्यरसोद्बोधको विचित्रवेश- भूषावाग्व्यापारोऽयं ब्राह्मणः नाट्ये नायकस्य प्रणयव्यापारे साचिव्यमधितिष्ठति । संस्कृतरूपके विदूषकोक्तिद्वारा नायकस्य दोषा अपि समुद्घाट्यन्ते एतावताऽस्य शेक्सपियरनाट्यकृतिषु निबद्धात् फालस्टाफनामकाद् विदूषकात् (jester) भेदः । अन्तःपुरे नायिकायाः परिचरणे कञ्चुकी-नर्तकी-धात्री-वर्षवर-कुब्ज-वामन-किरातादीनामपि चित्रणं विधीयते, यथा रत्नावल्याम् "नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्यत्रपा" मित्यादि पद्यद्वारा संकेतितम् ।

संस्कृतरूपकाणां पात्राणां चित्रणविषये आधुनिकपण्डितैरेतत्कथ्यते यदेतानि प्रायः स्ववर्गप्रतिनिधिभूतानि (Type Characters) सन्ति तेषां व्यक्तिनिष्ठं शीलवैचित्र्यं नोद्घाटयन्ति संस्कृतकवयः । किन्तु इदमत्रावधेयं यत् पाश्चात्यनाट्यवत् संस्कृतनाट्यकर्तुरुद्देश्यः तच्चरित्रचित्रणमात्रं न वर्तते यत् शेक्सपियरादिषु प्राप्यते, अपितु अत्र रसनिष्पत्तिः प्राधान्यं भजते । रसस्तु पात्राणां साधारणीकरणं बिना न शक्यो निष्पादयितुम् । अतः साधारणीकरणदृष्ट्येवात्र पात्राणि वर्गप्रतिनिधिभूतानि भवन्ति । तथापि उत्तररामचरिते रामस्य, शाकुन्तले दुष्यन्तस्य, मृच्छकटिके चारुदत्तवसन्तसेनादीनां, मुद्राराक्षते च चाणक्यस्य व्यक्तिनिष्ठं शीलवैचित्र्यमपि कविभिर्निबद्धं दरीदृश्यत एव ।

"नाट्यं सत्त्वे प्रतिष्ठित" मिति दिशा भरतनाट्यशास्त्रानुसारं रसनिष्पत्तिस्तावन्नाट्यस्य प्रमुखं प्रयोजनम् । सा च चर्वणारूपा रसनिष्पत्तिर्नाट्यप्रयोगे विभावानुभावव्यभिचारिसंयोगाद् सम्भवति । रसस्त्वष्टविधः —

"शृंगारहास्यकरुणरौद्रवीरभयानकाः । वीभत्साद्भुतसंज्ञौ च नाटये त्वष्टौ रसाः स्मृताः" इति । एते रसाः अस्फुटरूपेण स्थायिचित्तवृत्तिरूपाः सन्तः स्थायिभावा इति उच्यन्ते । ते च यथाक्रमं रतिः, हासः-शोकः, क्रोधः, उत्साहः, भयः जुगुप्सा, विस्मयश्चेति । स्थायिभावा एव तत्तद्विभावानुभावव्यभिचारिसंयोगात्परिपुष्टाः सन्तो रसरूपतामापन्नाः प्रपाणकरसन्यायेन प्रेक्षकैरुपभुज्यन्ते । यदाह भरतः --

"यथाहि नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिस्तथा नानाभावोपगमाद् रसनिष्पत्तिः, यथाहि-गुडादिभिर्व्यञ्जनैरोषधिभिश्च षाडवादयो रसा निवर्त्यन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति । अत्राह-रस इति कः पदार्थः । उच्यते—आस्वाद्यत्वात् । कथमास्वाद्यते रसः ।

---

1. कविराजचक्रवर्तीः रसमकरन्दः पृ० 72 (द्वादशः परिच्छेदः)

यथाहि नानाव्यंजनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति तथा नानाभावाभिनयव्यंजितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति" इति ।[1]

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति" रित भरतसूत्रे संकेतिता रसनिष्पत्तिर्लोल्लट-शङ्कुक-भट्टनायकाभिनवगुप्तपादाचार्यैर्विविधतया व्याख्याता । लोल्लटस्तु रसनिष्पत्तिमुत्पत्तिरूपां मन्यमानो विभावादीन् रसस्य कारणरूपान् रसञ्च कार्यरूपं स्वीकरोति । शङ्कुकश्च रसनिष्पत्तिमनुभितिरूपां घोषयन् विभावादिहेतुभिर्हेतुमतोरसस्य निष्पत्तिं अनुमानप्रमाणनिष्ठामुररीकरोति । लोल्लटशंकुकौ नटादिप्रयोक्त्रभिप्रायेण रससूत्रस्य व्याख्यां विदधतः । रसनिष्पत्तिसंबंधे भरतदृष्टिस्तु नाट्यप्रयोगकर्तुर्दृष्ट्या वर्तते, अतो लोल्लटस्य व्याख्यैव भरतदृष्ट्या समीचीना प्रतिभाति । लोल्लटमते स्थाय्येव विभावादिभिरुपचितो रसः स च मुख्यया वृत्या रामादौ अनुकार्येऽनुकर्तर्यपि चानुसन्धानबलादुपचितो भवति । शंकुकमते नटश्चित्रतुरगादिन्यायेन रामोऽयमिति रीत्या तत्प्रयुक्तविभावादिहेतुभिः प्रेक्षकान् रसं अनुमापयति, न तु प्रेक्षका मानससाक्षात्काररूपेणरसमुपभुञ्जयन्ते । भट्टनायकमते रसस्तु भुक्तिरूपः विभावादिसाधारणीकरणात्मनाऽभिधातो द्वितीयेनांशेन भावकत्वव्यापारेण भाव्यमानो रसोऽनुभवस्मृत्यादिविलक्षणेन रजस्तमोऽनुवेधवैचित्र्यबलाद् द्रुतिविस्तारविकासलक्षणेन सत्त्वोद्रेकप्रकाशानन्दमयनिजसंविद्विश्रान्तिलक्षणेन परब्रह्मास्वादसविधेनभोगेन परं भुज्यते । अस्मिन् मते रसनिष्पत्तिर्भुक्तिरूपा, विभावादयश्चभोजकरूपाः "अभिनवगुप्तपादार्चाणां मते रसस्तावत् व्यङ्ग्यरूपः तन्निष्पत्तिस्तु अभिव्यक्तिरूपा । तेन सामाजिकान्तःकरणे वासनात्मतया स्थितोरत्यादिः विभावादिना व्यंजकेन शृंगारादिरूपेणाभिव्यक्तः सन् सामाजिकस्य चर्वणारूपप्रत्ययगोचरो भवति । भट्टनायकाभिनवगुप्तपादाभ्यां रससूत्रं सहृदयगतचर्वणादृष्ट्या व्याख्यातं, नतु लोल्लटवत् प्रयोगकर्तॄणां नटादीनां दृष्ट्या ।[2]

रसस्यैते विभावादयः कारण-कार्यसहकारिरूपाः । विभावस्तु द्विविधः—आलम्बनरूपो यथा शृंगारे शकुन्तला, वीरे च प्रतिनायको रावणः, उद्दीपनरूपे देशकालगणनाऽऽलम्बनविभावचेष्टाश्च परिगण्यन्ते । अनुभावास्तु आश्रयनिष्ठा अंगजा, विकाराः । एतेषु सात्विकभावानां विशिष्टैव कोटिः । स्तम्भादय एते अष्टो सात्विकभावाः[3] समाहितमनरूचादेव नटेनोत्पादयितुं शक्याः, नत्वेतेऽन्यमनसा कर्तुं शक्या इत्येतेषां अन्येभ्योऽनुभावेभ्यो विशेषः । व्यभिचारिणो भावा रसेषु विविधमाभिमुख्येन चरन्ति । दशरूपककारस्तु व्यभिचारिणां सत्तां स्थायिनि समुद्रे कल्लोलकल्पां घोषयति ।

"विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ ॥"[4] इति

एते चोपलक्षणतया निर्वेदाद्यास्त्रयस्त्रिंशत् ।

---

1. ना० शा० प्रथमोभागः (गायक० सं०) पृ० 287-289
2. अभिनव भारती पृ० 272-280
3. स्तम्भस्वेदोऽथ रोमाञ्चः स्वर्भेदोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः । ना० शा० 7.94
4. दशरूपक 4-7

रसैरेतेः संबद्धाश्चतस्रो नाट्यवृत्तयः सन्ति ताः हास्यश्रृंगारसम्बद्धा कौशिकी, वीराद्भुतशमात्मिका सात्त्वती, रौद्रभयानकसम्बद्धाऽऽरभटी, बीभत्सकरूणसम्बद्धा च भारती । एतासां प्रत्येकं पुनश्चत्वारि अंगानि भवन्ति । कैशिक्या नर्म-नर्मस्फुंज-नर्मस्फोट-नर्मगर्भाश्चत्वारि, आरभट्याः संक्षिप्तकावपात्—वस्तूत्थापन-सम्फेटाः, सात्त्वत्या उत्थापक-परिवर्तक-संलापक-संघात्यकाः भारत्याश्च प्ररोचनाऽऽमुख-वीथीप्रहसनानीति ।[1]

संस्कृतनाट्ये वाचिकाभिनये तावत् द्विविधो भाषाप्रयोगः समुपलभ्यते । उत्तमप्रकृतीनि पात्राणि संस्कृते सम्भाषणं कुर्वन्ति, स्त्रीपात्राणि मध्यमप्रकृतीनि च पात्राणि प्रायः शौरसेनीप्राकृतस्य प्रयोगं विदधाति । नीचाश्चेटादयः प्राकृतजनाः मागधीप्राकृतप्रयोगं कुर्वन्ति । भरतनाट्यशास्त्रे मागधी, अवन्तिजा, प्राच्या, शौरसेनी, अर्धमागधी, वाह्लीका, दाक्षिणात्या चेति सप्त प्राकृतभाषाः संकेतिताः सन्ति ।[2] एतासां पात्रावस्था-देशादिदृष्ट्या विनियोगो विधातव्यः । शाकुन्तले स्त्रीपात्राणां विदूषकस्य च भाषा शौरसेनी, रक्षिमत्स्य-जीविनाञ्च मागधी । मृच्छकटिके शौरसेनी-मागधी प्राच्याऽवन्तिका-शकारी-ढक्कीत्यादयः प्राकृतभेदा अपि नाट्यकृता उपनिपद्धास्ते च मृच्छकटिकटीकायां पृथ्वीधरेण संकेतिताः सन्ति ।[3] परवर्तिनाटकेषु पद्यप्रयोगे महाराष्ट्रीप्राकृतं समुपलभ्यते । भरतेन तु महाराष्ट्र्या नामाऽपि न संकेतितम् । संस्कृतरूपकेषु वाचिकाभिनयो गद्यपद्यमयः । भावव्यंजनायां वस्तुवर्णने च प्रायशः पात्राणि काव्यमयं संवादमुपयुञ्जन्ति ।

वाचिकाभिनयोऽयं पुनस्त्रिविधाः । अश्राव्यः, सर्वश्राव्यो, नियतश्राव्यश्च । अश्राव्यस्तावत् पात्रस्य स्वगतवचनम् । नियतश्राव्यो जनान्तिकापवारितभेदेनद्विधा भवति ।

वाचिकाभिनये ध्रुवागीतीनामपि उल्लेखः कर्तुमपेक्षितः नाट्यस्य समृद्धये तौर्यत्रिकप्रयोगः भरत-शास्त्रानुसारमवश्यं कर्तव्यः, यतो हि गीतं नाट्यस्यशय्याकल्पम्, उक्तञ्च—

गीते प्रयत्नः प्रथमस्तु कार्यः शय्यां हि नाट्यस्य वदन्ति गीतम् ।
गीतेऽपि वाद्येऽपि च सम्प्रयुक्ते नाट्यप्रयोगोन विपत्तिमेति ॥ इति[4]

नाट्ये द्विविधा ध्रुवागीतयो दृश्यन्ते । प्रबन्धकर्तुः कवेः ध्रुवागीतयः, नाट्यसमृद्धये च नाट्याचार्यप्रयोजिता ध्रुवागीतयः प्रबन्धकर्तुर्ध्रुवागीतयः पंचप्रकाराः सन्ति ।[5]

(1) प्रावेशिकी-यत्र कुतपगायकैः पात्रस्य प्रवेशः ध्रुवगीत्या संसूच्यते, यथा विक्रमोर्वशीयस्य चतुर्थेऽङ्के प्रावेशिक्या । 4.1, 4.5 पुरूरवसः प्रवेशः ।

(२) नैष्क्रामिकी—यत्र कुतपगायकैः पात्रस्य रंगान्निर्गमः गीत्या संसूच्यते । यथा विक्रमोर्वशीये (4.3) ध्रुवागीत्या पुरूरवसोरंगान्निर्गमः ।

---

1. ना० शा० 20-27-67 (तृतीयोभागः पृ० 92-103)
2. ना० शा० 17.48
3. मृच्छकटिकम् (पृथ्वीधर टीका) पृ० 1-2 (निर्णयसागर सं० 1916 ई०)
4. ना० शा० 32, 436
5. तदैव 32.311-315

(3) आक्षेपिकी—यत्र प्रस्तुतरसोल्लंघनेन रसान्तरोद्भावनं गीत्या संसूच्यते। यथा तत्रैव पुरूरवसो विरहदशाया गीत्या संसूचनम्।

(4) प्रासादिकी—प्रस्तुतरसस्य विभावोन्मीलनेन निर्मलीकरणं गीत्या सम्पाद्यते।

(5) आन्तरा—यत्र च्छिद्राच्छादनमात्रप्रयोजनेन शुष्काक्षरा गीतिर्विनियोज्यते। एता नाट्याचार्यप्रयोजिता भवन्ति।[1]

एता ध्रुवागीतयः प्राकृतभाषायां प्रायोदेशीरागबद्धा भवन्ति। एतासां सहचारितया ततातोद्य-सुषिर-तालवाद्यानामपि प्रयोगो विधीयते। अतएत भरतेन शास्त्रे ततवाद्यानां वर्णनालंकारा, वेण्वादि-सुषिराणां वादनविधिः, तालाध्याये चञ्चत्पुट-चाचपुटरूपो द्विविधस्तालः पुष्कराध्याये च मायूरी, अर्धमायूरी, कार्मारवीति तिस्रो मार्जना विस्तरशो वर्णिताः। वाद्यस्य नाट्ये महत्त्वं प्रतिपादयता शास्त्रेणोक्तम्—"वाद्येऽविगीतेऽपि च सम्प्रयुक्ते नाट्यस्य शोभा न विनाशमेति।[2] इति भरतानुसारं संस्कृतरूपके नाट्यवस्तुनः प्रदर्शनात् पूर्वं पूर्वरंगविधानस्य, प्रस्तावनायाश्च, अन्ते भरतवाक्यस्य च नियतप्रयोगो दरीदृश्यते। पूर्वरंगस्तावद् रंगदेवतपूजनानन्तरं नाट्यसमृद्धये विघ्नोपशान्तये च प्रस्तुतः तौर्यत्रिकसमन्वितो व्यापारो नवभिरन्तर्जवनिकानिष्ठैः दशभिश्च बहिर्जवनिकानिष्ठैः पूर्वरंगाङ्गैः सम्पाद्यते।[3] सोऽयं पूर्वरंगो गीत-वाद्य-नृत्य-सूत्रधारतत्सहायद्वयप्रयुक्तत्रिगतनिष्ठाभिनयात्मकः किमपि अपूर्वं फलं निष्पादयति। अत्र प्रत्याहारादयो नवान्तर्जवनिका व्यापाराः मृदंगवादनेन समारब्धा भवन्ति, तत्र च कुतपगायकवादकनां स्वासनग्रहणादनन्तरं शारीरवीणाया वाद्यानाञ्च मृदंग-तत-वेणु-तालानां स्वरसाम्यसमायोजनपूर्वकं निःशब्द—सशब्दक्रियया गीतारम्भोऽन्तर्जवानिकासंस्थेन कुतपेन विधीयते। ततो जवनिकोद्घाटनानन्तरं गीतकादि दशपूर्वरंगाङ्गानाम् प्रदर्शनं कुतप-सूत्रधार-विदूषक-पारिपार्श्विकैः क्रियते। गीतकं तावत् भद्रक-वर्धमानकान्यतरं तालनिष्ठं कुतपेन प्रस्तूयते। अत्र च गीतकेन सह नर्तक्या गीतार्थव्यंजकं भावनृत्यं, पुनश्च नर्तकीभिः शुद्धमाङ्गिकाभिनयनिष्ठं नृत्तं च प्रस्तूयते। तत् एकादशे उत्थापनासंज्ञके पूर्वरंगाङ्गे कुतपद्वारा नाट्याचार्यकृतनान्दीगानपुरःसरं सूत्रधारपारिपार्श्विक–विदूषकाणां त्रयाणां नटानां वैष्णवस्थानेन रंगमञ्चे प्रवेशः। सूत्रधारसहचरौ क्रमशः जर्जरपूताम्भः पूर्णं भृंगारं च गृहीत्वा प्रविशतः। तेषां प्रवेशानन्तरं चतुर्थो नटः पुष्पाण्यादाय मंचे प्रविशति शास्त्रेऽयं चतुर्थकारसंज्ञयाऽभिधीयते। द्वादशे परिवर्तनसंज्ञके पूर्वरंगाङ्गे सूत्रधारः चतसृषु दिक्षु दिक्पालानां जर्जरस्य कुतपस्थ च पुष्पादिद्वारा पूजां विधाय जर्जरस्थापनां करोति। अस्मिन्नवसरे कुतपद्वारा परिवर्तनी-ध्रुपायागानं प्रस्तूयते। त्रयोदशे नान्दीसंज्ञके पूर्वरंगाङ्गे सूत्रधारस्तस्यसहचरौ च देवब्राह्मणादीनां आशीः-प्राप्त्यर्थं मंगलसूचिकां नाट्याचार्यकृतां नान्दीं पठन्ति। नान्दी चैषाऽष्टपदा द्वादशपदा वा छन्दोबद्धा भवति। चतुर्दशेऽङ्गे शुष्कावकृष्टसंज्ञके शुष्काक्षरगीतकानां गानं विधीयते कुतपेन। रंगद्वार-चारी-महाचारी-त्रिगत-प्ररोचनासंज्ञकेषु पञ्चसुबहिर्जवनिकास्थपूर्वरंगाङ्गेषु सर्वप्रथमं नटानां बागङ्गात्मकोव्यापारः प्रस्तूयते।[4]

---

1. नाट्यदर्पणः 4.2 वृत्तिश्च० (पृ० 365-369)
2. ना० शा० 34.246
3. द्रष्टव्यम् अस्मच्छोधपत्रं—Purvaranga in ancient Indian Theatre.
   (Article published in Kalidasa, 1989 Ujjain)
4. यस्मादभिनयरुचत्र प्रथमं ह्यवतार्यते।
   रंगद्वारमतोज्ञेयं बागङ्गाभिनयात्मकम्॥ ना० शा० 5.26

ततः कुतपेन शिव-पार्वती-शृंगारनिबद्धगीतकं गीयते, तदर्थव्यञ्जकं च चारीनृत्यं विविधांगहारपुरःसरं सूत्रधारेणाभिनीयते। अनन्तरं सप्तदशेऽङ्के कुतपद्वारा शिवस्य रौद्रव्यापारनिष्ठं त्रिपुरदाहादिकथाव्यंजकं गीतं गीयते, तदर्थव्यञ्जकं च नृत्यं उद्धतैर्मण्डलैरंगहारैश्च महाचारीद्वाराऽभिनीयते।

त्रिगते तावत् सर्वप्रथमं सूत्रधार-विदूषक-पारिपार्श्विकाणां संवादरूपो वागभिनयः प्रारभ्यते। प्ररोचनायां सूत्रधारः प्रस्तोतव्यस्य रूपकस्य प्रेक्षणार्थं कथांश-कवि-निर्देशपुरःसरं सामाजिकानुन्मुखीकतु प्रयतते। प्ररोचना चैषा भारतीवृत्तेरंगभूता।

एषु एकोनविंशतिपूर्वरंगाङ्गेषु नवान्तर्जवनिकासंस्थानि अदृष्टफलानि शेषाणि बहिर्जवनिका-संस्थानि दृष्टफलान्येव भवन्तीति अभिनवगुप्तपादाचार्याः।[1] भरतसम्मतं तावत् पूर्वरंगाविधानं परवर्तिनाट्य-शास्त्रकारैर्धनञ्जयादिभिः संक्षिप्तीकृत्य नान्दीतः समारभ्यते यदाहविश्वनाथः—"तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये।[2] इति नाट्यदर्पणकाराभ्यामपि संकेतितम्—"यावद्धि रूपकस्याभिनयस्तावदेषा नान्दी प्रयोक्तव्यैव—"नान्दीत्वं मंगलाभिधायाः प्रत्यूहापसारणेन समृद्धिजनकत्वात्।[3] इति। नाट्यप्रयोगे तावद् द्विधा नान्दीप्रयोगः रंगसूत्रणकत्रा नाट्याचार्येण कृतानान्दी कविकृता च नान्दी। अस्याः पाठकाः सूत्रधार-स्थापकपारिपार्श्विकाः। संस्कृतरूपकेषु सर्वेष्वपि कविकृता नान्दी प्राप्यते। नाट्यशास्त्रानुसारं सूत्रधारो रंगे नान्दीपठनात्पूर्व मेव प्रविशति तदनन्तरं च सहचाराभ्यां सार्धं नान्दीं पठति, ते च सर्वे नान्दीपाठका इत्यभिधीयन्ते। किन्तु संस्कृतरूपकाणामुपलब्धहस्तलेखेषु सूत्रधारो नान्द्यन्ते मञ्चे प्रविशति—"नान्द्यन्ते ततः प्रविशति सूत्रधारः" इति। भरतानुसारं प्ररोचनानन्तरं सूत्रधारः सहचरसहितो रंगान्निष्क्रामति अनन्तरं चान्यस्तत्सदृशो नटो मञ्चे प्रविशति यः खलु शास्त्रे स्थापकसंज्ञयाऽभिहितोऽस्ति, न तु सूत्रधारसंज्ञया।[4] दशरूपककारेणापि नाट्यप्रस्तावनार्थं स्थापकस्यैव संकेतः कृतः, न तु सूत्रधारस्य।

"पूर्वरंगं विधायादौ सूत्रधारे विनिर्गते।
प्रविश्य तद्वदपरः काव्यमास्थापयेन्नरः" ॥ इति।[5]

नाट्यदर्पणेऽपि स्थापकस्य नाट्यस्थापनाकर्तृरूपेण सूत्रधारात् प्रथममुल्लेखः।[6] किन्तु उपलब्धसंस्कृतरूपकेषु सूत्रधार एव रूपकप्रस्तावनायां नाट्यस्थापनं करोति। इदमनुमीयते यद् भरतोक्तशास्त्रनिर्दिष्टपूर्वरंग-विधानस्य संक्षिप्तीकरणात् सूत्रधारेणैव स्थापकस्यापि कार्यसम्पादनं समारब्धम्। तच्च भासनाटकेषु सर्वप्रथमं दरीदृश्यते। पूर्वरंगसंक्षिप्तीकरणं तावद् भासेनैव कृतं तेनैवच सूत्रधारस्थापकयोर्भेदोऽपि दूरीकृतः। प्रमाणञ्चात्र बाणकविर्येन भासनाटकानां सूत्रधारकृतारम्भत्वम् प्रमुखतया संसूचिम्—

---

1. अभिनवभारती (प्रथमोभागः गायक० सं०) पृ० 219
2. साहित्यदर्पणः षष्ठःपरिच्छेदः कारिका 23
3. नाट्यदर्पणः 4.1 वृत्ति पृ० 363
4. प्रयुज्य रंगानिष्क्रामेत् सूत्रधारः सहानुगः।
   स्थापकः प्रविशेत्तत्र सूत्रधारगुणाकृतिः।।
   स्थानं तु वैष्णवं कृत्वा सौष्ठवांगपुरस्कृतम्!—ना० शा० 5.161-162
5. दशरूपकम् 3.2
6. नाट्यदर्पणः पृ० 278 (दिल्ली वि० वि० संस्करणम्)

सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ।। इति ।[1]

उपलब्धसंस्कृतरूपकेषु प्रस्तावनायां सूत्रधारो रंगेप्रविश्य अलमतिविस्तरेण"[2] इति वाक्येन पूर्वरंगविधानस्यैव संक्षिप्तीकरणं व्यञ्जयति । मृच्छकटिके तु पूर्वरंगस्य विस्तेरेण विधानं परिषत्कुतूहलविमर्दकारीति संकेतितम्, यथा—"अलमनेन परिषत्कुतूहलकारिणा परिश्रमेणेति" ।[3] भरतनाट्यशास्त्रानुसारं पूर्वरंगविधानं अपूर्वफलनिष्पादकम् । अतस्तस्यावश्यमितिकर्तव्यता तत्र निर्दिष्टा वर्तते—

"य इमं पूर्वरंगं तु विधिनैव प्रयोजयेत् ।
नाशुभं प्राप्नुयात् किंचित्स्वर्गलोकं च गच्छति ।।
यश्चापि विधिमुत्सृज्य यथेष्टं सम्प्रयोजयेत् ।
प्राप्नोत्यपचयं घोरं तिर्यग्योनिं च गच्छति ।"[4] इति ।

पूर्वरंगस्य सर्वाण्येवेकोनविंशाति अंगानि नाट्यप्रयोगे सर्वदैव प्रयोक्तव्यानि न वेति विषये भरतमतमिदं प्रतिभाति यन्नांदी तु नित्यमेव प्रत्येकस्मिन् नाट्यप्रदर्शने प्रयोंक्तव्यैव,[5] किन्तु विस्तृतं पूर्वरंगविधानं तु रंगदैवतपूजनानन्तरमाद्ये नाट्यप्रयोग एव विधातव्यम् । नान्दीभिन्नान्युत्थापनादीनि पूर्वरंगाङ्गानि तु प्रयोगेऽन्यथात्वमपि विधातुं शक्यानि । यदाहाभिनवगुप्तपादाः—"अहरहश्चैषा (नान्दी) प्रयोगे प्रयोज्या एवं च नित्यमेवंरूपमेव । अन्यपाठ्यानामुत्थापनादीनां । प्रयोगवशादन्यथात्वोपपत्तिर्दृश्यते" इति ।[6] पूर्वरंगस्तावच्छुद्धचित्रभेदेन द्विधा, तत्र चित्रभेदे नान्दीपदानां मध्ये पृथक् पृथक् गीतनृत्यानां प्रयोगः । तथापि भरतेन पूर्वरंगे नृत्यगीतयोरतिप्रसंगस्य निषेधः संकेतितः ।

"कार्यो नातिप्रसंगोऽत्र नृत्यगीतविधिं प्रति ।
गीते वाद्ये च नृत्ते च प्रवृत्तेऽतिप्रसंगतः ।।
खेदो भवेत्प्रयोक्तॄणां प्रेक्षकाणां तथैव च ।
खिन्नानां रसभावेषु स्पष्टता नोपजायते ।।
ततः शेषप्रयोगस्तु न रागजनको भवेत् ।। इति ।[7]

---

1. हर्षचरित प्रथम उछ्वासः श्लोक 15 पृष्ठ-8 (चौ० सं०)
2. दृष्टव्यम्—मालविका०, विक्रमोर्वशीयम्, कालिदासग्रंथावली पृ० 327, 437 डा० रेवाप्रसाद द्विवेदी-सम्पादिता ।
3. मृच्छकटिकम् पृ० 2 (निर्णयसागर सं०)
4. ना० शा० 5.170-171
5. आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।।—ना० शा० 5 24
6. अभिनवभारती (प्रथमोभागः) पृ० 217
7. ना० शा० 50.158-160

पूर्वरंगान्ते स्थापकेन सूत्रधारेण वा मारिष-विदूषक=नटीसहचरेण कथावस्तुनः कवेश्च परिचयं दातुमामुखस्यावतरणं क्रियते । आमुखमेव प्रस्तावना—स्थापनेतिसंज्ञाद्वयेनापि नाट्यशास्त्रेऽभिधीयते । अत्र प्रथमाके प्रवेष्टव्यस्य नाट्यपात्रस्य प्रवेशं संसूच्य स्थापकः सूत्रधारोवा स्वसहयोगिभिः सह रंगान्निष्क्रामेत् । आमुखे नाट्यपात्रप्रवेशस्तु सूत्रधारादिसंलापे नाट्यकार्यसूचकैश्चित्रैर्वाक्यैः वीथ्यंगैरन्यथा वा विधीयते, मूल-कथापात्रप्रवेशविधिरेष पंचप्रकारः, अतो भरतेनामुखस्य उद्घात्यक-कथोद्घात-प्रयोगातिशय-प्रवृत्त-कावलगीतरूपाः[1] पंचप्रकाराः संकेतिताः ।

(1) उद्घात्यके तावद् गतार्थानि पदानि पदैरन्यैर्योजयित्वाऽन्यार्थवन्त्यपि पदानि अर्थान्तरे संक्रमय्य पात्रप्रवेशः । यथा मुद्राराक्षसे, "क्रूरग्रहः स केतुश्चन्द्रमसं पूर्णमण्डलमिदानी" मित्यादि सूत्रधारोक्तयनन्तरं, "आः क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छतीति" चाणक्यस्यैतदुक्तिद्वारा प्रथामंके प्रवेशः ।[2]

(2) कथोद्घाते सूत्रधारस्य वाक्यं वाक्यार्थं वादाय नाट्यपात्रस्य प्रवेशः । यथा, वेणीसंहारे, "निर्वाणवैरदहनाः······ स्वस्था भवन्तु कुरुराजसुताः सभृत्याः" इति सूत्रधारोक्तिमादाय "आः दुरात्मन् मंगलपाठक, कथं स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः "इत्युक्त्या भीमसेनस्य मंचे प्रवेशः ।[3]

(3) प्रयोगातिशये सूत्रधारद्वारा एकस्मिन् प्रयोगेऽन्यस्य प्रयोगं विधाय पात्रप्रवेशः क्रियते । यथा शाकुन्तले "तवास्मि गीतरागेण हारिणा—एष राजेव दुष्यन्तः सारंगेणाति रंहसेति सूत्रधारद्वारा नटी प्रयुक्तसंगीतप्रयोगे अन्यस्य मृगद्वाराहार्यमाणदुष्यन्तस्य प्रयोगं विधांय प्रथमांके तत्प्रवेशः संसूचितः ।[4]

(4) प्रवृत्तके विश्वनाथानुसारं प्रवर्तकेवाऽऽमुखप्रकारे सूत्रधारः कमपि कालं ऋतुं वाश्रित्य वर्णनं करोति तद्द्वारा च पात्रप्रवेशः । यथा वेणीसंहारे "सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः" इत्यादिना शरद्वर्णनेन ।[5]

(5) अवलगिते तावत् एकत्र समावेशादन्यत्र कार्यप्रसाधनद्वारा पात्रप्रवेशो विधीयते । अस्यो-दाहरणं तु विश्वनाथेन पूर्वोक्तप्रयोगातिशयोदाहरणरूपं "एष राजेव दुष्यन्त" इति पद्यमुद्धृतम्, किन्तु दशरूपकावलोके धनिकेन उत्तररामचरितात् समुत्पन्नवनविहारगर्भदोहदायाः सीताया दोहदकार्येऽनुप्रविश्य जनापवादादरण्ये त्यागप्रसंगःसमुदाहृतः । नाट्यदर्पणे तु दशरूपकावलोकसम्मतोदाहरणमेव प्रदत्तं वर्तते । द्वयोरेतयोरुदाहरण्योः प्रकृत्या परस्परं भेदः प्रतीयते ।[6]

संस्कृतनाट्यपरम्परायां रूपकान्ते नेत्रा केनापि देव-ऋषि-पुरोहितादिना पात्रेण वा शुभाशंसात्मकं भरतवाक्यं पठ्यते । तच्चनाट्यवस्तुनः चतुःषष्ठितमं निर्वहणसंधेश्च चतुर्दशतममंङ्गम् । यथा शाकुन्तले—"प्रवर्ततां प्रकृतिहिताय पार्थिवः" इत्यादिना भरतवाक्यप्रयोगः ।

---

1. ना० शा० 20.30-33
2. ना० शा० 18-115, दशरूपकम् 3.13 सा० द० 6.292 (जीवा० सं)
3. ना० शा० 20.35 दशरूपकम् 3.9 सा० द० 6.293
4. ना० शा० 20.36, दशरूपकम् 3.11 सा० द० 6.294
5. ना० शा० 20.27, दशरूपकम् 3.10, सा० द० 6.295
6. ना० शा० 18-116, दश० 3.14, सा० द० 6.296

संस्कृतरूपकेषु उत्कृष्टो नाट्यभेदः नाटकप्रयोगः एष तु ग्रीकनाट्यस्य ट्रेजेडीवत् प्रशस्तो नाट्यप्रकारः। द्वयोरेतयोरितिवृत्ते पौराणिकमैतिहासिकं वा किमपि उदात्तं कथावस्तु कल्प्यते, यत्र धार्मिको नैतिको वोपदेशः कविना प्रतिपाद्यत एव।[1] द्वयोरेव नेता कोऽपि उदात्तचरितः कुलीनो राजा राजकुमारो वा भवति, किन्तु तत्र स्पष्टं भेदो यत् संस्कृतनाटके नेता फलप्राप्तिं सम्पादयत्येव, अतो हेतोरत्र नाटकं सुखे एव पर्यवसितं भवति, पुनश्च संस्कृत नाटके धीरोदात्तनायकः चारित्रिकदृष्ट्या सर्वगुणसम्पन्नो निर्दोषश्च चित्र्यते, यदि मूलकथायां नेतुः कोऽपि दोषः, परिदृश्यते, तदा कविः कल्पनया तं परिहरत्येव, यथा शाकुन्तले मूलकथायां परिवर्तनं विधाय कालिदासेन दुर्वाससः शापस्य कल्पना कृता। ग्रीकट्रेजेडी तु प्रायों दुःखे एवं परिणमति,[2] तत्र नेता अदृश्यशक्तिद्वारा प्रताडितः सन् विपत्तिमधिगच्छति—यद्वा केनाऽपि मानसिकविकारदौर्बल्येन स्वयमेव विपत्तिमामन्त्रयति। तत्र नेतुः मरणं वधं वा मञ्चे प्रदर्श्य नाट्यप्रयोगद्वारा प्रेक्षकाणां मनसि करूणाया भयस्य वोद्रेकं विधाय भावयोरेतयोर्विरेचन (Catharsis) प्रयासः कविना विधीयते।[3] नैषा परिपाटी भरतनाट्यसिद्धान्तानुसारमङ्गीकृताऽऽस्ते।

भरतनाट्यप्रयोगस्य क्लासिकग्रीकनाट्यपरम्परातो यूरोपीयरोमेंटिकनाट्यपरम्परात आधुनिकयथार्थनिष्ठनाट्यपरम्परातश्च भूयान् भेदः परिलक्ष्यते। तत्र वस्तुनि अधिकारिकमेवेतिवृत्तं गृह्यते न कदापि प्रासंगिकस्य वस्तुनोऽपि समावेशः, अन्यच्च तत्र दुःखान्तमितिवृत्तं प्रभावातिशयकारि मन्यते। यूरोपीयनाटकानां रसास्वादरूपाऽऽनन्दोपलब्धिर्न नाट्यप्रयोजनमपितु पात्राणां शीलवैचित्र्यनिरूपणं यद्वा कस्या अपि समस्यायाश्चित्रणमेव कवेः प्रधानं प्रयोजनम्। भरतनाट्यसिद्धान्तानुसारं रूपके काव्य-नाट्य-गीत-वाद्य-नृत्यसमन्वितं परिपूर्णं कलासंविधानकं प्रस्तूयते। यद्यपि प्राचीनेषु ग्रीकनाटकेषु "कोरस"—(Chorus) प्रयोगो नृत्यप्रयोगश्चापि दृश्यते, तथापि तत्र कोरस—योजनामूलकथांशरूपेण विधीयते स्म।[4] भरतनाट्यपरम्परायां गीतवाद्यार्थं प्रयुक्तः कुतपविन्यासस्तु "कोरस"—वन्नास्ति कथावस्तुनोऽङ्गम्। आधुनिकयूरोपीय समस्यामूलक—यथार्थनिष्ठ—नाट्यपरम्परावद्भरतनाट्यपरम्परायां केवलं यथार्थनिष्ठो लोकधर्मितानिष्ठो वाऽभिनयो न सम्पाद्यते, अपितु नाट्यधर्मितायाः प्राधान्यस्वीकरणेन प्रतीकात्मको वागङ्ग-

1. द्रष्टव्यम—"A Greek tragdedy is a dramatic and choral presentation of an action usually taken from legend or remote history and involving incidents of a certain magntitude. The action is complete in itself, is treated in a serious manner, and is normally interpreted so as to exhibit some religious, moral or political significance. Tragedy is written, and the scenes of spoken verse are marked of by choral songs and other lyrics. No intermissions occur within a play. The ending may be a happy solution, but usually it involves a reversal of fortune from good to bad, and is tragic in the modern sense of the word."
—Harsh : Handbook of Classical Drama, p. 1
2. Aristotle Poetics XIII. 4, (Butcher's Trans.) p. 47
3. Butcher : Aristotle's Theory of Poetics and fine arts. p. 245
Aristotle : Poetics : (Butcher's Tr.) p. 49
4. Ibid : XVIII. 7 (Butcher's Tr.) p. 69

सत्त्वाहार्याभिनयः प्रस्तूयते । नाट्यधर्मिप्रतीकशैलीसमाश्रयणं तौर्यत्रिकसमन्वितत्वं, रसनिष्पत्तिप्रयोजन-मूलकत्वञ्च भरतनाट्यप्रयोगपरम्पराया यद्विशिष्टं लक्षणं तदेनां यूरोपीयनाट्यपरम्परातो विशिष्टां प्रमाणयति । लक्षणंत्रयमेतत् सर्वस्यामेव पौरस्त्यनाट्यपरम्परायां समुलभ्यते । विश्वस्य दक्षिणपूर्वदिग्भागे हिन्देशिया-स्याम-कम्बुज-चीन-जापानादिदेशानां द्वीपान्तराणाञ्च नाट्यपरम्परा अस्मन्नाट्यपरम्परावदेव नाट्यधर्मितानिष्ठाभिनयप्रयोगवती, भावव्यञ्जिका, तौर्यत्रिकसमन्वितेति तत्र भरतसिद्धान्तस्यैव प्रभावः परिलक्ष्यते । अत्र जापानदेशस्य "काबुकी", नो[1] इति नाट्यद्वयपरम्परायाः विशेषतः समुल्लेखः कर्तुमपेक्षितः । तत्र मंचे विभावादिसामग्र्याः साक्षात् प्रयोगाभावेऽपि शास्त्रनिष्ठाङ्गिकाभिनयप्रयोगद्वारा तेषां तेषां भावादीनां प्रतीकशैल्या व्यंजना क्रियते । यूरोपीयदेशेऽत्याधुनिकनाट्यपरम्परायां शर्मण्यदेशीयेन बर्टोल-ब्रेख्टमहोदयेन यथार्थनिष्ठां शैली विहाय प्रतीकनिष्ठा शैली समाश्रिता ।[2]

भरतनाट्यसिद्धान्तदृष्ट्योपलब्धसंस्कृतरूपकाणां पर्यालोचनेनेदं प्रतीयते यत्र पूर्वरंगसंक्षिप्तीकृत्य नान्द्या नाट्यसमारम्भः प्राप्यते । सूत्रधार एव स्थापकपदमप्यंगीचकार । शनैश्शनैस्तौर्यत्रिकविधीनां लोपो जातः । कालिदासहर्षादीनां रूपकेषु गीत-वाद्य-नृत्यानां विनियोगोऽभूत्, किन्तु हर्षादनन्तरमेतेषां प्रयोगो न दृश्यते । परवर्तिसंस्कृतरूपककर्तृभिर्नाट्ये मुख्यतया वाचिकाभिनयस्यैव महत्त्वं स्वीकृत्य पत्राणां संवादे काव्यप्रयोगे च दत्तावधानताऽङ्गीकृता । फलतस्तत्र श्रव्यकाव्यकल्पानां पद्यानामलंकृतपूर्णबन्धगद्यांशानां, उक्तिप्रत्युक्तिरूपाणां संवादानां च महत्त्वस्वीकरणेन नाट्याभिनयपरककार्यव्यापारस्यांगिकाभिनयस्य च कलात्मकं प्रदर्शनं गौणतामापद्यतेस्म । अस्याः प्रवृत्तेरारम्भो यद्यपि भवभूते रूपकेष्वेव दृश्यते तथापि अनर्घराघव-बालरामायण-प्रसन्नराघवादिषु नाटकेषु एषा प्रवृत्तिराधिक्यं भजते ।

मध्ययुगे उदीच्यभारते नाट्यप्रयोगकेन्द्राणां देवकुलानां राजकुलानाञ्च ह्रासाच्छास्त्रीयनाट्यप्रयोग-परम्परा विलुप्ता बभूव । दक्षिणभारते यथा कथञ्चित् केरलप्रदेशे आन्ध्रप्रदेशे चैषा संरक्षिताऽऽसीत् । किन्तु प्राचीनकालादेव शास्त्रीयनाट्यपरम्परायाः समानान्तरं निरन्तरं प्रवहन्ती लोकनाट्यधारा तत्तज्जनप-देष्वद्यावधि समेधमाना दरीदृश्यते । जात्रा-नौटंकी-ख्याल-मवाई-तमाशा-यक्षगान-कुचिपुड़ी-कथकली-रूपेणैषा तत्र-तत्र प्रचलिताऽस्ति अस्यामपि जननाट्यपरम्परायां भरतोक्ताभिनवप्रयोगस्य कानिचित् तत्त्वानिदृग्गोचरी-भवन्ति । आधुनिकभाषाणां नव्यनाट्याभिनयप्रयोगे आद्यरंगाचार्य-शिवरामकारन्तबादलसरकार-इब्राहिम-अल्काज़ी-विजयतेंदुलकर-बलवंतगार्गी-हबीबतनवीरप्रभृतिभिरत्र जननाट्यानां केचन प्रयोगविधयः सम्प्रयुक्ताः । नव्यभारतीयनाट्योत्थाने भरतसिद्धान्तानामपि अपेक्षितः समावेशः कर्तुं शक्यः ।

---

1. Nicoll : World Drama p. 657
2. The actors, all men, have been trained in their art from infancy, every smaller gesture is made to yeild significance, by the subtlest movement of a fan an emotion is conveyed and an inner story revealed by a stylized movement of arm.

   —World Drama p. 650.

वेणीसंहारे प्रचीननाट्यकर्मणां प्रभावः

डा० अशोक शास्त्री

एम० ए० (डाबल), पी० एच० डी०, डी० जर०, डी० फिल०, डी० लीट०,
महोपाध्याय, काव्यतीर्थ, ऋग्वेदतीर्थ, प्राचीनस्मृतितीर्थ,
नव्यस्मृतितीर्थ, पुराणतीर्थ, वाचस्पति, अध्यक्ष संस्कृत विभाग,
कलकत्ताविश्वविद्यालय तथा यू० जी० सी० राष्ट्रीय अध्यापक (संस्कृत)।

कविनिर्मितिषु सादृश्यम्

जगतीह प्रत्यकस्यैव वस्तुनः स्वातन्त्र्यं विद्यते। ब्रह्मणा सृष्टेऽस्मिन् संसारे प्रत्येकमेव पदार्थजातं पदार्थान्तरात् भिन्नम्। स्वरूपतो भिन्नानामपि तेषां पदार्थानां मध्येऽन्तरान्तरा किमपि प्रकृतिगतं सादृश्यं प्रतिभासमानं भवति। महाकविनिबन्धानां विषयेऽपि परिलक्ष्यते तादृशी स्थितिः। तथाहि पूर्वसूरिभिः क्षुण्णवर्त्मना सञ्चरमाणानामुत्तरकालिकानां कवीनां नाट्यकाराणाञ्च कृतिषु तेषां पूर्वकालिकविनिर्मितानां कविकृतीनां प्रच्छाया परिलक्ष्यते। तथाच वाणीवरपुत्रः कविकुलललामभूतः श्रीकालिदासः स्वप्रतिभाप्रभया संस्कृतसाहित्याकाशं समुद्भासयन्नपि तत्पूर्वसुरीणां वाल्मीकिव्यासाश्वघोषभासप्रमुखानां प्रभावमतिक्रमितुं नालम्। सर्वेषामेव काव्यनाटकप्रणेतॄणां रचनासु पूर्वसूरीणां प्रभावो नितरामालोक्यते। एवं विविधेषु महाकविनिबन्धेषु क्वचिद् भावसाम्यं क्वचिदर्थसाम्यं क्वचिद्वा वृत्तोपस्थापनसाम्यं भूयो भूयः सहृदयानां काव्यरसानुभवसरसे चेतसि प्रतिभासमानं भवति।

काव्यार्थसादृश्यविधावालंकारिकाणां समीक्षा

नवनवोन्मेषशालिनीं प्रतिभामुपजीव्य कवयो नाट्यकाराश्च यद्यपि नवनवकाव्यानि नाटकानि च विरचयन्ति तथापि तेषां रचनासु किमपि विस्मयावहं सादृश्यं समापतति। सादृश्यमिदं न सर्वथानुकरणमिति न दोषावहं महाकविनिबन्धेषु प्रायेणैतादृशसादृश्यस्य विद्यमानत्वात्। कवीनां नाट्यकाराणाञ्च कृतिषु सम्भवदेतादृशं सादृश्यमेव संवादनाम्नाभिहितं ध्वनिकारेण। तथाचोक्तं तेन—"संवादो हि काव्यार्थस्योच्यते यदन्येन काव्यवस्तुना सादृश्यम्"[1] इति। तादृशश्च संवाद: प्रतिविम्बवदालेख्यप्रख्यवत्तुल्यदेहिवदिति त्रिविधो भवितुमर्हति। तथोक्तं ध्वनिकृता—

> "संवादो ह्यन्यसादृश्यं तत् पुनः प्रतिविम्बवत्।
> आलेख्याकारवत्तुल्यदेहिवच्च शरीरिणाम्[2]॥

---

1. ध्वन्या, पृ० 595
2. ध्वन्या, 4-12

जगत्यस्मिन् बिम्बप्रतिविम्बयोर्यथा सर्वथैकरूपत्वं तथैव द्वयोः कविकर्मणोर्यत्र सम्पूर्णाभिन्नत्वं तथैव प्रतिविम्बवत् संवाद इति समुन्नेयम् । सममेवाभिमतं प्रतिपादितं राजशेखरेण । तथाचोक्तं तेन स्वकृते काव्यमीमांसाग्रन्थे—

"अर्थः स एव सर्वो वाक्यान्तरविरचना परं यत्र ।
तदपरमार्थविभेदं काव्यं प्रतिविम्बकल्पं स्यात्[1] ।।

यत्रार्वाचीनेन कविना प्राचीनकविकृतेः किमपि परिवर्तनं विधाय किञ्चदभिनवत्वमानेतुं कृतप्रयासेन भूयते तत्रैव सम्भवति आलेख्यप्रख्यवत् संवादः । संवादप्रकारेऽस्मिन् कविरात्मनः प्रतिभाप्रकर्षात् मौलसृष्टेः कोऽपि संस्कारः समादधाति । एतदेवाभिप्रेत्य आलंकारिकेण राजशेखरेणोक्तम्—

"कियतापि यत्र संस्कारकर्मणा वस्तु भिन्नवद् भाति ।
तत् कथितमर्थचतुरैरालेख्यप्रख्यमिति[2] ।।"

अस्मिन्नालेख्यप्रख्यसंवादे अनुकार्यानुकारयोर्वैलक्षण्ये किञ्चिद् भासमानेऽपि सादृश्यबुद्धिर्देदीप्यते एव ।

संसारेऽस्मिन् रम्याकृतिद्वयस्य साम्ये प्रतिभासमानेऽपि न कस्या अप्याकृतेः सौन्दर्यहानिर्भवति । एवं ययोः कविकर्मणोर्वाह्याकृतिगते सादृश्ये परिदृश्यमानेऽपि रमणीयतारूपान्तः प्रकृतिगतं वैचित्र्यं सुतरामनुभूयते तत्रैव तुल्यदेहिवत् संवादः सम्भवतीत्यालंकारिकाणां समीक्षा । तथोक्तं राजशेखरेण—

"विषयस्य यत्र भेदेऽप्यभेदबुद्धिर्नितान्तसादृश्यात् ।
तुल्यदेहितुल्यं काव्यं वध्नन्ति सुधियः कवयः[3] ।।"

सुन्दरीणां रमणीनां मुखच्छायायां पूर्णचन्द्रस्य सुषमा समालोक्यते । तथापि तासां मुखकान्तिः पूर्णचन्द्रद्युतेर्निरर्थकमनुकरणमिति न कस्यापि बोधो जायते । यतो रमणीनां शशिच्छायमुखावयवस्यान्तर्विलसति पृथक्शरीरावच्छिन्नस्यात्मनो लीलावैचित्र्यम् । तथाच ध्वनिकारेणोक्तम्—

"आत्मनोऽन्यस्य सद्भावे पूर्वस्थित्यनुयाय्यपि ।
वस्तु भातितरां तन्व्याः शशिच्छायमिवाननम्[4] ।।"

त्रिविधेष्वेषु संवादेषु प्रथमद्वितीययोः सर्वथा हेयत्वं तृतीयस्य चोपादेयत्वं प्रतिपादितं ध्वनिकृता । राजशेखरस्य मते तु प्रथमं सादृश्यमेव परिहरणीयम् द्वयमन्यद् ग्रहणयोग्यम् । पदार्थरूपाणां वस्त्वन्तरसदृशानां काव्यवस्तूनां कविनिर्मितिनाञ्च नास्त्येव दोष इति प्रतिपादयितुं ध्वनिकारेणोक्तम्—

"अक्षरादिरचनेव योज्यते यत्र वस्तुरचना पुरातनी ।
नूतने स्फूरति काव्यवस्तुनि व्यक्तमेव खलु सा न दुष्यति[5] ।।"

---

1. का० मी०, पृ० 241
2. का. मी, पृ०–243.
3. का, मी, पृ०–244.
4. ध्वन्या, 4:14.
5. ध्वन्या, 4:15.

राजशेखरेणापि कवीनां काव्ये प्रतिभासमानस्य सादृश्यस्य समीक्षणं कृत्वैवमुपसंहृतम्—

"नास्त्यचौरः कविजनो नास्त्यचौरो वणिग्जनः ।
स निन्दति विना वाच्यं यो जानाति निगूहितुम्[1] ।।"

अत्रेदमवधेयं यत् पूर्ववर्तिनो महाकवयस्तथा नाट्यकारो भट्टनारायणः सर्वे एव स्वस्वकविकर्मणि नाट्यनिर्मितिषु वा स्वतन्त्राः । तेषां सर्वेषां काव्यसृष्टिः सहृदयहृदयाह्लादं नितरां विदधाति । तत्र नाट्यकारस्य भट्टनारायणस्य वेणीसंहारे पूर्वसूरीणां यः प्रभावः समापतित इव प्रतिभाति स न भट्टनारायणस्यापकर्षाधायकः । विषयेऽस्मिन राजशेखरस्योक्तिरवधारणीया—

"शब्दार्थोक्तिषु यः पश्येदिह किञ्चन नूतनम् ।
उल्लिखेत् किञ्चन प्राच्यं मन्यतां स महाकविः[2] ।।"

उक्तञ्चापि ध्वनिकृता—

"दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः[3] ।।"

भासस्य प्रभावः

(क) संस्कृत नाट्यरचयितृषु भासस्य प्राचीनत्वं बहुभिः समीक्षकैरभ्युपगतम् । विंशशताब्दाः प्रथमे पादे (खृ. 1909-1911) गणपतिशास्त्रिणाविष्कृतानि त्रयोदशरूपकाणि भासरचितत्वेन प्रथन्ते । तेषु त्रयोदशसु रूपकेषु दूतवाक्यं कर्णभारम् दूतघटोत्कचम् मध्यमव्यायोगः पञ्चरात्रम् ऊरुभङ्गम् इति षट् रूपकाणि महाभारतवृत्तमेवाधारीकृत्य विरचितानि यथा वेणीसंहारं महाभारतवृत्तमवलम्ब्य विनिर्मितम् ।

कविप्रकृतिभेदनिबन्धनो हि काव्यसृष्टिप्रभेदः । भिन्नस्तावद् भासभट्टनारायणयोः स्थितिकालः, भिन्ना तयोः कविप्रकृतिः, स्वतन्त्र चोभययोर्नवनवोन्मेषशालिनी नाट्यनिर्माणक्षमा प्रतिभा । काव्यसृष्टौ विलक्षणतया प्रतिभासमानायामपि कदाचित्तयोः रचनासु किमपि विस्मयावहं सादृश्यं दृक्पथमेति । वेणीसंहारे भट्टनारयणो नाट्यकारस्य भासस्य प्रभावमतिक्रमितुं सर्वथा न समर्थ इत्युभयोरेव नाट्यकारयोः किञ्चित् कल्पनासादृश्यं तथा वर्णनसादृश्यं तयोर्नाट्यकर्मसु परिप्राप्यते ! उभयोरेव नाट्यकारयोः नाट्यनिर्मितिषु प्राप्यमाणस्य सादृश्यस्य सामासिकं चित्रमेकं चित्रयितुमत्र क्रियते प्रयत्नः ।

दूतवाक्ये कौरवपाण्डवयोर्विवादनिरसनार्थं श्रीकृष्णस्य दौत्यं वर्णितम् । तथोक्तं काञ्चुकीयेन—"एष खलु पाण्डवस्कन्धावाराद् दौत्येनागतः पुरुषोत्तमो नारायणः[4] ।" वेणीसंहारेऽपि श्रीकृष्णस्य दौत्यमुल्लिखितमास्ते । तथाचोल्लिखितं नाट्यकारेण सूत्रधारसंलापरूपेण—"मारिष ननु सर्वमेवेदानीं प्रतिहतममङ्गलं स्वयं

1. का. मी, पृ–242.
2. का.मी., पृ-241.
3. ध्वन्या, 4:4.
4. दूतवाक्यम्, पृ- 90

प्रतिपन्नदौत्येन सन्धिकारिणा कंसारिणा[1] ।" दूतरूपेणागतः श्रीकृष्णः क्रूरमतिना दुर्योधनेन संयन्तुमारब्धः विश्वरूपमास्थितश्च । तद्यथा दूतबाक्ये—

"दुर्योधनः— ....दूतसमुदाचारमतिक्रान्तः केशवो बध्यताम् । कथमशक्ताः । दुःशासन ! न समर्थः खल्वसि ।

करितुरगनिहन्ता कंसहन्ता स कृष्णः
पशुपकुलनिवासादानुजीव्यानभिज्ञः ।
हृतभुजवलवीर्यः पार्थिवानां समक्षं
स्ववचनकृतदोषो बध्यतामेष श्रीघ्रम् ॥
....

वासुदेवः— कथं बद्धुकामो मां किल सुयोधनः । भवतु, सुयोधनस्य सामर्थ्यं पश्यामि । (विश्वरूपमास्थितः)[2] ।"

सममेव चित्रमुपलभ्यते वेणीसंहारे । तथोक्तं कञ्चुकिना—"पाण्डवपक्षपातामर्षितेन सुयोधनेन संयन्तुमारब्धः । ततः स महात्मा दर्शितविश्वरूपतेजः संपातमूर्छितमवधूय कुरुकुलमस्मच्छिविरसन्निवेशमनुप्राप्तः[3] ।।"

वेणीसंहारस्य तृतीयाङ्के चित्रितं राक्षसमिथुनस्य संलापदृश्यम् ऊरुभङ्गनाटके समुपस्थापितेन सैनिकत्रयस्य संलापदृश्येन सह सामञ्जस्यं विभर्ति । उभयत्र हि बीभत्सरसस्योपस्थापनेन कुरुक्षेत्ररणाङ्गणस्य भयावहता संसूचिता । द्रौपदीकेशाकर्षणावमर्षितेन मध्यमपाण्डवेन भीमसेनेन दुर्योधनस्योरुभङ्ग एव उरुभङ्गनाटकस्य मूलमुपजीव्यभूतम् । वेणीसंहारनाटकेऽपि प्रियाया अवमानमसहिष्णुणा भीमसेनेन दुर्योधनस्योरुभङ्गार्थं विहिता प्रतिज्ञा परिपुरितेति दृश्यते । दूतघटोत्कचनाटके पुत्रशोकातुरस्यार्जुनस्य जयद्रथबधार्थं प्रतिज्ञा समुल्लिखिता । तथोक्तं धृतराष्ट्रेण—

"अद्याभिमन्युनिधनाज्जनितप्रकोपः
....
पार्थः करिष्यति तदुग्रधनुः सहायं
शान्तिं गमिष्यति विनाशमवाप्त लोकः[4] ।।"

दूतघटोत्कचे धृतराष्ट्रगान्धार्य्योः संलापे अर्जुनस्य सा दारुणा प्रतिज्ञा सुस्पष्टा । वेणीसंहारे तु पुत्रस्यासन्न विनाशशङ्काकुलिताया जयद्रथजनन्याः संलापरुपेण समुपस्थापिता अर्जुनस्येयं प्रतिज्ञा । तद्यथा—

---

1. वेणी, प्रथमोऽङ्कः, पृ-12
2. दूतवाक्यम्, पृ- 40
3. वेणी, प्रथमोऽङ्कः, पृ-22-23.
4. दूतघटोत्कचम्, श्लोकः—5.

"माता—अज्ज कखु पुत्तवहामरिसुद्दीविदेण गण्डीविणा अणत्थमिते दिवहणाहे तस्स वहो पडिण्णादो[1]।" भाविवैधव्यमनुमानयन्त्या दुःशलाया मानसिकी अवस्था नाटकद्वयस्य स्वल्पेऽपि परिसरे समानयैव रीत्या चित्रिता।

प्रायेण सर्वेषु भासनाटकेषु सूत्रधारसंलापमुखेन परवर्तिपात्रप्रवेशः सूचितः। तथाहि स्वप्नवासवदत्तायां—

"भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः ।
धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः[2] ।।" इत्यनेन सूत्र—

धारवाक्येन मञ्चे वासवदत्ता-यौगन्धरायण-भटप्रमुखानां प्रवेशः सूचितः। कर्णभारनाटके

"संग्रामे तुमुले जाते कर्णाय कलिताञ्जलिः।
निवेदयति सम्भ्रान्तो भृत्यो दुर्योधनाज्ञया[3] ।।" इति

सूत्रधारवाक्यादनन्तरं प्रविष्टो दुर्योधनस्याज्ञां निवेदयन् भृत्यः। पञ्चरात्रे—"यज्ञो दुर्योधनस्यैष कुरूराजस्य वर्तते"[4] इति विज्ञाप्य प्रस्थिते हि सूत्रधारे कुरूराजस्य यज्ञसमृद्धिं प्रशंसयन्तो ब्राह्मणास्त्रयः प्रविशन्ति। बालचरितेऽपि "द्रष्टुं हरिं वृष्णिकुले प्रसूतमभ्यागतो नारद एष तूर्णम्[5]" इति सूत्रधारसंलापमुखेन देवर्षेर्नारदस्यागमनं सूचितम् । एवमभिषेक-प्रतिमा-नाटकचारुदत्त-प्रतिज्ञायौगन्धरायाणदिष्वपि परिलक्ष्यते तादृशी स्थितिः। परभाविना नाट्यकारेण भट्टनारायणेनापि समनुसृतः स एव पन्थाः। तथा च वेणीसंहारे "अये एष खलु वासुदेवगमनात् कुरुसन्धानममृष्यमानः…………भीषणभ्रुकुटिरापिबन्निव नः सर्वान् दृष्टिपातेन सहदेवेनानुगम्यमानः क्रुद्धो भीमसेन इत एवाभिवर्तते। "तन्न युक्तमस्य पुरतः स्थातुम्।…………"[6] इत्यादिना वाक्येन भीमसेनस्यागमनं विज्ञाप्य निष्क्रान्ते हि सूत्रधारे मञ्चे प्रविशति सहदेवानुगम्यमानो यथानिर्दिष्टो भीमसेनः।

मृतानात्मीयजनानुद्दिश्य निवापाञ्चलिदानं शास्त्रविहितं कर्म । विषयस्यास्योल्लेख उभयोरेव नाट्यकारयो रचनासु संलक्ष्यते। तथाचोक्तं द्वितीयब्राह्मणेन पञ्चरात्रनाटके—

"अवनतविटपो नदीपलाशः
पवनवशाच्चलितैकपर्णहस्तः।
दवदहनविपन्नजीविताना-
मुदकमिवैष करोति पादपानाम्[7] ।।"

---

1. वेणी, द्वितीयोऽङ्कः, पृ० 49
2. स्वप्नवा, 1 : 2
3. कर्णभारम्, श्लोकः 2
4. पञ्चरात्रम्, 1 : 2
5. वसलचरितम्, 1 : 2
6. वेणी, प्रथमोऽङ्कः, पृ० 10
7. पञ्चरात्रम्, 1 : 17

पलाशवृक्षोऽत्र पत्ररुपं हस्तं प्रसार्य्य दावदहनदग्धेभ्यः पादपेभ्यो निवापाञ्चलिं प्रदाय पुत्रकृत्यं समाचरतीव वर्णितं भासेन। अस्यानुरूपो भावो वेणीसंहारे परिप्राप्यते। तथाच पितृनिधनवार्तामाकर्ण्य जीवितं विनाशयितुकाममश्वत्थामानमुद्दिश्य कृपाचार्येण मन्त्रितम्········" वत्स, यावदयं संसारस्तावत् प्रसिद्धैवेयं लोकयात्रा यत् पुत्रैः पितरो लोकद्वयेऽप्यनुवर्तनीया इति। पश्य—

"निवापाञ्जलिदानेन केतनैः श्राद्धकर्मभिः।
तस्योपकारे शक्तस्त्वं किं जीवन् किमुतान्यथा[1] ॥"

एवमन्यत्रापि भावगतं सादृश्यं नितरामालोक्यते उभयोरेव कविवरयोर्नाट्यकृतिषु। सर्वेषामेतेषां सविस्तरविश्लेषणेन प्रबन्धकलेवरवृद्धिप्रसङ्गो जायेतेति केवलं सदृशा भावाः समुद्ध्रियन्ते—

(1) "भीमस्य कोपशिखिना युधि पार्थपत्रि—
चण्डानिलैश्च कुरुवंशवनं विनष्टम् ॥"[2]
= क्रोधज्योतिरिदं महतकुरुवने यौधिष्ठिरं जृम्भते[3]।

उभयत्र पाण्डवस्य (एकत्र भीमस्यापरत्र युधिष्ठिरस्य) क्रोधे बह्नेरारोपः कौरवेषु च वनस्यारोपः कृतः।

(2) देवेन्द्रातिकरा निवातकवचा नीताः क्षयं लीलया[4]।
= निवातकवचोद्धरणनिष्कण्टकीकृतामरलोकः[5]।
उभयत्रार्जुनकर्तृकनिवातकवचबधवृत्तान्तः समुल्लिखितः।

(3) वासुदेवः— ········किं ते भूयः प्रियमुपहरामि[6]।
= कृष्णः—········तत् कथय महाराज, किमस्मात् परं समीहितं सम्पादयामि[7]।

(4) शशाप कालविफलान्यस्त्राणि ते सन्त्विति[8]।
= निर्वीर्यं गुरुशापभाषितवशात् किं मे तवेवायुधम्[9]।
श्लोकांश-द्वितयेऽस्मिन् कर्णाय परशुरामकर्तृकाभिशापदानकथा समुपात्ता।

(5) किं मेघा निनदन्ति वज्रपतनैश्चूर्णीकृताः पर्वताः।
निर्घातैस्तुमुलस्वनप्रतिभयैः किं दार्यते वा मही।

1. वेणी, 3 : 18
2. दूतवाक्यम्, श्लोकः 14
3. वेणी, 1 : 24
4. दूतवाक्यम्, श्लोकः 32
5. वेणी षष्ठोऽङ्कः, पृ० 159
6. दूतवाक्यम्
7. वेणी षष्ठोऽङ्कः, पृ० 168
8. कर्णभारम्, श्लोकः 10
9. वेणी, 3 : 35

कि मुञ्चत्यनिलावधूतचपलक्षुब्धोर्मिमालाकुलं ।
शब्दं मन्दरकन्दरोदरदरी: संहत्य वा सागर:[1] ॥

=मन्थायस्तार्णवाम्भ: प्लुतकुहरचलन्मन्दरध्वानधीर:
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंङ्घट्टचण्ड: ।
कृष्णाक्रोधाग्रदूत: कुरुकुलनिधनोत्पातनिर्घातवात:
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताड्यतेऽयम्[2] ॥

ऊरुभंङ्गे भीमदुर्य्योधनयो गदायुद्धस्य भयङ्करता यथा वर्णिता तथैव वेणीसंहारे समरदुन्दुभिध्वने: । उभयत्र भयङ्करतातिशयप्रतिपादनार्थं समुद्रमन्थनवृत्तं समुपात्तम् ।

(6) यस्मिंश्चण्डगदाभिघातजनित: शब्द: समुत्तिष्ठति[3] ।
=चञ्चद्भुजभ्रमितचण्डगदाभिघात[4] ......।

श्लोकांशद्वयेऽस्मिन् "चण्डगदाभिघात" इति शब्दसादृश्यं विशेषतो लक्षणीयम् ।

(7) हत्वा रावणमाहवेऽद्य तरसा मद्बाणवेगार्दितं
कृत्वा चापि विभीषणं शुभमतिं लङ्केश्वरं साम्प्रतम् ।
तीर्त्वा चैवमनल्पसत्त्वचरितं दोर्भ्यां प्रतिज्ञार्णवं
लङ्कामभ्युपयामि बन्धुसहित: सीतां समाश्वासितुम्[5] ॥

=तीर्णे भीष्ममहोदधौ कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्ये च याते दिवम् ।
भीमेन प्रियसाहसेन रभसात्स्वल्पावशेषे जये
सर्वे जीवितसंशयं वयममी वाचा समारोपिता:[6] ॥
अभिषेकनाटकगते श्लोके रामो यथा स्वकीयं गौरवावहं
कृत्तजातमेकत्रोक्तं वेणीसंहारनाटके तथा युधिष्ठिरेण ।

कालिदासनाट्यचिन्ताया: प्रतिबिम्बनम्

कविकुलरवे: कालिदासस्य प्रतिभाया बहुमुखीनता सर्वेषां विस्मयमावहति । परभाविन: कवयो नाट्यकाराश्च तस्य सर्वातिशायिनं प्रभावमतिक्रमितुं नालम् । भट्टनारायणस्य रचनारीतिर्यद्यापि स्वतन्त्रे एव

---

1. ऊरुभंङ्गम्, श्लोक:, 15
2. वेणी, 1 : 22
3. ऊरुभंङ्गम्, श्लोक: 16
4. वेणी, 2 : 21
5. अभिषेक:, 6 : 19
6. वेणी, 6 : 1

वर्त्मनि पदं कृतवती उभयोरेव नाट्यकारयोः कालिदासभट्टनारायणयो रचनासु किञ्चत् भावसादृश्यं वास्माकं नयनपथे समापतति ।

अभिज्ञानशकुन्तलनाटकस्य नान्दीश्लोके अष्टमूर्तेरीशस्य वन्दनं विहितं कालिदासेन। भट्टनारायणेनापि वेणीसंहारे धुर्जेटेर्वन्दनमप्याचरितम् । किञ्च उभयोरेव कविवरयोर्नान्दीश्लोकद्वितये भावसाम्यमपि सुस्पष्टम् । तथाहि "प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः[1]" इति कालिदासवर्णनं मनसि निधायेव भट्टनारायणेनोक्तम्—"सानन्दं देवताभिर्मयपुरदहने धुर्जटिः पातु युष्मान्[2] ।"

अभिज्ञानशकुन्तलस्य प्रस्तावनांशे सूत्रधारेण समादिष्टा नटी यथैवाचिरप्रवृत्तं ग्रीष्मसमयमधिकृत्य सङ्गीतकं समारब्धं तथैव वेणीसंहारेऽपि पारिपार्श्विकस्तत्कालप्रवृत्तं शरत्समयवलम्ब्य सङ्गीतकारम्भाय प्रयोजितः सूत्रधारेण । सूत्रधारः—……तदिदमेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयधिकृत्य गीयताम्[2] । सूत्रधारः………नन्वमुमेव ……शरत्समाश्रित्य प्रवर्त्यतां सङ्गीतकम्[3] ।

सर्वेषामेव नाटकानां प्रस्तावनायां कालिदासेन स्वग्रन्थकर्तृत्वमिव नाटकनामापि समुल्लिखितम् । तथोक्तं तेन मालविकाग्निमित्रे सूत्रधारसंलापरूपेण—"अभिहितोऽस्मि परिषदा श्रीकालिदासग्रथितवस्तु मालविकाग्निमित्रं नाम नाटकमस्मिन् वसन्तोत्सवे प्रयोक्तव्यमिति[4] ।" विक्रमोर्वशीये शाकुन्तले चापि समैव रीतिरनुसृतेति संलक्ष्यते । कालिदासक्षुण्णवर्त्मना विचरयता भट्टनारायणेनापि वेणीसंहारस्य प्रस्तावनायां नाटकनाम्ना सह नाटकस्य स्वकर्तृत्वमप्युद्घोषितम् । तद्यथा—"तदिदं कवेर्मृगराजलक्षणो भट्टनारायणस्य कृतिं वेणीसंहारं नाम नाटकं प्रयोक्तुमुद्यता वयम्[5] ।"

शाकुन्तले सूत्रधारसंलापमाध्यमेन पात्रप्रवेशः सूचितः । तथापि—

"तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा[6] ॥" इति

वाक्येन मृगमनुसरतो दुष्यन्तस्य प्रवेशं विज्ञापितवान् सूत्रधारः । ततश्च निष्क्रान्ते हि सूत्रधारे मञ्चे प्रविशति मृगानुसारी राजा दुष्यन्तः सशरचापहस्तः । मालविकाग्निमित्रे विक्रमोर्वशीये च समयैव रीत्या विज्ञापितः पात्रप्रवेशः । महाकवेः कालिदासस्य पदाङ्कमनुसृत्य नाट्यतत्त्वविदामनुशासनं मनसि निधाय च भट्टनारायणेनापि सूत्रधारसंलापेन संसूचिता पात्रोपस्थितिः । तथाच वेण्याम्—"अये, कथमयं वासुदेवगमनात् कुरुसन्धानममृष्यमाणः………दृष्टिपातेनापिबन्निव नः सर्वान् सहदेवेनानुगम्यमानः क्रुद्धो भीमसेन इत एवाभिवर्तते—[7]"

1. अभि० श० -1:1:
2. वेणी० 1:1·
3. अभि० श, पृ-18
4. वेणी-पृ-8.
5. वेणी-5-7.
6. अभि० श०, 1:5.
7. वेणी० पृ०. 10,

इत्यादिना वाक्येन क्रुद्धस्य भीमसेनस्य प्रवेशः सूचितः सूत्रधारेण। एवमभिधाय सूत्रधारस्य प्रस्थानादनन्तरं मञ्चे प्रविशति यथानिर्दिष्टो भीमसेनः।

उभयोरेव नाट्यकारयोः कालिदासभट्टनारायणयोः नाट्यनिर्मितीनां वैलक्षण्येऽपि उभयोरेव रचनासु समुपलब्धानां भावसादृश्यानामर्थसादृश्यानां वा कतिचन समुपस्थाप्यन्ते—

(1) वात्यासम्भ्रमेण

दारुपर्वतप्रासादमारुढ़ायाः भानुमत्याः परिश्रान्ताया यच्चित्रं समुपस्थापितं भट्टनारायणेन तत्तावत् वृक्षसेचनक्लमखिन्नायाः शकुन्तलायाःश्चित्रं स्मारयति। तद्यथा—

स्रस्तांसावैतिमात्रलोहिततलौ बाहूघटोत्क्षेपणाद्
अद्यापि स्तनवेपथुंजनयति श्वासः प्रमाणाधिकः।
वद्धं कर्णाशिरीषरोधि वदने घर्माऽम्भसां जालकं
वन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः[1] ॥

लोलांशुकस्य पवनाकुलितांशुकान्तं
त्वद्दृष्टिहारि मम लोचनवान्धवस्य।
अध्यासितुं तव चिरं जघनस्थलस्य
पर्याप्तिमेव करभोरु ममोरूयुग्मम् ॥[2]

(2) कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु[3] ॥
=कर्णः—आः का शक्तिर्वृकोदरस्य मयि जीवति दुःशासनस्य छायामप्याक्रमितुम्[4]।

(3) राजा··भो भोस्तपस्विनः। मा भैष्ट। मा भैष्ट। अयमहमागत एव[5]।
=कर्णः—...युवराज, न भेतव्यं न भेतव्यम्। अयमहमागतोऽस्मि[6]।

(5) यावद् विटपान्तरेणावलोकयामि[7]।
=अनेन लताजालेनान्तरितः श्रृणोमि तावदासां विश्रब्धालापम्[8]।

---

1. अभि॰ श॰, 1:27.
2. वेणी॰ 2:22.
3. अभि॰ श॰ 1:22.
4. वेणी, तृतीयोऽङ्कः, पृ. 80.
5. अभि. श, ३यः अङ्कः, पृ—294
6. वेणी, ३ यः अङ्कः, पृ 80
7. अभि. श., तृतीयोऽङ्कः, पृ 232
8. विक्रम—३:१.

(6) सर्वः क्वाल्ये वयसि यतते लब्धुमर्थान् कुटुम्बी
पश्चात् पुत्रैरपहृतभरः कल्पते विश्रमाय ।
अस्माकन्तु प्रतिदिनमियं सादयन्ती शरीरं
सेवाकारा परिणतिरहो स्त्रीषु कष्टोऽधिकारः ।[1]

= नोच्चैः सत्यपि चक्षुषीक्षितुमलं श्रुत्वापि नार्कर्णितं
शक्तेनाप्यधिकार इत्यधिकृता यष्टिः समालम्बिता ।
सर्वत्र स्खलितेषु दत्तमनसा यातं मया नोद्धतं
सेवास्वीकृतजीवितस्य जरसा किं नाम यन्मे कृतम् ।[2]

श्लोकद्वितयेऽस्मिन् उभाभ्यामेव कञ्चुकिभ्यां समयैव रीत्याधिकारखेदो वर्णितः ।

(7) प्रियमाचरितं लते त्वया मे
गमनेऽस्याः क्षणविघ्नमाचरन्त्याः ।
यदियं पुनरप्यपाङ्ग नेत्रा
परिवृत्तार्धमुखी मयाद्य दृष्टा[3] ॥

= उपकारि खल्विदं वात्याचक्रं सुयोधनस्य । यस्य प्रसादादयत्नपरित्यक्तनियमया देव्या सम्पादितोऽस्मन्मनोरथः[4] ।

नायककर्तृकनायिकासम्भोगविधौ विक्रमोर्वशीये यथा लतया साहायकमाचरितमिति वर्णितं तथा वेणीसंहारेऽपि वात्याचक्रेण ।

भवभूतेः प्रभावः

नीलकण्ठजातुकर्णीसुतेन प्रख्यातयशसा भवभूतिना विरचितं मालतीमाधवं महावीरचरितमुत्तररामचरितञ्चेति नाटकत्रितयं चिराय काव्यरसानुभवसरसानां सहृदयानां चेतसि चिराय आनन्दं वितनोति । नाट्यरचनायां भवभूतिः परभाविनं नाट्यकारं भट्टनारायणं बाहुल्येन प्रभावितवानिति प्रतीयते । अतो भवभूतिभट्टनारायणयोः नाट्यकृतिषु कतिचित् साम्यानि विद्युद्विलसितान्येव काव्यरसिकानां चेतसि चकासते । कविवरयोरेतयोः नाटकेषु प्राप्यमाणानां सादृश्यानां संक्षिप्तं चित्रमेकमत्रोपस्थाप्यते ।

भवभूतिविरचितं महावीरचरितं भट्टनारायणस्य लेखनीप्रसूतं वेणीसंहारमिति नाटकद्वितयं वीररसाश्रितम् । अङ्गित्वेन वीररसमुपस्थापयतापि नाट्यकारद्वयेन स्व स्वनाट्यकृतौ अङ्गत्वेन रौद्ररससन्निवेशने पक्षपातः प्रदर्शितः । रामायणकथावृत्तमुपजीव्यप्रणीतं महावीरचरितं महाभारतकथां समाश्रित्य रचितञ्च

1. वेणी, द्वितीयोऽङ्कः, पृ 35
2. वेणी, 2:1.
3. विक्रम, 1 : 16
4. वेणी द्वितीयोऽङ्कः—पृ० 85

वेणीसंहारमिति नाटकद्वयस्य ख्यातवृत्तत्वं सिद्धम् । आर्षमहाकाव्योपाख्यानामुपादानरूपेण समासादयतापि कविद्वयेन तत्तत्कथावस्तुनो नाट्योचितंविवर्धनपरिवर्तनादिकं संसाधितम् ।

उभयत्र नायकौ रामयुधिष्ठिरौ सतकुलप्रसूतौ धीरोदात्तौ च । महावीरचरितस्य नायिका सीता अयोनिसम्भवा । तथोक्तं रामलक्ष्मणाभ्याम्—"श्रुयते किलान्यदपि तत्राश्चर्यं यदयोनिजा कन्येति[1] ।" वेंणीसहारस्य नायिका द्रौपदी यज्ञवेदिमध्यसम्भवेति तस्या अपि अयोनिसम्भवत्वम् सिद्धम् । तथाचोक्तं चेटीसंलापरूपेण—"एसा वि पाञ्चालराअतणया जण्णबेदिमज्झसंभवा जण्णसेणी[2] ।"

पितृतर्पणार्थं परशुरामेण ह्लदपञ्चकं क्षत्रियरूधिरेण परिपूरितमिति पुरावृत्तस्योल्लेखो महावीरचरिते वेणीसंहारे च प्राप्यते । तथाहि महावीरचरिते जामदग्न्येनोक्तम्—"पित्र्यं तद्रक्तपूर्णह्रदसवनमहानन्दमन्दायमानम्[3] ।" वेणीसंहारेऽपि अश्वत्थाम्ना भणितम्—"देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्लदाः पूरिताः[4] ।" नाटकद्वितयस्यास्य बहुत्र एकविंशत्यवधि परशुरामेण पृथिव्याः क्षत्रियरहितकरणत्वमुल्लिखितमास्ते ।

विविधानां घटनानामुपमारूपेण बीजाङ्कुरशाखादीनामुपस्थापनं विहितं भवभूतिना । तथोक्तं विषादमापन्नस्य माल्यवतः संलाप-रूपेण—

"बीजं यस्य विदेहराजतनयायाञ्चाङ्कुरोऽपि स्वसु-
र्यात्रा तौ परिवञ्चितुं किसलयं मारीचमायाविधिः ।
शाखाजालमयोनिजाय हरणं तस्य स्फुटं कोरकाः
कोशाधीशबधोऽनुजस्य गमनं सख्यं तयोस्तेन च[5] ।।"

उपमानामेतासां समावेशेन प्रायेण सममेव वर्णनं संलक्ष्यते वेणीसंहारे कञ्चुकिसंलापे । तद्यथा—"तस्य खल्विदं निर्भर्त्सितविदुरवचनबीजस्यावधीरितपितामहहितोपदेशाङ्कुरस्य शकुनिप्रोत्साहनादिविरूढ़मूलस्य जतुगृहद्यूतविषशाखिनः सम्भूतचिरकालसंबद्धवैरालवालस्य पांचालीकेशग्रहणकुसुमस्य फलं परिणमति[6] ।"

मालतीमाधवस्य पंचमेऽङ्के श्मशानदृश्ये भवभूतिना बीभत्सरसस्योपस्थापनं विहितम् । भट्टनारायणेनापि वेणीसंहारस्य तृतीयेऽङ्के राक्षसमिथुनस्य संलापेन स एव रसः समुपस्थापितः ।

मूर्च्छितस्य माधवस्य कृते प्रियवयस्यस्य मकरन्दस्य विलापोक्तिः मुनिवेषधारिणा चार्वाकनाम्ना राक्षसेन मृषानिवेदितां भीमसेननिधनवार्तामाकर्णयतो युधिष्ठिरस्य विलापेन सह समतामेति । तथाहि विषण्णचेतसा मकरन्देनोक्तम्—

---

1. म. च, 1मः अङ्कः
2. म. च, 2यः अङ्कः, पृ—
3. वेणी, षष्ठोऽङ्कः, पृ—155.
4. वेणी, 3:33
5. म. च, 6:1.
6. वेणी, 4र्थः अङ्कः, पृ—89-90.

"आजन्मनः सहनिवासितया मयैव
मातुः पयोधरपयोऽपि समं निपीय ।
त्वं पुण्डरीकमुखबन्धुतया निरस्त—
मेको निवापसलिलं पिबसीत्ययुक्तम्[1] ॥

सममेव चित्रं प्राप्तरूपं परिलक्ष्यते वेणीसंहारे । तथाहि प्रियभ्रातरमनुस्मरता युधिष्ठिरेण विलपितम्—

"मया पीतं पीतं तदनु भवताम्बास्तनयुगं
मदुच्छिष्टैर्वृत्तिं जनयसि रसैर्वत्सलतया ।
वितानेष्वप्येवं तव मम च सोमे विधिरभू—
न्निवापाम्भः पूर्वं पिबसि कथमेवं त्वमधुना[2] ॥"

मालतीमाधवे प्राणप्रियां मदयन्तिकामुद्दिश्य मकरन्देनोक्तम्—

"रम्भोरू संहरभयं क्षमते विकार—
मुत्कम्पिनः स्तनतटस्य न मध्यभागः ।
इत्थं त्वयैव कथितप्रणयप्रसादः
सङ्कल्पनिर्वृत्तिषु संस्तुत एष दास[3] ।"

सममेव प्रणयनिवेदनमालोक्यते वेणीसंहारे । तथोक्तं दुर्योधनेन भानुमतीं प्रसादयता—

"कुरु घनोरू पदानि शनैः शनैरयि विमुञ्च गतिं परिवेषिणीम् ।
सुतनु बाहुलतोपरिबन्धनं मम निपीड्य गाढ़मुरः स्थलम्[4] ॥

आत्महननोद्यता जना रक्ताम्बरं परिधाय मृत्युमालिङ्गयामासुरिति रीतिः प्राचीनभारते प्राप्तप्रसरासीत् । रीतेरस्याः समुन्नेयत्वं संलक्ष्यते मालतीमाधवे वेणीसंहारे च । तथाच श्मशानभूमिं नीतां मालतीं निर्वर्ण्य माधवेन विलपितम्—

"न्यस्तालक्तकरक्तमाल्यवसना पाषण्डालयोः
पापारम्भवतोर्मृगीव वृकयोर्भीरुर्गता गोचरम् ।
सेयं भूरिवसोर्वसोरिव सुता मृत्योर्मुखे वर्तते
हा धिक् कष्टमनिष्टमस्तकरुणः कोऽयं विधेः प्रक्रमः[5] ॥"

---

1. मा. मा. 9:40.
2. वेणी, 6:31.
3. मा. मा. 7:2.
4. वेणी, 2:20
5. मा. मा, 5:24.

अत्र रक्तमाल्यवसनादिभिर्भूषयित्वा बधार्थं बध्यभूमिमानीता मालती । वेणीसंहारे तु भर्तृमरणात् शोकाकुला बधूः रक्ताम्बरभूषिता सहानुम्रियत इति विशेषः । तद्यथा—"एसा बीलमादा समलविणिहदं पुत्तअं सुणिअ रत्तंसुअणिवसणाड समग्गभूषण बहुत्र सह अणुमरदि[1] ।"

भवभूतिप्रणीतमुत्तररामचरितं कवेरनवद्यतमं सर्वातिशायि नाट्यकर्म । रामायणचित्रितं वियोगान्त-वृत्तं कविकल्पनाप्रभावेन मेलनात्मकतया परिणमितम् । नाटकमिदमुत्तरकालिकानां नाट्यकृतां नाट्यनिर्माणे बहुलतया सहायतामेति । परभाविनो भट्टनारायणस्य वेणीसंहारेऽपि उत्तररामचरितस्य प्रभावो दृक्पथमेति ।

उत्तररामचरितस्य रचनारीतिर्गौड़ी । समासप्रियत्वं भवभूतेः रचनाया वैशिष्ट्यमन्यतमम् । वैशि-ष्ट्यमिदं भट्टनारयणेन सर्वथा समनुसृतमिति मन्यामहे । उत्तररामचरित इव वेणीसंहारनाटकेऽपि नाट्य-कारेण दीर्घसंलापविरचने पक्षपातः प्रदर्शितः । विदूषकस्यानुपस्थितिरुभयोरेव नाटकयोः उत्तररामचरितवेणी-संहारयोरपरं वैशिष्ट्यम् ।

उत्तररामचरितस्य द्वितीयाङ्कोपस्थापिते विष्कम्भके आत्रेयीवनदेवतयोः संलापद्वारेण सीतापरित्यागा-दनन्तरवर्ति नाट्यवृत्तं विनिवेदितम् । तथाचात्र स्वर्णमयीं सीताप्रतिकृतिं पार्श्वे कृत्वा रामस्याश्वमेधयागाय प्रवर्तनम्, वाल्मीकेराश्रमे जृम्भकास्त्रेण सहजातयोर्लवकुशयोः प्रतिपालनम्, सीताविरहितमयोध्यानगरं प्रति अनागन्तुकामस्य मातृवर्गस्य अरुन्धत्या सह वाल्मीकेराश्रमे वशिष्ठनिर्दिष्टं गमनमित्यादीनि सीताविसर्जनो-त्तरकालिकानि वृत्तानि नाट्यकारेण सकौशलं दर्शकेभ्यो ज्ञापितानि । वेणीसंहारस्य द्वितीयाङ्कचित्रिते विष्क-म्भकेऽपि कञ्चुकिसंलापरूपेण भीमसेनस्य प्रतिज्ञोत्तरकालिकानि भीष्माभिमन्युप्रमुखानां निधनादीनि नाट्य-वृत्तानि समुपस्थापितानि ।

उत्तररामचरितस्य षष्ठाङ्के परिकल्पिते विष्कम्भके पुनः विद्याधरयुगलस्य संलापेन लवचन्द्रकेतोर्युद्धं वर्णितम् । समयैव रीत्या वेणीसंहारस्य तृतीयाङ्कोपस्थापिते प्रवेशके राक्षसमिथुनस्य कथोप-कथनेन कुरुक्षेत्रर-णाङ्गणस्य समरचित्रं समुपवर्णितम् । अस्त्रस्यामोघायाः शक्तेर्वर्णनमप्युभयत्र नाटके समरूपतामेति । तथाहि जृम्भकास्त्रस्य शक्तिं चित्रयता भवभूतिनोक्तम्—

"पातालोदरकुञ्जपुञ्जिततमः श्यामैर्नभो जृम्भकै-
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः ।
कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवस्तीर्यते
मीलन् मेघतड़ित्कड़ारकुहरैर्विन्ध्याद्रिकूटैरिव[2] ॥

सममेव वर्णनं यथा वेणीसंहारे—

दग्धुं विश्वं दहनकिरणैर्नोदिता द्वादशार्का
वाता वाता दिशि दिशि न वा सप्तधा सप्त भिन्ना ।
छन्नं मेघैर्न गगनतलं पुष्करावर्तकाद्यैः
....[3] ॥"

---

1. वेणी, 4र्थः अङ्कः, पृ० 88
2. उ० च, 5:14
3. वेणी, 3:8

अपराणि भावगतान्यर्थगतानि श्लोकगतानि श्लोकांशगतानि वा सादृश्यानि यथा—

भवभूतिः	भट्टनारायणः
(1) तदेतत् काकतालीयं नाम[1]	(1) फलन्ति काकतालीयं[2] ········
(2) जृम्भाजर्जरडिम्बडम्बरघनश्रीमत्कदम्बद्रुमाः[3]	(2) जृम्भारम्भप्रविततदलोपान्तजालप्रविष्टैः[4]
(3) राजानः परिपालयन्तु वसुधां धर्मे स्थिताः सर्वदा । काले सन्ततवर्षिणो जलमुचः सन्तु क्षितौ पुण्यतो···[5] ॥	(3) अवनिमवनिपालाः पान्तु वृष्टिं विधत्तां जगति जलधराली शस्यपूर्णास्तु भूमिः[6] ।
(4) गात्रेषु चन्दनरसो दृशि शारदेन्दुः[7] ।	(4) सर्वाङ्गचन्दनरसो नयनामलेन्दुः[8] ।
(5) अकलितमहिमानः केतनं मङ्गलानाम्[9] ।	(5) अकलितमहिमानं क्षत्रियैरात्तचापैः[10]
(6) तस्यानरालसाहसप्रचण्डकर्मणः पुष्करावर्तकस्तनितमांसलो वाङ्निर्घोषैः कर्णविवरमाप्याययति[11]	(6) महाप्रलयमारुतक्षुभितपुष्करावर्तकप्रचण्डघन-गर्जितप्रतिरवानुकारी मुहुः[12] ।
(7) किं करणीयमेतदधिकं श्रेयस्तदप्युच्यताम्[13]	(7) तत्कथय ·····किमस्मात् परं समीहितं सम्पादयामि[14]
(8) स्नेहात् सभाजयितुमेत्य ·····[15]	(8) समरभूमिं गत्वा सभाजयितव्या इति[16] ।
(9) को नाम पाकाभिमुखस्य[17] जन्तोर्द्वाराणि दैवस्य पिधातुमिष्टे	(9) कष्टमतिबीभत्समाचरितं दैवेन[18] ।
(10) अयं शैलाघातक्षुभितवड़वावक्त्रहुतभुक्-प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे । समन्तादुत्सर्पन्घनतुमुलहेलाकलकलः पयोराशेरोघः प्रलयपवनास्फालित इव[19]	(10) महाप्रलयमारुतक्षुभितपुष्करावर्तकप्रचण्डघन-गर्जितप्रतिरवानुकारी मुहुः । रवः श्रवणभैरवः स्थगितरोदसीकन्दरः कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः[20] ॥

---

1. मा० मा०, पञ्चमोऽङ्कः
2. वेणी, 2 : 14
3. मा० मा०, 9 : 16
4. वेणी, 2 : 7
5. मा० मा०, 10 : 25
6. वेणी, 6 : 47
7. मा० मा०, 9 : 22
8. वेणी, 5 : 22
9. मा० मा०, 2 : 9
10. वेणी, 4 : 40
11. म० च०, द्वितीयोऽङ्कः
12. वेणी, 3 : 4
13. म० च०, 7 : 41
14. वेणी, षष्ठोऽङ्कः
15. उ० च०, तृतीयोऽङ्कः
16. वेणी, द्वितीयोऽङ्कः, पृ० 28
17. उ० च०, 7 : 4
18. वेणी, चतुर्थोऽङ्कः, पृ० 107
19. उ० च०, 5 : 9
20. वेणी, 3 : 4

विंशशताब्दिकं संस्कृतनाटकम्

प्रो० रामजी-उपाध्यायः, वाराणसी

एहि सुजनगण वाणीपूजनपुण्यदिवस इह तीर्थे ।
सद इदमतिथे सदयमलंकुरू विद्याबिलसितकीर्ते ।।

पारतन्त्र्यपाशाद विमुक्तो भारतदेशो श्री जीवः विंशशताब्दे सर्वेषु प्रातिभक्षेत्रेषु अपूर्वमहिमानं लब्धवानस्ति । अस्य शताब्दस्य पारतन्त्र्य-युगेऽपि ज्ञान-विज्ञान-धुरन्धरा मनीषिणः परस्परं भावयन्तोऽन्येषां सहोत्थानपरायणानां निष्पत्ति-वैभवं संवर्धयन्ति स्म । तेषां कृतसर्वस्वमखिलभारतस्यैकीभूतात्मनो नैष्ठिक-सन्निधि-महार्णवस्य ललामभूतं रत्नमिव राजते । साहित्यमेव मानवसर्जनाक्षीराब्धौ नवनीतायते, तत्रापि काव्यं काव्येऽपि च नाट्यं शेखरीभूतम् ।

ऊनविंशशतकेऽसमप्रदेशे दीनद्विजस्य शङ्खचूडवधम्, तमिलप्रदेशे सुन्दरवीररघूद्वहस्य भोजराजाङ्कम् अभिनवराघवम् सुन्दरराजस्य स्नुषा-विजयम् आन्ध्रप्रदेशे नरसिंहस्य वासवीपराशरीयम्, उत्तरप्रदेशेऽम्बिकादत्त-व्यासस्य सामवतम्, सौराष्ट्रे शंकरलालस्य सावित्री-चरितम्, ध्रुवाभ्युदयम् गोरक्षाभ्युदयम् श्रीकृष्णचन्द्राभ्युदयम्, अमरमार्कण्डेयं च, राजस्थानप्रदेशे गोपीनाथदाधीचस्य माधवस्वातन्त्र्यम् केरलप्रदेशे राज-राजवर्मणः गैर्वाणीविजयम्, विहारप्रदेशे रामावतारशर्मणः धीरनैषधम्, महाराष्ट्रेऽप्पाशास्त्रिणो धर्मविपाकम् वङ्ग-प्रदेशे रमानाथशिरोमणैः पारिजातहरणम्, मिथिलाप्रदेशे भानुनाथदैवज्ञस्य प्रभावतीहरणम्, इत्यादिनि नाटकानि समकालिकविद्वज्जनमनोरञ्जनसामर्थ्येन दिग्दिगन्तप्रथितानि बभूवुः । ऊनविंशशतकस्य नाट्यपरम्परा विंशशताब्दे भूयोभयो पल्लविता दृश्यते । विंशशताब्दिकः प्रथमोल्लेखनीयो नाटककारः काशिराजः प्रभुनारायण-सिंहो बभूव ।

प्रभुनारायण-सिंहः

प्रभुनारायणेन कृते पार्थपाथेयाभिधे नाटके प्रस्तावनायां सूत्रधारानुसारेण कवेर्वेदर्शनसाहित्यादिविषयाणां बहुज्ञता प्रथमायते । तद्यथा—

कपिलस्य मतं पतञ्जलैः कणभुग्गोतमयोश्च कृत्स्नशः ।
निगमान् किलवेत्ति सोत्तरानपि साहित्य-समुद्रमन्दरः ।।

पार्थपाथेम्

पार्थपाथेयेऽङ्कत्रयेण पार्थस्य पराक्रमा निरूपिताः । नाटकेऽस्मिन् तस्य सुभद्रया सहपरिणयोर्वर्णितः ।

सरल-सरलाभाषा गीतात्मकछन्दांसि चात्र सविशेषं मनोहरन्ति । रंगपीठेऽर्जुनविवाहकाले विदूषकस्य नृत्यंगीतं च द्वितीयाङ्के तस्य रोदनञ्चेति मनोरञ्जकम् ।

हरिदाससिद्धान्तवागीशः

विंशशतकस्य प्रथमचरणे द्वादशोपाधिको नाट्यसम्राट् हरिदास-सिद्धान्त-वागीशः समग्रं भारतं स्वकृतिभिः प्ररोचयामास । वङ्गदेशस्य द्वितीयाकाशीति विख्याताकोटालि-पाडा उनशिया तस्य जन्मभूमिरभूत् । मधुसूदनसरस्वतीति विख्यातो मनीषी तस्य पूर्वजो बभूव । ईश्वरचन्द्रविद्यासागरात् स साहित्य-विद्यामशिक्षत ।

शैशव एव सरस्वती तस्यमुखारविन्दे सौरम्यंतेने । तस्याः प्रसादात् पञ्चदशवर्षीयः स कंसवधनाटकमष्टादशवर्षीयो जानकी-विक्रममिति नाटकद्वयं प्रणिनाय । परतस्तेन मिवारप्रतापं शिवाजीचरितं वङ्गीयप्रतापं विराजसरोजिनीति ख्यातानि नाटकानि विरचितानि । एतेषु नाटकेषु स हिन्दूनां जागरणाय प्रदीप्तिभरान् सन्देशान् विभर्तिस्म । मिवारप्रतापे स हिन्दूनात्मविवेचनं कर्तु निवेदयति तद्यथा—

(1) हिन्दुरेव हि हिन्दूनां विकृतः कुरूतेक्षतिम् ।

(2) हिन्दूभिरेव हिन्दूनां हिंसया संवृत्तोऽयं सर्वनाशो भारतस्य ।

तत्रैव देश प्रेम्णा सर्वस्वत्यागोऽपेक्षितः इति निवेदयति कविः—

स्वस्वजीवनदानेन रक्षणीयैव जन्मभूः । आदत्ते हि महद्वस्तु स्तोकत्यागेन बुद्धिमान् ॥

शिवाजीचरिते स पारतंत्र्य भृशं जगर्ह । तद्यथा—

विधर्म्यधीना ननुभारतप्रजा नदीप्रवाहं च गता मृदुर्लता ।
न तून्नतिं गच्छति निष्फलोद्यमा परानुगत्यं हि लघीयसांक्रिया ॥

मिवारे प्रतापस्य प्रस्तावनायां संस्कृतं जीवति मृतावेति विषये सूत्रधारः प्रवक्ति—

वेदादिशास्त्रनिचयस्फुटदिव्यमूर्तिः, सा वाक् किमन्यवचनादमरा म्रियेत ।
मध्याह्न सूर्यकरगो हि यदि ब्रवीति, रात्रिः किलेयमिति हन्त स एव मूढः ॥

षडङ्के नाटकेऽस्मिन् चितौड़राजः प्रतापो मानसिंहायावमाननां प्रदर्शयति । अस्मात् कारणात् तत्राकबरस्याक्रमणमाशङ्कमानः स प्रतिजानीते—

1. चित्तौ रोद्धारं यावत् सान्वया एव वयं प्रयोजने जायमाने समरे प्राणानपि प्रदास्यामः ।
2. भोजने पादपपत्रमाश्रयिष्यामः ।
3. तृणशय्यामधिशय्य यामिनीं यापयिष्यामः ।
4. वेशविलासं परिहरिष्यामः ।

युद्धं भवति । तत्र प्रतापस्य प्रियोऽश्वचेतको व्रणाभिभूतोः वर्तते । प्रतापस्तं व्यजनेनोपचरति कथयति च—

सलिले तरंगिगिरिवने तुरगोरणसङ्कटे सुनिपुणः सचिवः ।
परमः सखा विचरणे च चिरंनहिवाहनं ननु वहन्नपिमाम् ।।

शिवाजीचरितम्

दशाङ्कं शिवाजीचरितं 1945 खीष्टाब्दे विरचितम् । अस्य प्रथमाभिनयः स्वाधीनतादिवस-यात्रावसरे निष्पन्नः । लोकानां मानसे स्वातन्त्र्यलालसासंवर्धनेन नाटकमिदं प्रशंसास्पदम् । तत्र सूत्रधारो-निवेदयति येन हि साम्प्रतं सर्व एव स्वाधीनतां कामयते । वयं च तदुद्दीपनमेवप्रबन्धमभिनेतुमभिप्रेम ।

नाटकेऽस्मिन् स्वबुद्धिकौशलेन चरितनायकस्य शिवाजीराजस्य औरंगजेबादिशत्रूणां विघटनं वर्णितम् । समर्थस्वामी रामदासस्तस्मै आशीर्वदति—

तापं हर छत्रमिव प्रजानाम् । रामदासस्तदनुतस्मै छत्रं समर्पयति ।

गीतसमृद्धेयं रचना । तत्र देशोद्धारगीतानि भृशंलालयन्ति । तद्यथा—

बालको युवकः प्रौढ़ो वृद्धः मनसावचसा वपुषा शुद्धः ।
भवतु त्वरितमेकतावहः देशोद्धारे मास्तु विरूद्धः ।।
धर धर प्रहरणं चल चल महारणम् ।
कुरू भारतोद्धरणं मा भव कोऽपि विरूद्धः ।।

तत्र सूक्तिसौरभं मनोहरति । तथा हि विषमा पराधीनता पिशाची सर्वेषामेव पौरूषं ग्रसते । मनसो बलमेववीरत्वम् ।

वङ्गीयप्रतापम्

हरिदासः 1917 खीष्टाब्देअष्टाङ्कमैतिहासिकं नाटकं वङ्गीयप्रतापं विरचितवान् । कवेर्गृहएवास्य प्रथमाभिनयः उदयनसमितिसदस्यैः समापन्नः । परतोऽनेकस्थलेषु पुनः पुनरस्याभिनयः समायोजितः । नाटकेऽस्मिन् स्थानीयनवाबस्य शेरखानस्यात्याचाराः, अकबरस्यादेशेन तत्र मानसिंहस्याक्रमणं, जहांगीरेणादिष्टं मानसिंहस्य पुनराक्रमणं हिन्दूशासकानां पराभवश्च सुनिपुणं वर्णितानि ।

भारतीयजनता दासतां दूरीकर्तुं प्रोत्साह्यते कविना स्वगानेन तथा हि—

हे सन्तान ! तव जननी धनजनसमन्विता केन अनाथिनी । परमुखे दृष्टिकरी परद्वारे भिक्षाकरी यथा दीनहीन-नारी जीविता विषादिनी ।

रणेन्द्रनाथ गुप्तः

हरिश्चन्द्रचरितम्

वैश्यवंशावतंसो वङ्गदेशीयो रणेन्द्रनाथ गुप्तः 1911 खीष्टाब्दे पञ्चाङ्कं हरिश्चन्द्रचरितं नाम नाटकं

विरचितवान् । नाटकमिदं हरिश्चन्द्रस्य पौराणिकीं कथामुपजीवति । तथापि भूयः प्रतिसंस्कृतमत्र नाटकीयं वृत्तं लोकान् चारित्रिकाभ्युत्थानाय प्रकामं प्रोत्साहयति ।[1]

पञ्चाननतर्करत्नः

अमरमङ्गलं नाम नाटकं वङ्गदेशीयो भट्टपल्लीवास्तव्यः पञ्चाननतर्करत्नोरचितवान् । सप्तति-वर्षीयः स स्वजन्मभूमिं परित्यज्य काशीमुपवस्तुमाजगाम । विद्यार्णवे निष्णातः स दाक्ष्येण समाज-सेवां प्रारभत । स वैदेशिकशासनमेव धर्मोन्मूलकममन्यत । अतएव वैदेशिकशासनं विघटितुं सोऽनुशीलनीतिख्यातां क्रान्तिकारिसंस्थामस्थापयत् । 1907 खीष्टाब्देऽलीपुर-बम्बविस्फोट-काण्डे स वन्दीकृतः ।

नैकमहाकाव्यानां टीकाग्रन्थानां भाष्याणां च रचयिता पञ्चाननः कलङ्कमोचनमित्यपरं नाटकं प्रणिनाय ।

अमरमङ्गलम्

अमरमङ्गले राणाप्रतापस्य पुत्रस्यामरसिंहस्य मुगलराजेन विरोधे सति विजयोपलब्धिर्वर्णिता । अत्र मुद्राराक्षसदिशा कूटनीतिः, युद्धभूमावपि स्त्रीणां साह्यं, रक्तपातं विनापि चितौर-विजय इति नाटकीयकलाया विरलोत्कर्ष इतिवृत्तविधाने सुनिपुणमुपलब्धः । भरतवाक्येन कविर्लोकेभ्यो जीवनादर्शं निर्दिशति—

सन्तु स्वधर्मनिरता मनुजा समस्ताः, प्रीतिं सजातिषु भजन्तु विहाय मायाः ।
सम्पूजयन्तु जननीमिव जन्मभूमिं, भूपाल-भक्तिनिरताश्च चिरं भवन्तु ॥

कलङ्कमोचनम्

कलङ्कमोचननामके सप्ताङ्के नाटके राधाकृष्णयोर्दाम्पत्यं सगुणमिति निरूपतिम् । तदनुसारेण—

कलङ्कःकल्पनामात्रं श्रीराधायां तदात्मनि । नित्यतेजसि मार्तण्डे तथा दर्पणकालिमा ॥
राधायाः सतीत्वं तस्याः शतच्छिद्रघटे जलभरणेन प्रमाणितम् ।

नाटकेऽस्मिन् भारतस्य स्वातन्त्र्योत्थान-समीहया पथप्रदर्शनेन लोकाः प्रोत्साहिताः । तदनुरूपं भरत-वाक्यमस्ति श्रौतस्मार्तचिरन्तनाध्वनिरता भूयासुराशु द्विजा, मा भूवन्नपरैर्नरूपचितद्वन्द्वाः प्रभुत्वाशया । स्वाराज्यं श्रुतिधर्मकर्मकृतिभिः प्राज्यं लभन्तां प्रजाः, शत्रूद्भावितजातिवैररहितं भूयादिदं भारतम् ॥

कालीपदतर्कालङ्कारः

काश्यपकविरित्युपनाम्ना विख्यातो नाटककारः कालीपदः 1888 खीष्टाब्देऽधुनावाङ्गलादेशस्य फरीदपुर-मण्डले कोटालिपारा-उनशिया ग्रामे जातः । आनुवंशिकपाण्डित्यं तस्य कुलम् । षोडशताब्द्यां तस्य पूर्वजो

1. पुरस्तकस्य प्रतिः कलकत्तानगरे संस्कृत कालेजस्य पुस्तकालये वर्तते ।

मधुसूदन-सरस्वती बभूव। तस्य ज्येष्ठभ्रातासीत् हरिदास-सिद्धान्तवागीशः। पित्रा सकृत् प्रतोद्यमानोऽपि कालीपदो बाल्य आङ्गलभाषामध्येतुं रुचिं न चकार। उच्चशिक्षां लब्धुकामः स भट्टपल्लीं समागत्य शिवचन्द्रसार्वभौमस्य शिष्यतां जग्राह। कालीपदो न केवलं नाटककारोऽपितूच्चकोटिकोऽभिनेताप्यासीत्। तेन जन्मभूमावपिनैकनाटकान्यभिनातानि। आजीवनमध्यापनं तस्यार्षवृत्तिं प्रकटयति। वर्धमानविश्वविद्यालयत 1972 खीष्टाब्दे डी०लिड्उपाधिः शङ्कराचार्येण तर्कालंकारोपाधिस्तस्मैदत्तः। कालीपदस्य बहुमुखी प्रतिभा साहित्य-दर्शन-धर्म-शास्त्रादिविषयेषु दृश्यते। एतान् विषयानधिकृत्य तेन बहवो मौलिकग्रन्था निबद्धाः। सम्पादनकला-पारंगतः स प्रणवपारिजातपत्रिकायाः संचालकोऽभवत्। यावज्जीवं स संस्कृत-साहित्य-परिषद्त-पत्रिकायाः सम्पादनमकरोत्।

कालीपद-विरचितं नाटकचतुष्टयं विलसति-माणवकगौरवं, प्रशान्तरत्नाकरं, नलदमयन्तीयम् स्यमन्तकोद्धार-व्यायोगश्च।

माणवकगौरवम्

माणवकगौरवस्याभिनयः संस्कृतपरिषदादेशेन निष्पादितः। सप्ताङ्केऽस्मिन्नाटके प्राचीन गुरुकुलानामादर्शशिक्षणपद्धतिः, उदात्तमनुशासनम्, आचार्याणां शिष्यान् प्रति हार्दिक्यं कल्याणाचारणं च प्रकल्पितानि। आचार्यो धौम्य आत्मानं विवेचयति—

नारिकेल समाकारा गुरवः परुषा बहिः।
अन्तः सुमधुराह्येते परिणामसुखाः शिवाः॥

शिष्याणां कथानक उपमन्योर्गोचारणमन्धत्वं, कूपपतनं च वर्णितानि। अनन्तरं सोऽश्विद्वयप्रसादेन पुनर्दृष्टिं प्राप्नोति। नाटकान्ते भारतस्य गुरुभरः स्मारितः। तद्यथा—सर्वेषां नयशिक्षणे गुरुपदं यायात् सदाभारतम्। अत्र गुरुभक्तिरपि पात्रीयति। तस्या गायनं वर्तते—

अभयागुरुपदसेवा।
"यो गुरुमञ्चति कुशलं स भजति" इत्यादि।

प्रशान्तरत्नाकरम्

प्रशान्त-रत्नाकरस्य प्रथमाभिनयः संस्कृत-साहित्यपरिषदः सदस्यैरायोजितः। नाटकस्य प्रमुखनायको रत्नाकरो दारिद्र्याभिभूतो यौवने दस्युः परतआदिकविरितिख्यातः। शरीरेण रत्नाकरो महामल्लः सदाशयः प्राकाशत।

एकदा स्वर्णालङ्कारमण्डिता काचिद् युवती, केनचित् पाटच्चरप्रमुखेण लुण्टिता तदनु तस्य कामवासनां पूरयितुं प्रेरिता। एतत्सर्वं दृष्ट्वा प्रचण्डरूपो रत्नाकरस्तामरक्षत्। सा महिला स्वकीयमाभरणं रत्नाकाराय दातुमैच्छत्। किन्तु तेन न स्वीकृतम्। केवलं तस्या आशीरकामयत—

भवत्या मातृतुल्याया नापरं किञ्चिदर्थये।
मनस्तापविनाशार्थमाशीरेव प्रदीयताम्॥

मल्लिलाप्रहारको दस्युर्वीरबलनामा जात्या ब्राह्मणो दरिद्रो विपत्तिग्रस्तोऽभवत् । धनाभावेन चिकित्सा-भोजनाद्यभावात् परिवारे तस्य पत्नी मृता, माता च मरणासन्ना बभूव । तस्याः कष्टस्य निबारणाय स विवश एव दस्युवृत्तिं स्वीचकार । रत्नाकरस्यात्मभावं विज्ञाय तं स्वदस्युमण्डलस्य नेतारं कृतवान् । तदा रत्नाकरेण दस्युमण्डलं निर्दिष्टम्—

गर्वं खर्वयत प्रभावजनितं वित्तेश्वराणां मुहुः ।
सर्वेषां समतास्तु भूमिबलये दैन्यं लयं गच्छतात् ।
एको भूरिविलासभोगनिरतोभोज्यं विना चापरः
प्राणैरेव वियुज्यते कथमिदं वैषम्यमालोक्यताम् ॥

तत्र तेन स्थापिता रत्नपुरवसतिर्यत्र सर्वेजनाः परस्परं भावयन्तः सुखिनो भवन्तु ।

तस्य प्रदेशस्य राजा कामेश्वरः प्रजापीडकोऽभवत् । कामेश्वरस्य राजकोशो रत्नाकरदस्यु-संघेन लुण्टितः । तदनुगुप्तचरात् चौर्यस्य रहस्यं विज्ञाय कामेश्वरः रत्नाकरस्य पितरंच्यवनं तस्य पुत्रमात्रेयं च निगृहीतवान्प्रपीडितवांश्च । एतद्वृत्तं विज्ञाय रत्नाकरः सत्वरं तौ मोचितवान् ।

एकदा कौमुदी-महोत्सवे नौकाविहारक्षणे कामेश्वरो रात्रौ रत्नाकरेण प्रतिशोधभावनया वन्दीकृतः स्वगृहसमीपगलपाशीकृतश्च । स तु प्रातर्हन्तव्य इति दस्युना निश्चितम् । रात्रौ च्यवनः स्वपुत्रस्य कुकृत्यानि स्मारं स्मारं द्रवीभूतः स्वयमेवात्मघातं कर्तुं निश्चयमकरोत् येन तस्य पुत्रोऽशुभं विहाय शुभपथं चरेत् । स्वाभिप्रायं स्वरक्तेन लिखित्वा, कामेश्वरं मोचयित्वा च तस्य कण्ठपाशेनात्मानं जघान । पत्रे लिखितमासीत्—

तव सत्पथलाभाय राज्ञः संरक्षणाय च ।
आत्मघातमहापापमङ्गीकृत्य व्रजाम्यहम् ॥

रत्नाकरपरिवारस्य सर्वे सदस्या अस्यां स्थितौ कालकवलिताः भूताः । तद्यथा रत्नाकरो वर्णयति—

आसीद्देवसमः पिता स सहसा यातो दिवं स्वेच्छया
माता तेन सहैव पुण्यपरमा शोकेन मृत्युं गता ।
आसीत् प्राणसमः सुतः स विधिना नीतः क्षयं निर्दयं
तच्छोकेन विषं निपीय निभृतं पञ्चत्वमाप्ता प्रिया ॥

यद्यपि रत्नपुरस्य प्रच्छन्नकोशागारे प्रजानामुपभोग्यानि सामग्री वर्षशतजीवनयात्रायै पर्याप्तासीत् तथापि लोका आदिष्टाः —

पर्वतप्रान्तवर्तिषु नदीसन्निहितेषु क्षेत्रेषु यथायोग्यकृष्यादि कर्मसु व्यापारयितव्याः । एवं कर्मव्यासक्त-चेतसां दोषलेशोऽपि नात्मनि पदं कुर्वीत । सजलप्रपातमरणमैच्छत् किन्तु सुमत्या निवारितः । स तया शान्ति-निकेतनं प्रति निवेशितः । तत्र नारदाद राममन्त्रं गृहीत्वा तस्यजपेन प्रत्यक्षं राममपश्यत् । भरतवाक्यमस्ति—

"सर्वंजगन्नन्दतु साम्यलाभात् ।" इति पञ्चाननतर्करत्नेन नाटकेऽस्मिन् नारीप्रतिष्ठानुपमं संकल्पिता—

स्त्रीमातृरूपा स्तनदुग्धदायिनी
सर्वं जगत्पाति शुभानुकम्पया ।
भक्त्या स्त्रियो यत्र भवन्ति पूजिताः
सर्वे सुरास्तत्र वहन्ति तुष्टताम् ॥

नाटकेऽस्मिन् अग्निदाहस्य, दुर्भिक्षस्य, भिक्षायाः, नौकाविहारस्य चान्यत्रदुर्लभानां दृश्यानां प्रत्यक्ष-दृष्टमिव वर्णनं साधुकृतम् । गीतानां प्रचुरप्रयोगेण नाट्यस्य रसात्मकता संवर्धिता कविना ।

श्रीजीवन्यायतीर्थः

पूर्वोक्तस्य सुप्रसिद्धनाटककारस्य पञ्चाननतर्करत्नस्य पुत्रश्रीजीवन्यायतीर्थः 1892 ख्रीष्टाब्दे वङ्ग-देशे चौबीसपरगनेति जनपदस्य भट्टपल्लीति नगर्यां जनिं लेभे । विद्यार्जनाय स काशीमागत्य महामहोपाध्या-स्य राखालदासस्यान्तेवासी न्यायमधीत्य न्यायतीर्थोपाधिना समलङ्कृतः । परतः स बी० ए०, एम० ए० आदिपरीक्षाः समुत्तीर्य कलकत्ताविश्वविद्यालये 21 वर्षाणि व्याख्यातृपदेन, भट्टपल्लीमहाविद्यालये प्राचार्य-पदेचनियुक्तोभवत् । स्ववैदुष्यप्रकर्षेण प्रथितः श्रीजीवो वर्धमानविश्वविद्यालयतः डी० लिट्, हावड़ा-संस्कृत-परिषदो महाकविः प्रयागविद्वत्समाजतो महामहिमोपाध्यायो काशीभारतधर्ममण्डलतः पण्डितकेसरी, नवद्वीपज-नसभातो व्याकरणशिरोमणिरिति उपाधीन् स्वीचकार । अध्यापनेन सह श्रीजीवः प्रणवपारिजातमर्थशास्त्रं चेति पत्रद्वयं सम्पादयामास । सोदष्टादशसर्गात्मकं महाकाव्यं पाण्डवविक्रमम, सारस्वतशतकमिति चित्रकाव्यं नवंगीतगोविन्दम् च विरचितवान् । श्रीजीवो मुख्यतया नाटककार एव । पञ्चाशत्प्रायाणि रूपकाणि तेन विरचितानि । तेषु महाकविकालिदासं श्रेष्ठमस्ति ।

महाकविकालिदासम्

महाकविकालिदासस्य प्रथमाभिनयः उज्जयिन्यां कालिदास-समारोह आयोजितः । नाटकेऽस्मिन् कथावस्तु विद्योत्तमा-कालिदास-समागममधिकृत्य प्रकल्पितम् । अत्र कालिदासः शाखाग्रभाग उपविश्य शाखा-मूलमुच्छेत्तुं व्यापृतोऽभवत् यदा राजकुमार्या विद्योत्तमयास्वीकृता राजकुमारास्त्रयस्तममिलन् सङ्केतमात्रेण तथा सहप्रश्नोत्तराणि विधातुंनीतश्च । संस्कार-विहीनेन कालिदासेन तस्या विवाहः सम्पन्नः । परतस्तस्य मौर्ख्यं विज्ञाय सा तं तिरस्कृतवती । राजप्रसाद-परित्यागकालेसोऽवदत्- किं विद्यया या पतिभक्तिं न ददाति," इति ।

तिरस्कृतः कालिदास उज्जयिन्याः श्मशाने वर्षत्रयं कालीप्रीत्यर्थं कोटित्रयजपसाधनया देव्याः प्रसा-दात्—"वाग्विभूतिमान् भव । विश्वविजयी भव । हिमाचल इव सुरसरस्वती-रसमाधुरी-प्रभवो भव इति ।

विद्योत्तमानुशोचन्ती संयोगवशात् तस्मिन्नवसरे तत्र समागता । किन्तु तयोः पुनर्मिलनं तत्र क्षणिक-मेवाभवत्, यतो हि नाम कालिदासस्तस्या अनुज्ञया स्वव्रतस्य समापनविधिं सम्पादयितुं नदीतटमगच्छत् । मार्गे विक्रमादित्यस्य वाहनार्थं गृहीतः । अचिरमेव विक्रमस्तस्य विद्याविलासेन प्रभावितः सम्मानं तस्मै ददौ ।

एकदा राजसभायां कालिदासो वररूचिना प्रस्तावितां समस्यामधः श्लोकेन समाहितवान्-

श्लाध्यंनीरसकाष्ठताडनशतं श्लाघ्यः प्रचण्डातपः, श्लाघ्यं पङ्क विलेपनं पुनरिह श्लाध्योऽतिदाहोऽनलैः ।

यत्कान्ता-कुचकुम्भ-बाहुलतिका हिल्लोललीला-सुखं, लब्धं कुम्भवर त्वया न हि सुखं दुःखैर्विना लभ्यते 11
विक्रमः काव्यरसाप्लुतः प्राशंसत— "धन्योऽसि कालिदास । अनवद्या ते रचनाशक्तिरिति ।"

कालिदासो विक्रमानुज्ञया स्वकाव्यानां परिचयमदाद्भिज्ञानशाकुन्तलस्य पञ्चमाङ्कस्याभिनयं च प्रायोजयत । कालिदासः पत्नी वियोगेनभृशं सन्तप्तो-राजानं प्रत्ववोचत्-भवानेव तत्र कारणं यदिह पत्न्या-वियुक्तोऽस्मि । कुत्र सा गतेति तामन्वेष्टुं राज्ञा विसर्जितः कविर्देशेदेशे पर्याटत् । हिमालये परिभ्रमन् कुतश्चित् श्रवणपथमायातां गीतिं श्रुतवान्—

एष एमि ननु यामि न दूरं,
रचयन्निति वचनामृतपूरम् ।
शशधर इव घनजलधरलीनः,
कथमसि सहसा दर्शनहीनः ।
प्रियतम सन्निधिमुपनय मधुरम् ॥
जीवनयौवन–सर्वमनोरथ
नाथ कथा पुनरेषि नयनपथ–
मुज्जीवय मम हृदयं विधुरम् ॥

स्वप्रेयस्या एवेदं गीतमिति तदनु सन्धाय तां कालिदासोऽमिलत् ।

शङ्कराचार्यवैभवम्

शङ्कराचार्यवैभवस्य प्रथमाभिनयः 1968 खृष्टाब्दे वाराणस्यां सरस्वती-महोत्सवे सामाजिकानां प्रीत्यर्थमायोजितः । अत्र शिवावतारः शङ्कराचार्यो वेदान्तानुसारेण जीवनदर्शनं प्रकाशयति ।

साम्यतीर्थम्

साम्यतीर्थनामके पञ्चामाङ्के नाटके रवीन्द्रनाथठक्कुरस्य कतिपयनिबन्धान् समाश्रित्य भारतस्यराष्ट्रिया-मेकतां प्रतिपादयति कविः ।

विवेकानन्द-चरितम्

विवेकानन्दचरितनामके पञ्चमाङ्के नाटके यथानाम चरितनायकस्यास्य विश्वव्यापिप्रवृत्तयोऽध्यात्मदिशा सरसं प्रपञ्चिताः ।

श्रीजीवस्य नाट्यरचनावैचित्र्यमधोविधं चकासते—

नाटकानि—महाकविकालिदासम्, शंकराचार्यवैभवम्, साम्यतीर्थम्, कुमारसम्भवम्, रघुवंशम्, विवेकानन्दचरितम्, नागनिस्तारम्, स्वाधीनभारतविजयम्, साम्यसागर-कल्लोलम्, निगमानन्दचरितम्, श्रीकृष्ण-कौतुकम्, प्रकरणम्—माधुरीसुन्दरम् ।

प्रहसनानि—विधिविपर्यासम्, विवाहविडम्बनम्, रामनामदातव्यचिकित्सालयम्, चौरचातुरीयम्, चण्डताण्डवम्, क्षुत्क्षेमीयम्, शतवार्षिकम्, चिपिट्कचर्वणम्, रागविरागम्, भट्टसंकटम् पुरुषरमणीयम्,

दरिद्रदुर्दैवम्, वनभोजनम्, स्वातन्त्रयसन्धिक्षणम्, योग्ययुगलमेलनन्, तैलमर्दनम्[1]
भाण—पुरुषपुङ्गवम् ।

व्यायोग:—कैलासनाथ-बिजयम्, गिरिसंवर्धनम् ।

मूलशंकर–माणिकलालयाज्ञिक:

मूलशंकरमाणिकलालस्याविर्भाव: १८८६ ख्रीष्टाब्दे खेडाजनपदे नडियादग्रामे बभूव । स बड़ौदा—महाविद्यालये सर्वोच्चशिक्षामलभत । तत्र तदारविन्दघोष: प्राचार्य आसीत् । वाराणसीतो विद्वत्परिषद: स साहित्यमणिरित्युपाधिना समलंकृत: । याज्ञिको बहुविधरचनाभिर्यशोलेमे । गुर्जरभाषया स मेवाड़प्रतिष्ठाम् हर्षदिग्विजयं च प्रणिनाय । संस्कृतेन स विजयलहरीति गीतिकाव्यम् सप्तर्षिदृष्टवेद-सर्वस्व च भाष्यं जग्रन्थ । तस्य संस्कृतनाटकानि-प्रतापविजयम्, संयोगितास्वयंवरम्, छत्रपतिसाम्राज्यं च स्वातन्त्र्योत्साह-संवर्धनायाभिमुखीभूतानि लक्ष्यन्ते ।

प्रतापविजयम्

नवाङ्के प्रताप-विजयेऽपमानितो मानसिंह: प्रतापमतर्जयत् सद्य: समेत्य शमयामि तवावलेपम् । १.२४ मानसिंहेनोत्तेजितोऽकबर आक्रमणं करिष्यतीति शङ्कमान: प्रतापो हल्दीघाटी-क्षेत्रे स्वसैन्यं संचारयामास । प्रथमचरणे मानसिंहस्यपराजयानन्तरं स्वयमकबर: सहायभूत: समायात: । चिरमेवशीत-युद्धमकबर-प्रतापयो: प्राचलत् । अन्ततोऽकबर: सन्धिपत्रं तस्मै प्राहिणोत्—

प्रौढ़प्रताप—परिवर्धितवंशकीर्ति: ।
कामं प्रशास्तु निरूपद्रवमात्मचक्रम् ॥

नाटकेऽस्मिन "स्वन्त्रतैव जीवितरसं प्रस्तौति" इति प्रतापपत्नीमुखेन संकेतितम्—

नानारसै: स्वादुफलै: सुपोषित:
स्नेहेन राजन्यकुलोपत्ननालित: ।
शुकोऽपि चामीकरपञ्जराश्रितो
न पारतन्त्र्यं बहु मन्यते खग: ॥ ४.४

छत्रपति-साम्राज्यम्

छत्रपतिसाम्राज्याभिधे दशाङ्के नाटकेऽस्मिन् कविर्महाराष्ट्रनायकस्य शिवराजस्य निदर्शनेन भारतान्

---

१. श्रीजीवस्य प्रहसनंरचना संस्कृतप्रचाराय विलसति । स स्पष्टयति प्रहसनं नाम किंचिल्लघुसाहित्यं पलाशतरोरिव यस्य रचनया न ज्ञानकाण्डगौरवं न वा यश: पुष्पसौरभं प्रकटीभवेत् । अतो ममेयं समीहा किंचित्कारणान्तरमपेक्षमाणा स्फुरति । तच्च कारणं बहुजनप्रचारप्रसिद्धाया मृतभाषाया अद्यापि हास्य-स्फुरणं भवतीति प्रत्यक्षीकुर्वन्तु भवन्त: ।

स्वातन्त्र्यसंग्रामे भृशमुद्योक्तुं सन्दिशति । आरम्भिक विनिवेदनमस्यां दिशि प्रस्तावनायामेव दृश्यते—

पित्रोर्गुरोश्चाधिगतार्थविद्यो
वीरानुरक्तैः सवयोभिरावृतः ।
स्वराज्य - संस्थापन - निश्चितव्रतो
गर्जत्ययं केसरिणः किशोरः ॥

केन केनोपायेन च शिवराजो दक्षिण भारते मुगलशासकानामन्येषामपि विधर्मिणां सत्तां विमर्दितवानिति ऐतिहासिकप्रमाणपुरस्सरं नाटकीयपरिवेशे कविः समुत्थापयति ।

तत्र समर्थ—स्वामी रामदासो भरतवाक्यमुत्साहनिर्झरनिर्भरं प्रवक्ति-

मोदन्तां नितरां स्वकर्मनिरताः पर्याप्तकामाः प्रजाः
एधन्तां नयविक्रमाङ्कयशसो लोकप्रियाः पार्थिवाः ।
सभ्यानां च समृद्धये जलमुचः सिञ्चन्तु काले रसां
सप्ताङ्ग - प्रकृति - प्रकर्षरुचिरं राष्ट्रं चिरंवर्धताम् ॥

महालिङ्ग शास्त्री

महालिङ्गः 1897 ख्रीष्टाब्दे तञ्जौर-जनपदस्य तिरुवालङ्गाड-ग्रामे जनिं लेभे । तस्य पूर्वजेषु अप्पयदीक्षितेन्दुः सुप्रसिद्धो वर्तते । तस्य वंशे त्यागराजः राजुशास्त्री बभूव यस्य पौत्र असीत् महाकविर्यज्ञ स्वामी ।

एम० ए०-वैचलर-आव-ला-उपाधिभिर्भूषितो महालिङ्गो मद्रासनगरस्योच्चन्यायालयेऽधिवक्ताऽभंवत् । सङ्गीत-ललितकला-निष्णातो महालिङ्गो भारतीय-प्राचीन-नवीनसंस्कृति-सन्दोह-पारङ्गत आसीत् । स्वतन्त्रे भारते संस्कृतस्य भारतीयसंस्कृतेश्चावज्ञा वर्तत इति तस्य स्वानुभूतं 'मतं तस्य ग्रन्थानां भूमिकासु नैकशः प्रदर्शितम् तथाहि—

Where is the money to throw on them (Sanskrit-Books), where are the readers to purchase them, where the patrons to finance their publication, where the Rasikas to enjoy them ? When I think of all these problems, the writing of poetry and drama in Sanskrit appears to me a crime in these days. Still I have written, do write, and publish too.

उद्गातृदशाननस्य भूमिका

It is not surprising that in the endless winter nights for sanskrit which is refrigerated with the antarctic temperature in the minus grade, the thawing of hearts has not set in too soon in spite of all the warmth of endeavour which I have carried with me for more than a quarter of a century, I have taken refuge against the chill-blasts at the sanctum sanctorum of chillness itself through locating the action of this play at the loftiest and most holy of the snowclad peaks of the Himalayas,

उभयरूपकस्य भूमिका—

A Sanskrit poet, if he should aspire for recognition has to publish his writing. He waits in vain for government aid or private philanthropy. When he, at last decides to take a plunge with his meagre private capital without calculating the profit or loss, but only aspiring at any cost to spread his literary appeal to responsive hearts, dire disappointment awaits him.

महालिङ्गस्य रचनावैविध्यमनुपममेव परिलक्ष्यते । तस्य प्रकाशिताः कृतयः सन्ति''—

(1) किंकिणीमाला (2) व्याजोक्तिरत्नावलिः (3) देशिकेन्द्रस्वताञ्जलिः (4) भ्रमर-सन्देशः (5) वनलता (6) शम्भुचर्योपदेशः (7) स्तुतिपुष्पोपहारः (8) मुक्तकस्तुतिमञ्जरी । अतोऽप्य-धिकतराः सन्ति महालिङ्गस्याप्रकाशिता ग्रन्था अधोलिखिताः—

(9) संस्कृत-दुर्दशा (10) मणिमाला-विशालकाव्यानां संग्रहाः (11) प्रशस्ति-गुणमालिका (12) किंकणीमाला-द्वितीयो भागः (13) व्याजोक्तिरत्नावली (14) प्रकीर्णकाव्यम् (15) महामहिर्षे सप्ततिः - उपहासकाव्यम् (16) लघुपाण्डव-चरितम् (17) शृगार-रसमञ्जरी-शृंगारपद्यशतकम् (18) श्रीबल्लभसुभाषितानि (19) उत्तरकाण्डम्-लघुरामचरितपूरकम् (20) कविकाव्यनिकषम् (21) गद्यकथानककोषः (22) संकथा-सन्दोहः (23) भासकथासारः ।

प्रासङ्गिकानि सन्त्यत्र नवनाटकानि कवि कृतानी 1927 ख्रीष्टाब्दतः 1968 यावत् ।

उदगातृदशाननम्

सप्ताङ्कमुदगातृदशाननं महालिङ्गस्य प्रथमं नाटकम् । अत्र कथावस्तुद्वयं सम्मिश्रितं विलसति । प्रथमकथा रावणकुबेरौ समाश्रयते । द्वितीयकथा पार्वतीशिवावधिकरोति । लङ्कातो रावणो हिमालयमुपगम्य कुबेरं पराभूय तस्य पुष्पकविमानमधिकरोति ।

रावणं नारदः सूचयति यत् त्वया परास्तः कुबेरः शिवस्य शरणंगतो हिमालये रमते । रावणः शिव-मपि विजेतुं तस्य लोक कैलाशप्रदेश समागतः । अस्मिन्नन्तराले शिवः कौटुम्बिककलहेन विषण्ण एव कैलासमुपवसति स्म । पार्वती पृथगेव शरवणमधिवसतिस्म ।

कैलासे रावणस्य प्रथमाभियानं नन्दिना भवति । स नन्दिनः शापेनाधोगतः । क्रोधान्धः स कैलास-मुत्खातयितुं प्रयासनिरतो भवति । तदा शिवः पादाङ्गुष्ठचापेन कैलाशं निष्पिनष्टि रावणं विमर्दयति च ।

कैलासान्दोलनेन भीता पार्वती मानं त्यक्त्वा शिवं कण्ठे गृहणाति । शिवोऽपि प्रमोदनिर्भरो रावण-स्तुत्या परं प्रीतश्च तस्मै चन्द्रहासखड्गं ददाति । अत्र शिवरावणौ नायकप्रतिनायकावुभौ सुखदपरिणामं लभेते इति विरलतम एव नाटकान्तोनुभूयते ! अभिनयदृष्ट्या सातिशयं मनोरञ्जकमिदं नाटकम् । रङ्गे पात्राणि बहुरूपाणि सन्ति । यथा दशमुखो रावणः, षण्मुखो गणेशः, घोटकमुखोऽपि शृङ्गवान् शृङ्गरिटिः, एकदन्तो हस्तिमुखश्च गणेशः । वृद्धवृषभो नन्दी संस्कृतं वदति । भृशं बलीयसी तत्र संवादभाषा प्रवर्तते । तथाहि

दशाननः—(समर्षाटोपम्) अरे रे वृथाशूलधरः जर्जरानड्वन् किमिति प्रगल्भसे। एष शृंगे तव समुत्पाटयामि।

नान्दी-अरे दुर्वार, भ्रष्टो भव।

(दशाननोऽन्तरिक्षादधःपतति)

महालिङ्गस्य नवरूपकाणि अधोविधं विभक्तानि सन्ति—

नाटकानि—

(1) उदगातृदशाननम्-सप्ताङ्क नाटकम्
(2) प्रतिराजसूयम्-सप्ताङ्क नाटकम्
(3) आदिकाव्योदयम्-नवाङ्कं प्रकरणम्

प्रहसनानि—

(1) शृङ्गारनारदीयम्
(2) कौण्डिन्यप्रहसनम्
(3) उभयरूपकम्

भाण—

मर्कटमार्दलिकम्

एकाङ्की—

अयोध्याकाण्डम्

अभिनवप्रयोगान्वितम्-

कलिप्रादुर्भावम् सप्ताङ्कम्

महालिङ्गो हास्यरससान्द्रेषु प्रहसनेषु विशिष्यते।

रामस्वामी शास्त्री

रामस्वामी शास्त्री कुम्भकोनम् नगरस्य वास्तव्यो नेगापट्टम् नगरे जनपदन्यायाधीशः १९२८ ख्रीष्टाब्दे रतिविजयाख्यं नाटकं चकार। आंग्लशासन-नियोज्योऽपि स देशानुरागोत्फुल्लः, स्वभाषागौरवाभिमानी लोकाभ्युदयप्रवणश्च मान्यतमो वदान्यो बभूव। नाटकस्यभरतवाक्येन तस्यौदात्यं प्रतीयते। तद्यथा-

देशोऽयं भारताख्यं प्रथितसुखमयो धर्ममूलं च भूयात्।
वैशम्यंरागजन्यं भवतु च शमितं देशभक्तिप्रभावात्॥

प्रस्तावनायां जयतु जयतु भारतदेश इति श्रूयते। नाटकस्य रचना जगदम्बायाः प्रीत्यर्थं निष्पादितम्। स देव्या उपासक आसीत्। नाट्य-कृत्या ममानन्दः पावित्र्य सौमनस्यानि च द्विगुणीभूतानीति स मन्यते[1]। छात्राणां परितोषाय नाटकमिदं विरचितम्। तैर्नाटकस्याभिनयस्त्रिचनापल्ली नगरे निष्पादितः। नाटकेऽस्मिन्

---

1. प्राक्कथने स निवेदयति— It has made me better and purer and happier and may perhaps please other adorers of our universal mother.

शिवयो : परिणयेन रतिकामयोः पुनर्मिलनं जायते । अस्मिन्नवसरे शिवो हिमालयाय सन्दिदेश— सदैवायं पुण्यदेश आर्यावर्तो भवता शत्रुभ्यो रक्षितव्यः । कामं च न्ययमयत्—

धर्मप्रियो भवेन्नित्यं भवेदीश्वरकिंकरः ।
पूर्णानन्दस्त्वया देयो धर्म्यो रागो भवेदिति ॥

सरोजिनीवरानुसारेण—

रसिकादेशानुरागपूर्णा ईश्वरभक्तियुक्ताः सर्वकला निपुणा भवेयुः ।

जग्गूवकुलभूषणः

जग्गू अलवारैय्यङ्गार इति पूर्णनामा कविर्दक्षिणभारते यादवाचलवास्तव्यः 1902 खीष्टाब्दे प्रादुर्भूतः सप्तदशवर्षीयः स शृङ्गारलीलामृतमष्टादशवर्षीयश्च जयन्तिकेति गद्यकाव्यविरिचितवान् । तदनन्तरं वङ्गलौरमधिवसन् नित्यं संस्कृत-साहित्यं वर्धयामास । सोऽदूभूतदूतमिति महाकाव्यम्, करुणरसतरंगिणी, पथिकोक्तिमाला च काव्यद्वयं प्रणीतवान् ।

वकुलभूषणस्य विंशतिप्राय नाटकानि सन्ति । तेषु कतिपयनाटकानि प्राक्तननाटकानां पूर्वतरं पश्चात्तरं वा कथावस्तु प्रकल्प्य संयोजितम् । विरलमेवेदृशं प्राचीननाटकानां विस्तारः । तद्यथाद्भुतांशुकम्" इति नाटके वेणीसंहारस्य कथावस्तुनः पूर्वतरं वृत्तं षड्भिर्योजितम् ।[1] प्रतिज्ञाकौटिल्यमिति नाटके मुद्राराक्षसस्य पूर्वतरंवृत्तं सप्ताङ्केषु प्रकल्प्यं संयोजितम् । एवमेव प्रसन्नकाश्यपेऽभिज्ञानशाकुन्तलेतद्वृतानुसारि नवं कथावस्त्वङ्कत्रयेण प्रकल्प्य संयोजितम् । अभिज्ञानशाकुन्तलस्य चतुर्थाङ्के कण्वः कथयति-भूत्वा चिराय चतुरन्तमही स पत्नी 4.20 इमंश्लोकं समाश्रित्य प्रसन्नकाश्यपस्य कथाधाराग्रे प्रवाहिता । मञ्जुमंजीरनामके नाटकेऽष्टाङ्कैः रामकथाया साकल्येन प्रपञ्चिता ।

वकुलभूषणस्य लघुरुपकेषु नैकविधं कथावस्तु निरूपितम् । तद्यथा अप्रतिमप्रतिमेऽङ्कद्वयेन धृतराष्ट्रस्य भीमनिष्पेषणयोजना वर्णिता प्रतिज्ञा—शान्तनवेऽङ्कद्वयेन भीष्मप्रतिज्ञा निरूपिता । मणिहरण एकाङ्केऽश्वत्थामा स्वप्रतिज्ञानुसारेण रात्रौनरमेधं संकल्पयति । द्रौपदी स्वयमेमेत्राश्वत्थाम्नो न हन्तुं उपचक्रमे ।[1] अश्वत्थामा भीमेज गृहीतः किन्तु युधिष्ठिरेण विमुक्तः । अर्जुनेन तस्य शिरसः सहजातं मणिं निकृत्य युधिष्ठिरस्य मुकुटमणौ खचितम् । यौवराज्यनामके एकाङ्के भरतो युवराजपदं न स्वीकरोति । मुनिभिः प्रचोदितोलक्ष्मणो योवराज्यं स्वीचकार । वलिविजयेऽङ्कद्वयेन् वामनस्य त्रिविक्रमो निरूपितः । तत्र वलिर्विष्णुं याचते—

---

1. कवेरियं योजना प्रस्तावनायां निर्दशिता
यद् भट्टनारायणनिर्मितं प्राग्
वेण्यां महाभारतवस्तु रम्यम् ।
तत्पूर्वभाव्यत्र विधाय वेण्या
संयोजितं श्रीकविना त्वनेन ॥

दिवि भुवि पाताले व ममास्तु वासो मुकुन्द तव कृपया । दिव्यं दर्शयरूपं सततं पश्यन् कृतार्थतां यामि ॥ "अमूल्यमाल्ये रूपकेऽङ्केद्वयेन बालकृष्णस्य प्रकल्पिता लीला ग्रन्थिता । कश्चिन्मालिकः कृष्णाय मालां समर्प्यानुवंशिकं मुक्तिं लभते ।

अनङ्गदा-प्रहसनं वकुलभूषणस्यान्यदिशि प्रतिभावैभवं निदर्शयति अत्र काचिद् धूर्ता वेश्या भ्रातृद्वयं कूटकपटकौशेलने प्रतार्य वन्दी कृत्य तयोः परस्परं कलहं विनियोजयति । तौ स्वमूढतां विज्ञाय कथयतः—

वंचितोऽस्मि वराक्या वाराङ्गनया
प्रमदासु प्रमादो न यूना कार्यः कदाचन ।
दिगम्बरत्वं सिद्धं हि तथा यद्यावयोरिव[1] ॥

रमानाथमिश्रः

उत्कलदेशीयोऽयं रमानाथमिश्रो बालेश्वर (बालासोर) जनपदस्य मणिखम्भनामके ग्रामे 1904 ख्रीष्टाब्दे जनिं लेभे । बालेश्वरनगरे शिक्षितस्तत्रैवाजीवनमध्यापयत् । साहित्य-शास्त्री, आयुर्वेदशास्त्री, कर्मकाण्डाचार्य इत्युपाधिन् संयोज्यांगलभाषां च सम्यगधीत्य हृदयेन भारतीय-संस्कृति-निष्ठो यावज्जीवमात्ममनीषां संस्कृतेन व्याजहार । स कथयति—A return to Sanskrit and Sanskrit alone can reintegrate our ancient tradition and values which can shield us from onslaughts of the Occident.
रमानाथेन नैकनाटकानि विरचितानि । तेषु चाणक्यम्, श्रीरामविजयम्, समाधानम् पुरातनबालेश्वरम् प्रायश्चित्तम्, आत्मविक्रयम्, कर्मफलञ्च सुप्रथितानि सन्ति ।

चाणक्यविजयम्

चाणक्यविजये नन्दवधः चन्द्रगुप्ताभिषेकः राक्षसेन चन्द्रगुप्तस्य मन्त्रित्व-स्वीकरणमित्यादीनि प्रधानप्रकरणानि सन्ति । अङ्कद्वयेन नन्दस्यायोग्यता वर्णिता परतोऽङ्कत्रयेण चन्द्रगुप्तस्याभ्युदयो निरूपितः ।

पुरातनबालेश्वरम्

1957 ख्रीष्टाब्दे रमानाथेन बालेश्वरनगरस्य पुरातन-संस्कृतिवैभवविलासो निरूपतोऽस्मिन्नाटके । परतः केन प्रकारेण महाराष्ट्रशासकै गौराङ्गशासकैश्च यौद्धिकस्पर्धाभिर्नगरश्रीर्विलोपितेतिवर्णनं मुख्यो विषयः । नाट्यसाहित्यस्य विरलैव चमत्कारशालिनी प्रवृत्तिर्दृश्यतेऽस्मिन्नाटके ।

रमानाथस्यात्मविक्रयनामके नाटके पञ्चाङ्कैः सत्यहरिश्चन्द्रस्यात्मविक्रयेणापि सत्यरक्षणोपक्रमः साधु निरुपितः । कर्मफलं तु कवेः प्रहसनकोटिकरचना ।

---

1. द्रौपदी सुभद्रांपति कथयति-गृहाण कशाम् । सज्जीकुरू रथम् । पौरुषाभिमानिनस्त्वेते पश्यन्त्वबलां पाञ्चालीम् ।

मथुराप्रसादो दीक्षितः

उत्तरप्रदेशस्य हरदोई जनपदे भगवन्तनगरे मथुराप्रसाददीक्षितस्य जन्म 1878 ख्रीष्टाब्देऽभवत्। नैकशास्त्रेषु परं नैपुण्यमवाप्य स मौलिकग्रन्थान् टीकाः भाष्याणि, अनुसन्धाननिबन्धांश्च प्रणीतवान्।

भारतीयस्वातन्त्र्यस्य परमोपासको दीक्षितः लाहौरनगरस्थमहाविद्यालयस्य व्याख्यातृपदंपरित्य-ज्यासहयोगान्दोलने 1921 ख्रीष्टाब्दे व्यापृतः। परतः स सोलननगरे तारिणीमहाविद्यालये प्राध्यापको वभूव। पश्चाद्वाराणस्यां संस्कृतविश्वविद्यालये सम्मानितः प्राध्यापको नियुक्तः।

मथुराप्रसादस्य सप्तनाटकानि सन्ति वीरप्रतापम्, भारत,-विजयम्, भक्तसुदर्शनम् शङ्करविजयम्, वीरपृथ्वीराजबिजयम्, गान्धीविजयम् भूभारोद्धरणञ्च।

वीरप्रतापम्

सप्ताङ्कस्य वीरप्रतापस्य नायको महाराणा प्रतापः सुविदित एव। सोऽयं प्रतापः व्रतं धारयति—

स्वातन्त्र्यस्य पदं समस्तवसुधां नेतुं यतिष्ये भृशम्। प्रस्तावनायां सूत्रधारो युवकान् भारतं पारतन्त्र्यपाशाद्विमोक्तुं सन्दिशति—

"इदानी भारतदेशें हीनदीनदशापन्नानां वीराणां शौर्य-साहस-सहिष्णुता-गुणानामुद्योतनाय, परकाष्ठा-मापत्ति भजमानानां पौर्वकालिकक्षत्रियाणां शोर्यधैर्याद्यभिनयेन भाविनवयुवकेषु तत्तदगुणसम्पादनाय" इत्यादि।

भारतविजयम्

भारतविजयमिति सप्ताङ्कं नाटकं 1937 ख्रीष्टाब्दे प्रणीतम्। अस्य प्रथमोऽभिनयः सोलन-राजधान्यां राजसभायाः प्रीत्यर्थं निष्पादितः। अत्र भारतीयस्वतन्त्रतासंग्रामस्येतिहास आदिकालतः संगृहीतः। नाटकेऽस्मिन् कविर्भारतीयस्वातन्त्र्यस्य—समुपलब्धिरपि स्वतन्त्रताप्राप्तेर्दशवर्षपूर्वमेव दर्शयति। अस्य प्रकाशनं स्वतन्त्रताया अरुणोदयेऽभवत्।

शंङ्करविजयम्

षडङ्केशङ्करविजये शास्त्रार्थविधिना शङ्करस्य भारतदिग्विजयो निरूपितः। माहिष्मतीनगरे मण्डन-मिश्रस्य दर्शनं, तस्य शिष्यताग्रहणं च प्रथमं वर्णितम्। उज्जयिन्यां सर्वे विभिन्नसम्प्रदाय-वादिनस्तेन पराजिताः।

वीरपृथ्वीराजनाटकम्

1940 ख्रीष्टाब्दे विरचितस्य पृथ्वीराज-विजयनाटकस्य प्रथमाभिनयो दुर्गामहोत्सवे आयोजितः। तत्र राजपरिवारो विद्वांसश्च प्रेक्षका आसन्। सप्ताङ्के नाटकेऽस्मिन् पृथ्वीराजस्य मुहम्मदगोरीनामकेन

मोहम्मदीयाक्रामकेण संघर्षो वर्णितः । आद्ये पराजितो निगृहीतश्च मुहम्मदगोरी जयचन्देन सहायीभूतः परतः पृथ्वीराजं ध्वंसयितुमचेष्टत युद्धे निगृहीतः पृथ्वीराजो गौरीशासकेन स्वदेशंनीतः । तत्र चन्दकवेर्योजनया स गोरीं हतवान् स्वयं च स्वेच्छया चन्देनाहतो मृतः ।

मथुरानाथो देशोत्थानमेवोद्देश्यं प्रकटयति नाटकेऽस्मिन् । प्रस्तावनायां सूत्रधारो वदति—

दुःखान्तकं परमथापि सुखैकरूपं, लोकप्रबोधजनकं समयानुकूलम् ।
देशोस्थितिं च विदधत् सदसन्नयाढ्यं, तस्मादिदं भवति मे बहुमानपात्रम् ॥

गाँधी-विजयनाटकम्

गान्धी-विजये भारतस्वातन्त्र्य-प्राप्तेराद्यन्तं वृतं 1910 ख्रीष्टाब्दतः 1947 पर्यन्तं निरूपितम् । अत्राङ्कद्वयेन बालकानां चरित्रनिर्माणं प्रधानोद्देश्यं कवेः । स कथयति—"राष्ट्रहितैकबद्धपरिकरमनीषिणा प्रीत्यर्थं विरचितमेतत् । प्रथमाङ्के तिलकः कथयति-यश्चपेटां प्रहारतां दण्डैस्तस्य प्रतिक्रिया ।

मातः स्वल्पेन कालेन द्रक्ष्यस्येतान् हतानिव ॥ इति अत्र गान्धी महाभागस्याफ्रीकादेशे भारते चक्रतकार्यता वर्णिता । नाटकेऽस्मिन् प्राकृतस्थाने हिन्दी प्रयुक्ता ।

वेङ्कटराघवन्

वेङ्कटराघवन् विंशशताब्दस्य संस्कृतप्रतिभाजुषां मनीषिणामग्रगण्यः । तस्य जन्म 1908 ख्रीष्टाब्दे तञ्जौरजनपदस्य तिरुवायूरनगरे बभूव कुप्युस्वामिशास्त्रिणोऽन्तेवासी भूत्वा स मद्रासनगरे सर्वोच्चशिक्षां लब्ध्वा च 1935 ख्रीष्टाब्दे शृंगारप्रकाशमधिकृत्य पी० एच० डी०, उपाधिं प्राप्तवान् । परतो मद्रास-विश्वविद्यालये प्राचार्यवृत्तया स्वजीवनं सफलंकृतवान् । राघवन् महोदयानुसन्धानप्रवृत्तिः सर्वातिशायिनी प्रवर्तते बहूनां हस्तलिखितग्रन्थानां समुद्धरणेन तेषां पुरातात्त्विकमहत्त्वप्रदर्शनेन च तस्य कृतित्वं प्रगुणीभूतम् । न केवलं भारतेऽपि विश्वलोके संस्कृतप्रतिष्ठां संवर्धयन् स सार्वभौमसम्मानास्पदं प्राकाशत ।

नाटके नाट्यशास्त्रे च राघवस्य महानुद्योगो दृश्यते । विद्यार्थिजीवनादेव स नाटकानां प्रणयने तेषामभिनये च भूयो व्यासक्तो बभूव । यौवनद्वारप्रविष्ट एव स अनार्कली-विमुक्ति प्रतापरुद्रीय-विडम्बनादीनि नाटकानि प्रणीतवान् । 1958 ख्रीष्टाब्दे स मद्रासनगरे संस्कृतरंगं स्थापितवान् । तत्र तस्य सर्वाणि रूपकाणि अभिनीतानि । कतिपयनाटकानि उज्जयिन्यां कालिदाससमारोहे, अन्यत्र च प्राच्यपरिषत्सु अभिनीतानि । राघवस्य विरचितानि रूपकाणि सन्ति—विमुक्ति, रासलीला, कामशुद्धिः, प्रेक्षणकत्रयी (विज्जिकाविकटनितम्बा सुन्दरी), लक्ष्मीस्वयम्बरम् पुनरुन्मेषम् आषाढस्य प्रथमद्विवसे, महाश्वेता, प्रतापरुद्रीयविडम्बना, अनार्करलीत्यादीनि ।

काव्यस्यान्यविधासु स कृतश्रमसर्वान् समकालिक विदुषोऽतिशते । तस्य महाकाव्यं मुत्तुस्वामी दीक्षित-चरितं सर्वश्रेष्ठमेव । अनेन स काञ्चीशंङ्कराचार्यप्रसादात् कविकोकिलोपाधिं लभतेस्म । परम्परागत-काव्य-नाट्यविधा एव पर्याप्तेति न मन्यमानः सोऽभिनवकाव्यनाट्यकोटीः स्वरचनाभिः समुपस्थापितवान् । न्यूकैटेलागस कैट्लोगरम्" इति संस्कृतग्रन्थानां विश्वकोशयोजना, तस्याप्रतिमां कार्यशक्तिं व्यनक्ति सोऽयं महाभागो डॉ० राघवन् 1979 ख्रीष्टाब्दे दिवंगतः ।

विश्वनाथ सत्यनारायणः

कृष्णाजनपदस्य नन्दगुरू ग्रामे जातो विश्वनाथसत्यनारायणः । तिरूपतिवेङ्कटकविः तस्य साहित्य-विद्या गुरूरासीत् । अन्यत्र स एम० ए० उपाधिमर्जितवान् । आजीवनं सोऽध्यापनवृत्त्या विविधभाषाभिर्ग्रन्थं रचनाभिर्ज्ञानप्रकाश विच्छुरितवान् ।

विश्वनाथो मूलतस्तेलुगुभाषाकविः, तेलुगु भाषयाविरचितेन श्रीरामायणकल्पवृक्षेण ज्ञानपीठस्य सर्वोच्चपुरस्कारं लक्षरूप्यकमितं प्राप्तवान् । सोऽयं कविः संस्कृतेन गुप्तपाशुपतममृतशर्मिष्ठं च नाटकद्वयं प्रणीतवान् । गुप्तपाशुपते स प्रतिपादयति यत् युद्धेषु महामारणशस्त्राणि न प्रयोज्यानि यथा शिवात् पाशुपतं लब्धाणि अर्जुनस्तस्य प्रयोगं महाभारते नाकरोतनवाङ्केऽमृतशर्मिष्ठनामकेरूपके शर्मिष्ठादेवया-न्योर्महाभारतानुसारेण कथा प्रवर्तते । कविना कृतिरियं महानाटकमिति संज्ञितम् ।

विष्णुपदभट्टाचार्यः

विदुषां कुले जातो विष्णुपदो भट्टपल्लीति नगर्या वास्तव्य आसीत् । स संस्कृत-साहित्यं-परिषत्प-त्रिकायाः सम्पादकेष्वन्यतम आसीत् । तेन तेषु रूपकेषु काञ्चनकुञ्चिकम्, धनञ्जय-पुरञ्जयम्, कपालकुण्डला-मणिकाञ्चन-समन्वयमनुकूलगलहस्तञ्च प्रमुखाणि सन्ति ।

काञ्चनकुञ्चिकम्

नवाङ्क काञ्चनकुञ्चिकमिति प्रकरणं 1956 ख्रीष्टाब्दे विरचितम् । अत्र प्रस्तावनायामाधुनिकयुगे संस्कृतस्यावहेलना चर्चिता वर्तते । तद्यथा भारतीयवचसां प्रसूरियं भव्यभावविभवैर्महीयसी ।

ससर्वपूर्वविदुषां शिरःस्थिता गर्वखर्वमधुनावसीदति "स्वतन्त्रेऽपि भारते नास्ति दुःखानामन्तः इति सूत्रधारो निवेदयति—

गेहे गेहे तरुणा लब्धविद्याः कर्माभावान्नितरां मोहवन्तः दुःखान्मुक्तेरितरं मुख्यमार्गं न प्रेक्षन्ते स्वकृताज्जीवनान्तात् ॥ नाटकेऽस्मिन् युवद्वयस्य युवतीद्वयेन छद्मवृत्या प्रणयः प्रगाढो जायते । कवेः कथा-वस्त्वाधारोऽतिकौशलेन कूटविधिना प्रपञ्चितः । हास्यं तु विष्णुपदस्य सह जातम् ।

धनञ्जयपुरञ्जयम्

धनञ्जयपुरञ्जयस्य प्रथमाभिनयः शिवचतुर्दशी-मेलायामभवत् । अष्टाङ्क नाटकेऽस्मिन् कस्य चिन्निषादस्यातिथ्यभावना कथं फलवती भवतीतिनिरूपितम् । तद्यथा—

अभ्यागतार्थे त्यक्ताशुस्त्वमाशुस्वर्गमुद्गतः ।
दयेऽहं बहुशो धन्यो मज्जनपापमहार्णवे ॥

सव निषादोऽतिथिकृते प्राणदानेन राज्ञः पुत्ररूपेण जातः । नाटकेऽस्मिन् तृतीयपंचमाङ्कयोः केवलं द्वादशपंक्तयः सन्तीति नवः प्रयोगः ।

कपालकुण्डला

कपालकुण्लेति सुप्रसिद्धकवेर्बंकिमचन्द्रस्य मनोहारिणी गद्यकथा वंगभाषया प्ररोचते। विष्णुपदस्य पिता संस्कृते तस्यानुवादं प्रणीतवान्। विष्णुपदेन सा कथात्रोपजीव्यते। सप्ताङ्कस्य नाटकस्यास्य प्रथमाभिनयः संस्कृतसाहित्यपरिषदो वार्षिकोत्सवे समायोजितः।

अनुकूलगलहस्तकम्

प्रहसनमिदमङ्कद्वयेन दिव्येन्दु-सुन्दरस्य यामिन्योद्वाहं प्रपञ्चयति। अस्याभिनयः पूर्णिमारात्रौ आयोजितम्। प्रस्तावनायां कथावस्तु संक्षेपेण संकेतिम्—

परिहासकृतालापैर्लधुभिर्यन्त्रमध्यतः। तरूणीतरूणौ नीतावच्छेद्यं प्रेमबन्धनम्॥

मणिकाञ्चन-समन्वयम्

पञ्चदृश्यात्मके मणिकाञ्चनसमन्वयेऽङ्कद्वयेन शर्शरीकदर्दुरकयोः धूतर्योः प्रवञ्चनमयी प्रवृत्तिः समुद्धाटिता॥ प्रहसनेऽस्मिन्लोककथाविश्रुतयोः ग्राम्यनायकयोर्वृत्तं समाश्रितमिति काचिदभिनवा प्रवृत्तिः। प्रहसने प्रायशो हीनकोटिकं श्रृंगारितहास्यं भवति, किन्तु श्रृंगारस्य नामापि न दृश्यतेऽस्मिन्।

लीलारावः

लीलारावः सुप्रसिद्धकवयित्र्याः क्षमारावदेव्या कन्या हरीश्वरदयालस्य पत्नी च बभूव। हरीश्वरो भारतीयशासनस्य वैदेशिकसेवानियुक्त उत्तरप्रदेशस्य प्रतिष्ठितमाथुरकायस्थोऽतिशयसंस्कृतः सम्भ्रान्तश्च महानुभाव आसीत्। लीलया स्वमातुर्विरचितानि कथावृतानि नाट्यरूपेण प्रस्तुतानि। मञ्जूषापत्रिकायां 1955-1965 खीष्टाब्दमध्ये प्रकाशितानि। तस्याः प्रसिद्धरूपकाणि सन्ति-गिरिजायाः प्रतिज्ञा, बालविधवा, होलिकोत्सवम्, गणेशचतुर्थी, मिथ्याग्रहणम, क्षणिकविभ्रमम्, कटुविपाकम्, कपोलालयम्, वृत्तशंसिच्छत्रम् स्वर्णपुरकृषीवलाः असूयिनी, वीरभा, तुकारामचरितम्, ज्ञानेश्वरचरितम्, मीराचरितम् जयतु कमाउनीयाः, तुला-चलाधिरोहणम्, मायाजालम् लीलाया रूपकाणि अभिनवपद्धत्या, निष्पादितानि दृश्यन्ते। तत्र नान्दी, प्रस्तावना, भरतवाक्यञ्च न सन्ति। समसामयिकसमस्याः प्रभावपूर्णविधिना तत्र प्रपञ्चिताः सन्ति यत्र तत्र कुरीतीनां कुप्रथानां च हृदयद्रावकं वर्णनं मनोयोगेन क्षमा करोति। योरपीयसंस्कृतिपरायणा, कथा अपि लीलया नाटकेषु प्रकल्पिताः सन्ति।

विश्वेश्वरः

बङ्गीयोऽयं विश्वेश्वरश्चट्टला-नगरीवास्तव्यः स्वपित्रा कृष्णाकान्तेन स्वगृहे प्रधनाचार्यरजनीकान्तेन चट्टल-संस्कृत-महाविद्यालये राजेन्द्रनाथविद्याभूषणेन च कलकत्तासंस्कृतमहाविद्यालये सुशिक्षितः "विद्या विनयेन शोभते, इत्याभाणकस्यादर्शस्य व्यावहारिकनिदर्शनं विश्वेश्वरस्य चरिते प्रतिफलतिस्म। स्वकृतीनां भूमिकायां निवेदकरूपेण स आत्मानं दीनग्रन्थकारः इतिप्रकाशितवान्। अध्यापकवृत्त्या स स्वजीवनं यापयामास। तस्य

गृहमपि विद्यालयोऽभवत् यत्र तस्य पिता रामायण-महाभारत-पुराणादीनि पाठयामास। निकटवर्तिशिव-मन्दिरप्राङ्गणेऽपराह्णे या नाट्गोष्ठी नित्यमायोज्यतेस्म सोऽभिनयार्थं प्रोत्साहयतिस्म चट्टलमहाविद्यालस्य अध्यापकः सन् विश्वेश्वरस्तत्र सर्वप्रथमं कृष्णार्जुनं नाम नाटकस्य प्रयोगे कृष्णस्य भूमिकायामभिनयं कृतवान। अपरेषु बहुषु नाट्यप्रयोगेषु सोऽभिनेता बभूव।

विश्वेश्वरस्य नाटकानामभिनयो बहुषु संस्थासु कृतः। कलकत्ताकाशवाणीतः तेषां संक्षिप्तसंस्करणानि प्रसारितानि। बहूनि नाटकानि विश्वेश्वरस्य प्रकाशितानि सन्ति।

विश्वेश्वरेण पञ्चदशनाटकानि प्रणीतानि-दस्युरत्नाकरम्, भरतमेलनम्, बाल्मीकि-संवर्धनम्, चाणक्य-विजयम्, प्रवुद्धहिमाचलम्, विष्णुमाया, राजर्षिभरतम्, उमातपस्विनी, द्वारावती ओङ्कारनाथमङ्गलम्, मातृपूजनम्, उत्तरकुरुक्षेत्रम्, राजर्षिसुरथम्, काशीकोशलेशम्, अरुणाचलकेतनमिति।

चाणक्यविजयम्

भारतीयसंस्कृतेः भारतवर्षस्य च महिमपूजनार्थं रसमञ्जुलं संस्कृतनाटकमिदमिति सूत्रधारस्य चाणक्य-विजय-प्रशस्तिवचनम्। पञ्चमाङ्केऽस्मिन्नाटके चाणक्यः स्वप्रयत्नेन चन्द्रगुप्तस्य शौर्येण च तं राजपदे प्रतिष्ठाप-यति। तदनन्तरं च तपोवन-प्रस्थितः कथयति—

धर्मराज्यं प्रतिष्ठाप्य भारते श्रीगुणान्वितम्। पूर्णव्रतोऽस्मि सानन्दं गच्छामि तपसे वनम्॥

चाणक्यस्यासीत् काचित्, शिष्यबालिका। तां स सन्दिशति खण्डच्छिन्नविक्षिप्तं भारतवर्षमैक्यं प्रापय।

बाल्मीकि-संवर्धनम्

पञ्चमाङ्के बाल्मीकि-संवर्धने दस्युराजो नायको ब्रह्मप्रसादेन आदिकविर्भवति। नाटकमिदं भारती-संस्कृति-विमर्शनिर्भरः प्रेक्षकं साधूस्नयति। अत्र कविवचनं प्रमाणम्-कलुषनिपीडितस्य मानवात्मनो बन्धनमुक्ते-रितिहासः। तत्साधनया मानवः पूर्णो भवतीति आख्यानस्यास्य शाश्वती वार्ता। सा हि बाल्मीकेः पुण्यचरित-कथाभिषिक्ता प्रेमगंगा प्लावनेन चित्तं पावयति, प्लावयति च भूतलमानन्दमय-भक्तिरसप्रवाहेण। ब्रह्मा तं सन्दिशति-उत्तिष्ठब्रह्मन्, परिहर योगसमाधिं जगतां कल्याणाय।

यतीन्द्र - विमलचौधुरी

वङ्गदेशे कधुखिलग्रामे कर्णफुलीनद्यास्तटे 1908 खीष्टाब्दे जातो यतीन्द्रः स्वल्पसाधनस्यापि पितुर्महतोत्साहेन स्वदेशे कलकत्ता-नगरस्य सर्वोच्चशिक्षणसंस्थासु अधीत्य Woman in Vedic Ritual विषये शोधनिबन्धेन लन्दनविश्वविद्यालयतः पी-एच.डी., उपाधिं लब्धवान्। भारतं प्रत्यागतः स वङ्गदेशस्य

---

1. कथंनाम कतिपयनाटकानि प्रकाशितानि न सन्तीति स निवेदयति-अर्थसंगतेरभावात्-ग्रन्थानांमुद्रापणे मेऽसामर्थ्यमेव तत्कारणम्।

सर्वोच्चसंस्थासु संस्कृतं शिक्षयामास। रामकृष्णस्य संस्थासु कार्यव्यापृतो बभूव। 1943 ख्रीष्टाब्दे स प्राच्यवाणीति संस्थां संस्कृतस्य विपुलोत्कर्षाय स्थापितवान्। अस्या संस्थाया मुखपत्रिका प्राच्यवाणी यतीन्द्रेण सम्पादिता। प्राच्यवाण्या उद्देश्यान्यघोविधानि सन्ति—

(1) "विश्वात्मकं सौमनस्यं जायते" एतदर्थं विश्वसंस्कृतीनां तुलनात्मकमध्ययनस्य निबन्धानां प्रकाशनम्।

(2) संस्कृत-प्राचारार्थं पुस्तकालयानां स्थापनम्।

(3) विदुषां भाषणस्यायोजनम्।

(4) छात्रप्रतियोगितायोजनम्।

यतीन्द्रो दिव्यस्वरूपो दिव्याचरणः, करुणापूरः महान् कर्मयोगी चासीत्। अनन्यशक्तिश्रद्धा-समन्वितस्य तस्य कार्यदाक्षिण्यं तेन साफल्यार्जनं च कस्य मनो न रमयति। यतीन्द्राद्यज्ज्ञान-विज्ञान-संस्कृति-ज्योतिर्विच्छुरितम्, तत्तु संस्कृतानुरागिणां कृते प्रकाश-स्तम्भ इव राराजते। तस्य महानुभावे सनातनार्षसंस्कृतिः प्रत्यक्षीबभूव। रवीन्द्रभारत्या अधोवाक्यं तस्य प्रेरणास्रोतश्चकासते—

आमार सकल काँटा धन्य करे फुटवे गौ फुलफुटवे
आमार सकल व्यथा रंगीनहोय गुलाब होय उठवे॥

स विश्वमानवताया अनुमापक आसीत्। देश प्रेमोत्साहोपि तस्य विश्वमानवतां समाश्रित्य प्रवर्तते। "अस्मिन् जगति सर्वमीश्वरस्य सन्ततिभूतं सम्मान्यम्" इत्येवं श्रद्धः स स्पृश्यास्पृश्योच्चनीचादिभावनां विरोधकः सवर्रक्षकोऽशोभत। मनोबलेन शिवसंकल्पेन चाभ्युदया उपेया इति तस्यादर्शः।

यतीन्द्रसाहित्यं चतुर्दिशं निबद्धम्—

(1) सर्जनात्मकं काव्यम् (2) शोधनिबन्धाः (3) सम्पादितग्रन्थाः (4) अनुवादाश्च। सर्जनात्मककाव्येषु संस्कृतेन नाटकत्रयं पालिभाषया चैकं नाटकमस्ति। विवेकानन्दमधिकृत्यैका चम्पूः तेन निर्मिता। मातृलीलादिगीतकाव्यं तेन विरचितम्।

शोधग्रन्थेषु Contribution of Women to Sanskrit Literature
सप्ताभागेषु Contributions of Muslims to Sanskrit Literature
त्रिभागेषु Muslim Patronage to Sanskrit Learning
भागत्रयेण Contribution of Bengal to Sanskrit Literature
भागत्रयेण निष्पादितानि। तस्य सम्पादितग्रन्था बहवो नैकविधाश्च सन्ति। तेषु प्रमुखाः सन्ति संस्कृत-कोशकाव्य-संग्रहः भागचतुष्टयेन, भ्रमरदूतकाव्यम्, वाङ्मण्डनदूतकाव्यम्, चन्द्रदूतकाव्यम्, हंसदूतकाव्यम्, पान्थदूतकाव्यम्, घटकर्परकाव्यम्, पदाङ्कदूतकाव्यम् च। तेन सम्पादितानि ऐतिहासिककाव्यानि सन्ति-अब्दुल्ला-चरितम्, सुरजन-चरितम्, वीरभद्रचम्पू, जामविजय-काव्यम् च।

बङ्गभाषया तेन बहवो ग्रन्था निबद्धा।

यतीन्द्रस्य नाटकानि चतुर्विधानि सन्ति—

1. मातृभूमिवर्णनात्मकानि-महिममयभारतम्, मेलनतीर्थम्, भारतहृदयारविन्दम् ।
2. लोकनायकगाथात्मकानि-भास्करोदयम्, भारतविवेकम्, भारतराजेन्द्रम्, सुभाषसुभाषम्, देशबन्धु-देशप्रियम् ।
3. नारीगौरवात्मकानि-आनन्दराधम्, शक्तिशारदम्, मुक्तिशारदम्, अमरमीरम्, भारतलक्ष्मीः निष्किञ्चन-यशोधरम् ।
4. वैष्णवभक्तचरितात्मकानि-महाप्रभुहरिदासम् । विमलयतीन्द्रम्, दीनदासरघुनाथम् ।

महिममयभारतम्

1958 ख्रीष्टाब्दे विरिचितस्य महिममयभारतं नामोपरूपकस्य प्रथमाभिनयः प्राच्यवाणी-परिषदा 1959 ख्रीष्टाब्दे तालकटोरागार्डन-नामके स्थले केन्द्रीयशासनस्य नाटकविभागस्य समाश्रयेणायोजितम् । तत्र दर्शकेषु प्रधानतमौ लोकसभा स्पीकरोऽनन्तशयनम्-आयङ्गारमहोदयः, सूचनामंत्री केशकरमहोदयश्चास्ताम् निर्देशनं श्रीमत्या रमादेव्या कृतम् । अभिनेतार आचार्यास्तेषांछात्राश्चासन् । नारीभूमिकायां स्त्रिय आसन् ।

नदीनां महिमामात्र ऋषीणां देवानां राजकुमारीणां बालानां च स्तुतिपरककार्यततिभिर्निरूपितः पञ्चाङ्कैः । वैदिककालादारभ्याद्यावधि भारतीयसंस्कृतेर्निदर्शनमत्रप्रकल्पितः ।

मेलनतीर्थम्

दशाङ्के मेलनतीर्थे भारतीयसंस्कृतेर्बहुनां धाराणां परस्परोत्कर्षविधायिप्रवृत्तयोऽथर्वागस्त्याशोकाकबर-चैतन्यमहाप्रभु-विवेकानन्द-गान्धि-जवाहरलालमहाभागानां विश्वमैत्री प्रयासाश्च सन्दर्शिताः ।

भारत–हृदयारविन्दम्

पंचाङ्के हृदयारविन्दे तस्य नायकस्यारविन्दस्य छात्रजीवनादारभ्य भारतीय-स्वातन्त्र्य-प्राप्तिदिवसं यावद्देशाभ्युदयात्मकं चरितं निरूपितम् । तेन केम्ब्रिजनगरे शिक्षमाणो लोटस-डैगर-नाम्नी संस्था भारती-स्वतन्त्रतायै गुप्तकार्यकारिणी स्थापिता । तेन स्वभ्राता वारीन्द्रोऽपि देशकार्यार्थं व्रतानुबद्धः । स प्रतिज्ञातवान्-निष्कामस्य हि कर्मणः प्रतिकृतिगीतेश्वरेणोदिता, खड्गश्चात्मपशुत्वखण्डन-फलः शक्तेः प्रतीकश्च सः ।
गींता चेतसि संस्थिता करगतः खड्गश्च येषां सदा, सेवायामधिकारितामधिगतास्ते देशमातुर्ध्रुवम् ॥

1902 वर्षेऽरविन्दः कांग्रेसाधिवेशने भारतस्य पूर्णस्वातन्त्र्यस्य घोषणा प्रस्तावेन संस्कृताम-वाञ्छत् । स समग्रभारते सशस्त्रजागरणभियेष । वङ्गदेशस्य स्वातन्त्र्यसंग्रामे स वन्दीकृतः । न्यायालये चित्त-रञ्जनदासस्तस्याधिवक्तातर्कयत्

आद्योपान्तं वाच्यमेकं ममैतद, आस्तां राजद्रोहवार्ता विदूरम् ।
देशप्रेमोद्बुद्धभावं विशुद्धं, कोऽपि द्रोहः स्प्रष्टुमेनं न शक्तः ॥

परतः स देशस्य स्वातन्त्र्य-समुत्थानाय पाण्डिचेरीं गतः आश्रम आध्यात्मिकसाधनं कल्पयामास। 1947 ख्रीष्टाब्दे भारतं स्वतन्त्रमभवत्। देशस्य खण्डनेन स विक्षुब्धोऽभवत् तत्र नेपथ्यात् श्रूयते—

जन्मभूमिः भारतजननि गङ्गा गोदवारी—नर्मदा—कावेरी—पुण्यधारा—पीयूषिणी दशभुज—विलासिनी दशदिशोल्लासिनी देववन्द्य भारतजननी।

धर्मपताकेति विजयपताकारविन्दस्याश्रमकुटीरे मात्रा समुच्छ्रीयतेस्म।

भास्करोदयम्, भारत-भास्करम्, भुवनभास्करम्

रवीन्द्रमधिकृत्य नाटकत्रयं प्रणीतं यतीन्द्रेण। तत्र भास्करोदये पञ्चदशाङ्कै रवीन्द्रस्य विकासमयी आरम्भिकी जीवनगाथा निरूपिता। भास्करमासे परतः पञ्चविंशतिवर्षाणां चरितगाथा वर्तते। भुवनभास्करे पुनरन्तिमाश्चरितगाथा वर्णिता। इदं नाटकत्रयं चरितात्मकं विलसति।

भारतविवेकम्-विश्वविवेकं च

विवेकानन्दमाश्रित्य यतीन्द्रेण नाटकद्वयं-भारतविवेकम्, विश्वविवेकं चेति प्रणीतम्। जीवनचरितात्मकः कथाविन्यासस्तत्र वतर्तते।

भारतराजेन्द्रम्

भारताजेन्द्रे राष्ट्रपतिराजेन्द्रस्य जीवन-चरितं निरूपितम्। राजेन्द्रः प्रथमराष्ट्रपतिश्चारित्रिकदृष्ट्यापि प्राथम्यमर्जितवान्। यथा नाटकमिदं दर्शयति राजेन्द्रस्य प्रत्यणु समग्रं भारतं सन्निवेशितमासीत्।

सुभाष-सुभाषम्

षडङ्के नाटकेऽस्मिन् चरितनायकस्य सुभाषस्य छात्रावस्थानन्तरं विदेशगमनवृत्तं निरूपितम्। स आई. सी. एस. नियुक्तये प्रशिक्षणं गृहीतवान्। परतः भारतीयस्वातन्त्र्य-संग्रामायात्मानम् जुहाव। तस्य विदेशगमनं तत्र ससैन्यंभारतीय-स्वातन्त्र्ययोजना-प्रवर्तनं च सम्यक् वर्णितम्।

देशबन्धुदेशप्रियम्

नवाङ्के देशबन्धु देशप्रिये चरितनायकस्य देशबन्धोर्महिममयो देशव्रतानुबन्धो वर्णितः। तस्य बहुमूल्यजीवनस्याधिकांशः कारागारे व्यतीतः।

रक्षकश्रीगोरक्षम्

सुप्रसिद्धयोगिनो गोरक्षनाथस्य भारतीयचरित्रनिर्माणावदानमस्मिन् सप्ताङ्के नाटके विस्तारेण निर्दशितम् स गुरुणा पृथिवीं रक्षितुमादिष्टः। स गान्धारं यावद् यत्र तत्र सर्वत्र भ्रमणं कृत्वा गोरक्षव्रतं प्रतिष्ठापयामास।

निष्किञ्चनयशोधरम्

सप्ताङ्के नाटकेऽस्मिन् नायिकाचरितमेव प्रधानम् । नायकस्य सिद्धार्थस्यानुषङ्गिकं चरितं सह-वर्णितम् । भर्तृवियोगानन्तरं यशोधरा तपोऽतप्यत । सप्तवर्षानन्तरं निर्वाणमवाप्य सिद्धार्थः कपिलवस्तु समागम्य स्वपुत्रं राहुलमपि भिक्षुपथं नयति । यशोधरा बुद्धानुज्ञया भिक्षुणीसंघं घटयति । सान्तिमकाले गौतमे विलयति ।

शक्तिशारदम्

नाटकेऽस्मिन् यतीन्द्रो रामकृष्णस्य पत्नीं शारदां शक्तिरूपेण प्रस्तौति । स तां प्रबोधयति—

येयं सृष्टिलयस्थितिप्रणयिनी काली करालानना ।
त्वं तादृश्यसि लेशतो न ततो भिन्नेति मन्ये ध्रुवम् ॥

मरणानन्तरं सा पत्यास्वकीयमवशिष्टं कार्यजातं निष्पादयितुं नियुज्यते ।

आनन्द-राधम्

एकादशाङ्केऽस्मिन्नाटके राधाकृष्णचरितगाथाः वर्णिताः सन्ति । राधाकृष्णस्य विश्वव्यापि प्रेमस्वरूपं निदर्शयति ।

नाथ रे त्वमेव मे जीवनशरणम् । (2.32)

कृष्णकंसयोर्युद्धं रंगे प्रेक्षणीयं कृतम् ।

प्रीतिविष्णुप्रियम्—भक्तिविष्णुप्रियम्

एकादशाङ्के नाटकेऽस्मिन् चैतन्यपत्न्या विष्णुप्रियायाश्चरितगाथा प्रेक्षणीया । भक्तिविष्णुप्रियमिति नाटकं पूर्वनाटकस्याग्रे प्रवर्तते ।

मुक्तिसारदम्

रामकृष्णस्य पत्न्याः सारदामणेः परवर्तिचरितगाथाद्वादशाङ्केमुक्तिसारदे वर्णिता । अत्र सा पत्युरा-दर्शान् प्रचारयति । विवेकानन्दस्तयानुमतो गुरोर्ज्ञानं भारतीयसंस्कृतिं च विदेशेषु प्रचारयति ।

अमरमीरम्

द्वादशाङ्कममरमीरमिति नाटकं मीराया विवाहोत्तरं चरितं प्रदर्शयति । पत्या परित्यक्ता मीरा शिष्या भूत्वा रामदासस्याश्रममुपवसति । तत्र तस्या विषपानस्य कथानकमपि प्रपञ्चितम् । कालानन्तरं सा बृन्दावने रूपगोस्वामिन आश्रमे समाश्रयं भजते ।

भारतलक्ष्मी

दशाङ्के नाटकेऽस्मिन् परमवीराङ्गना लक्ष्मीवाई नायिका वर्तते। सा 1857 खीष्टाब्दे झांसी-रक्षणाय भारतीयस्वातन्त्र्याय चायुध्यत। ग्वालियरसमीपं युध्यमाना सा दिवंगता।

महाप्रभुहरिदासम्

1958 खीष्टाब्दे विरचितेऽस्मिन्नाटके भक्तहरिदासचरितं निरूपितम्। हरिदासस्य विरोधिनः कथं तं सन्तापयितुं प्रायतन्तेति वर्णितमत्र। परतश्चैतन्येन सह तस्य समागमो निर्दशितः।

विमलयतीन्द्रः

सप्तदशाङ्केनाटकेऽस्मिन् रामानन्दाचार्यस्य चरितगाथा वर्णिता। चरितात्मकनाटकेष्विदं प्रभविष्णुतमं विद्यते।

दीनदास-रघुनाथम्

यतीन्द्रानुसारेणेदं महानाटकम्। तत्र द्वादशाङ्काः विलसन्ति।

यतीन्द्रस्य नाट्यभाषा सुसरला विद्यते। स स्वयमेव कथयति—

It has been my ambition to popularise Sanskrit amongst all sections of people of India. And it is for this purpose that our dramas have been composed. The easy flow of Sanskrit must not find any impediment in the rocky thickets of obsolete words or cross-currents of peculiar uses. Anandaradham P age VIII of the preface.

रमाचौधुरी

रमाचौधुरी सद्यःपूर्वोक्तस्य महानाटककारयतीन्द्रस्य सहचरी पत्युर्नाट्यपथमनुसरन्ती अद्यापि तन्मया नित्यं नाट्यसुधां वर्षन्ती संस्कृतानुरागिणः परितर्पयति सा आङ्गलदेशेऽधीत्याक्सफोर्डविश्वविद्यालय-तोडी०फिल् उपाधिमर्जितवती, त्रिशत्समाः प्राचार्या सती सप्तवर्षाणि रवीन्द्रभारती-विश्वविद्यालयस्योपकुल-पतिरासीत्। न केवलं भारतेऽपितु विदेशेष्वपि सा संस्कृतरङ्गमायोजयति स्वयमपि महनीयभूमिकामभिनयति च। 1970 तमे खीष्टाब्दे सा जर्मनराज्याधिकारिभिः सर्वोच्चसम्मानैर्विभूषिता। आङ्गलभाषया वंग-भाषया च तया बहवो महत्वपूर्णग्रन्था प्रणीताः। तस्या नाटकेषु कतिपयानि वर्ण्यन्ते।

शंकर शंकरम्

चतुर्दशदृश्येषु विभक्तमिदं शंकरशंकरनाम नाटकमद्वैताचार्यस्य महागुरोः शङ्करस्य चरितं विशदयति। अस्य प्रथम प्रयोगः 1965 खीष्टाब्दे नेपालदेशे भारतीयदूतावासस्य समाश्रये रमादेव्या-

योजितः। नाट्याभिनयस्य दर्शकेषु तत्रत्यमहाराजः सकुटुम्ब उपस्थितः । स स्वयमेव सर्वेभ्यः पात्रेभ्यः पुरस्कारान् प्रादात् ।

नाटकेऽस्मिनष्टवर्षीयः शङ्करो मातुरनुज्ञया संन्यासी बभूव । प्रथमगुरोर्गोविन्दपादस्य आदेशस्तस्मै आसीत्—

दिग्विजयं कुरू । प्रचारय महिमामयं ब्रह्मतत्त्वम् । सर्वमेव ब्रह्म । काश्यां समागतं तं सद्योविधवा काचित उपादिशत—

तत्र शक्तिस्वरूपिणी जगज्जननी एव कर्त्री, धर्त्री हर्त्री । जगति सर्वमेव सा । सा हि केवलम् । सकुक्कुरः कश्चिच्चाण्डालस्तमुपादिशत्—नाहं वारणीयः । अहमपि ब्रह्म । मम कुक्कुरा अपि ब्रह्म । एतेभ्यो घृणा कथं स्यात् ।

परतो वाराणस्यां स शिवेनादिष्टः —ब्रह्मसूत्रस्याभि नवां व्याख्यां लिखतु इति । एतदर्थं स वदरिकाश्रमं जगाम । भाष्यरचनानन्तरं स दिग्विजयार्थं प्रस्थितोऽन्तराल उपनिषदां भाष्यं निबद्धवान् ।

प्रयागे समागतः शङ्करः कुमारिलेन शास्त्रचर्चां व्यधात । तेनादिष्टस्तस्यशिष्येण मण्डनमिश्रेण च विवादमकरोत् माहिष्मत्याम् । मण्डन एकाकी तस्य पराजयेऽसमर्थः स्वपत्न्योभयभारत्या साह्येन कामशास्त्रीयप्रश्ननिर्झरिण्यां त निमज्जितवान् । शङ्करःपुनः शारदापीठे, कामरूपे नेपाले चाचार्यान् पराजित्य सर्वङ्कषो बभूव ।

मरणासन्नः शङ्करः केदारनाथे द्वात्रिंशत्तमे वयसि स स्वकार्यजातं वर्णयति चतुष्प्रान्तेषु चत्वारो मठाः-द्वारकायां शारदामठः, पुर्यां गोवर्धनमठः, विष्णुप्रयागे ज्योतिर्मठः रामेश्वरे शृङ्चेरी-मठः स्थापिताः । तत्र वेदानां विशेषाध्ययनाध्यापनानि प्रवर्तन्ते । इमे मठा भारतीयैक्यं शाश्वतं दृढीकर्तु विश्वविद्यालया एव ।

नाटकेऽस्मिन् शङ्करस्याद्वैतवेदान्तो मधुरं मधुरं सरलवाचा सर्वजनग्राह्यःकृतः ।

देशदीपम्

नाटकेऽस्मिन् ग्राम्यसंस्कृतिं समाश्रित्य चम्पकवदन इति नायकस्य देशरक्षार्थमात्मबलिदानं निरुपितम् । नायककार्यस्थली-कथावस्त्वादि दृष्ट्या नाटकेऽस्मिन् बध्योऽभिनवाः प्रवृत्तः सन्दर्शिताः । ग्रामजीवनस्य प्रत्यक्षदृष्टमिवावलोकनमत्र वर्तते ।

पल्लीकमलम्

नवदृश्येषु विभक्तमिदं नाटकमभिनयद्वारेण प्राकृतिकमनुपमं सौरभं भूयिष्ठं वितरति । नायिका कमलकलिका गायति —

विभुपदवहनां दुष्कृतदहनां नमामि जननीं पल्लीम् ।
घनवन-गहनां परमतसहनां विकसितकुन्दकमल्लीम् ॥

कविकुलकोकिलम्

दशदृश्येषु विभक्तं कविकोकिलं नाम नाटकं कालिदासस्य काव्य-प्रतिभा-विकासमधिकृत्य निष्पादितम्। नैसर्गिकवैभवं प्रातिभचक्षुषा पश्यन् ग्राम्यबालः कालिदासः परानन्दमनुभवतिस्म पाठशालातु अपरं नाम कारागारस्येति तस्याभिप्रेतम्। निसर्गजनन्या वनविद्यालयस्तस्मै रोचते। एकदा विद्यावती स्वयंवरे पराङ्मुखा पण्डितवरा मूर्खतमन्विष्यन् कालिदासममिलन् यदा स कस्यचिद वृक्षस्य तामेव शाखामुच्छेत्तुमुद्यतोऽभवत् यस्या उपरि स आसीन असीत्। अवाङ्मुखः "कालिदासोऽङ्गुलिचालनमात्रेण विद्यावती पराभविष्यति शास्त्रार्थे, इति विचार्य पण्डिता निवेशार्थिनं तं विद्यावती परिग्रहाय निन्युः। पण्डितानां कूटव्याख्याभिः कालिदासस्यार्थविरहितान्यपि सङ्केतोत्तराणि विद्यावत्याः पराजयायालमिति सम्मतम्। वासकगृहे तया कालिदासस्य मौर्ख्यं तस्य उट्रइति शब्दप्रयोगेण प्रतीतम्। तिरस्कृतः कालिदासः सरस्वत्याः प्रसादेन कविकुलकोकिल इत्युपाधिं लब्धवान्। परतः पतिरूपेण विद्यावत्या कविसार्वभौमरूपेण विक्रमादित्येन च समादृतः। तत्र कालिदासस्य विश्रुता प्रतिपत्तिः प्रचारिता-काव्यमेव हि श्रेष्ठं शास्त्रम्। काव्यमेव हि जीवनस्य मूलभूतं सत्यम्। अन्यानि शास्त्राणि सन्त्यवराणि इति।

मेघमेदुरमेदिनीयम्

नवदृश्येषु विभक्तं मेघमेदुरमेदिनीयमितिनाटकं मेघदूतस्य कथायाः पूर्ववृत्तं पश्चाद्वृत्तं च निरूपयति। प्रकृतेः प्रतीकाः सन्ति पात्राणि-नायकोऽरुणकिरणः नायिका कमलकलिका, प्रतिनायकः प्रचण्डतापः, अनुनायको मेघः।

युगजीवनम्

दशदृश्यात्मके युगजीवने स्वामि रामकृष्णस्य लोककल्याणप्रवृत्तयोर्वर्णिताः सन्ति। तस्य जीवनस्य प्रमुखघटनास्तत्र साङ्गोपाङ्गं निरूपिताः।

निवेदितानिवेदिनम्

निवेदितेति प्रख्याता महिला लन्दननगरे विवेकानन्दस्य प्रवासे तस्य शिष्या भूत्वा भारतस्याभ्युत्थानपरायणा दरिद्राणां महिलानां च कृते स्वजीवनमर्षितवती। तस्या जीवनचरितं द्वादशदृश्यैर्नाटकेऽस्मिन् चित्रितम्।

अभेदानन्दः

अभेदानन्दो स्वामि-रामकृष्णस्य प्रमुखः शिष्य आसीत्। स रामकृष्णमठान् शङ्कराचार्यादर्शानुरूपं स्थापयाभास। संन्यासीभूत्वा स भारतस्य विदेशानां च धर्मविजयं कृतवान्। नाटकेऽस्मिन् द्वादशदृश्यानि सन्ति।

रमादेव्याः प्रायो नाटकानि चरितात्मकानि सन्ति। तथा हि रामचरितमानसे तुलसीदासस्य, रसमयरासमणौ राज्ञी रासमणेः, चैतन्य-चैतन्ये महाप्रभोश्चैतन्यस्य, भारतपथिके राजाराममोहनरायय

कविकुलकमले कालिदासस्य, भारताचार्ये राष्ट्रपतिराधाकृष्णस्य, अग्निवीणायाम् नजरुलिस्लामस्य गणदेवतायां ताराशङ्करवन्द्योपाध्यायस्य, यतीन्द्रे यतीन्द्रविमलचतुर्धुरीणस्य, भारतताते राष्ट्रपितुर्महात्मगान्धिनः प्रसन्न-प्रसादे च गायकस्य रामप्रसादस्य जीवन-चरितवैशंद्यंकर्तृत्वं च लोकोत्थानदृष्ट्या नाट्यसौरभसमायुक्तं निरूपितम् ।

सिद्धेश्वरचट्टोपाध्यायः

सिद्धेश्वरचट्टोपाध्यायः पूर्ववङ्गदेशे 1918 ख्रीष्टाब्दे जातः एम० ए० डी० फिल, डी० लिट्-काव्यतीर्थाद्युपाधिभिर्भूषितः वर्धमानविश्वविद्यालयस्य संस्कृतविभागस्य प्राचार्यपदं समलंकृतवान् । कलकत्ता-नगरस्य संस्कृत-साहित्य-परिषदः सचिवो भृंश सेवते संस्कृतम् नाट्यशास्त्रस्य परममर्मज्ञोऽयंजनः नाटक-लक्षणरत्नकोशंस्य समीक्षात्मकमध्ययनं कृतवानस्ति ।

सिद्धेश्वरस्य चत्वारि रूपकाणि-धरित्रीपति-निर्वाचनम्, अथकिम्, न नाविताडनम्, स्वर्गीयहसनं च सन्ति । एतानि सर्वाणि व्यंग्य-नाटिका इति कविता संज्ञितानि । स्व नाटिकानामभिनये स स्वयमपि अभिनेता सूत्रधार भवति । अभिनबा काचिद् रीतिः सिद्धेश्वरेणोन्नीता नाट्यरचनायाम् । तत्र नान्दी-प्रस्तावना-भरतवाक्यनि-च सन्ति किन्तु सन्धिः सन्ध्यंगादीनामभाव एव ।

वीरेन्द्रकुमारभट्टाचार्यः

भट्टाचार्योऽयं वङ्गदेशस्य सिलहट-जनपदे 1917 ख्रीष्टाब्दे जातः, कलकताविश्वविद्यालयतो लब्धोपाधिकः 1949 ख्रीष्टाब्दे डी० लिडुपाधिं लब्धवान् । परतः स 1942 ख्रीष्टाब्दतः 1949 यावत् सेण्टपालमहाविद्यालये दर्शनविषयस्य प्राध्यापकोऽभवत् । प्रश्चात् स केन्द्रीयशासनसेवायै वृतो महत्त्वपूर्ण-पदान्यंधिष्ठितवान् । तत्रापि स स्वाभिविकीं लेखन-प्रवृत्तिं नात्यजत् । तस्य दर्शन-विषयका ग्रन्था काव्यानि च संस्कृतेन, वङ्गभाषया, आंगलभाषया च रचितानि सन्ति । संस्कृतेन काव्यरचना तेन 1987 ख्रीष्टाब्दे समारब्धा । तस्य संस्कृति-स्रग्धरा शतपंक्तिभिः पूरिताजस्रं भारतीयोत्साहसंवर्धनायालम् । कविः काव्य-प्रवृत्तेर्माहात्म्यमधोविधं घोषयति—

हर्षमात्र न कापि कल्पते निःश्रेयसकामिनां प्रपञ्चनिवृत्तये तीव्रदुःखंकारूण्यहेतुकं स्फूर्त यदि मानसे महात्मनस्तु कवेः । निस्सेवं स्यात् काव्यामृतक्षरो वाल्मीकिमुखाद्यथा विनिर्गतश्च पुरा ।

कालिदास-चरितम्

रमादेव्याः पूर्वर्चचितस्य कविकुलकोकिलस्याभिनयं प्रेक्ष्य भट्टाचार्येण स्त्रीयप्रातिभचक्षुषा कालिदासस्य माहात्म्यानुरूपां तस्य जीवनचरितबिषयिणीं सत्यां कथामन्वियेष । तदनुसारेण कालिदासो बाल्यत एव कविर्बभूव । कदापि मूर्खो नासीत् विक्रमादित्यस्य परिषदि कालिदासस्य काव्यमाधुर्येणाकृष्टा राजकन्या कालिदासमेव वररूपेण प्राप्तुं सफला बभूव यद्यपि प्रथमप्रणयपदे कालिदासो विक्रमादित्येन षर्षपर्यन्तं निर्वासितः येन तयोः प्रेमानुबन्धः शिथिलो भवेत् ।

गीतगौराङ्गम्

गीतागौररङ्गं तु गेयनाटकं भट्टाचार्येण 1974 खीष्टाब्दे विरिचितम् । अत्र 81 गीतानि षड्भीरागै: 75 रागिणीभिश्च गेयानि सन्ति । कविस्तु नाट्यस्य विशेषाभिप्रायं भूमिकायां निर्दिष्टवान् । तद्यथा—

I have depicted Gauranga as an extraordinary dedicated rebel who primarily aimed at a social revolution through abolition of the perniciously custom-ridden caste system and preaching the lesson of universal love which he himself practised, Preface of Gauranga.

सकथयति

पुस्तकान्मे चिरंविश्वे बन्धुप्रेम विशिष्यते । जयतां जगति प्रेमधर्मः लभतां निखिलं शान्तिशर्म ।

सिद्धार्थचरितम्

नाटकमिदमष्टाङ्कैर्गौतमबुद्धस्य चरितं निरूपयति । अत्र मरालशावकस्य देवदत्तेन मर्मभेदनं, सिद्धार्थेन तस्य रक्षणम्, सिद्धार्थस्य वैराग्यविलसितम्, वैराग्योद्यतनानि चत्वारि दृश्यानि, रमणीभिस्तस्य रागोत्पादनं, बनाय प्रस्थानं, वने तपश्चरणं, सुजाताया भोजनग्रहणं, सिद्धार्थध्यानभंजन-प्रयासाश्च वर्णिताः । अन्ततः स चतुरार्यसत्यानामनुसन्धानं कृत्वा शिष्येभ्यस्तानि शिक्षयति स्म । अष्टमाङ्के स स्वपुत्रं राहुलमपि भिक्षुपक्षे नियोजितवान् । बुद्धः स्वाभीष्टं निष्पादयति—

पिता भिक्षुस्तथा पुत्रो भिक्षुणीमातास्य जन्मदा ।
भिक्षोर्हि गौतमस्याद्य भिक्षवः सर्वबान्धवाः ॥

शूर्पणखाभिसारम्

शूपर्णखाभिसारं पञ्चदृश्यैः शूर्पणखाया रामायाभिसारो लक्ष्मणेन तां प्रति प्रेम-प्रदर्शनम् रामेण लक्ष्मणस्य प्रबोधनम्, रामाज्ञया लक्ष्मणेन तस्या विरूपकरणं, शूर्पणखया भरतवाक्यमित्येतानि प्रकरणानि नेकस्थलेषु रामायणात् भिन्नानि प्रभवन्ति । अत्र लक्ष्मणस्य चरितं सौष्ठव-विहीनप्रदर्शितमिति कवेर्विफलता प्रतिभाति ।

भट्टाचार्यश्च शार्दूल-शकटे वाष्पशकटयान-श्रमिकाणांमान्दोलनं वेष्टनव्यायोगे शिलिपनां, कर्मकराणां वर्णितम् कवेरप्रकाशितानि नाटकनि सन्ति-मंजिनाचातुर्यम् । चार्वाक-ताण्डवम् सुप्रभा-स्वयंवरं, मेघदौत्यम्, लक्षणव्यायोगः, शर्मिष्ठा सौमनसम्, विद्यासागर-चरितं च ।

नित्यानन्दः

बङ्गावासी नित्यानन्दः कलकत्तानगरे संस्कृतमहाविद्यालयस्य भारती-भवनेऽध्यापकोऽभवत् । तेन मेघदूतं, तपोवैभवं, प्रह्लादविनोदनं, सीतारामाविर्भावमिति नाटकानि विरचितानि ।

मेघदूतम्

कालिदासस्य मेघदूताद् भिन्नतराः प्रवृत्तयो विलसन्ति अस्यां कृतौ । अत्र यक्षिणी पतिमन्वेष्टुकामा वनेषु पर्यटन्ती पतिविषये वृक्षं लतां च पृच्छति – हे वृक्ष वार्तां भण मे धवस्य जानासि पीडां पतिहीननार्याः— हीना त्वया याति लता गतिं यां स्मृत्वा सखे स्वीयगतां कथां ताम् । अत्र मेघस्तु साक्षात् कृष्ण इव सन्तापहारी यक्षदम्पतीं मिलति । गीतात्मकमिदं नाटकम् ।

प्रह्लादविनोदनम्

प्रह्लादविनोदने बालनारायणेन सह प्रह्लादस्य संवादो भवति । बालनारायणः छद्मेन प्रवक्ति-तव नारायणो निष्ठुरः कथं न स तव साह्यमाचरति । प्रह्लादस्तं तर्जयति दूरमपसर इत्यादि ।

सीतारामाविर्भावः

नाटकेऽस्मिन्नङ्कत्रयेण निरूपितं यत् कलियुगे सामाजिकदुष्प्रवृत्तयः, दुराचारः, अधर्माचारश्च नित्यं वर्धन्ते । भगवान् धर्मसंस्थापनार्थायावताररूपेण पुनर्जगत् शोधयितुमागमिष्यतीति आश्वासनम् ।

नित्यानन्दस्यान्तिमं नाटकं तपोवैभवं तस्य पितू रामगोपालस्य जीवनचरितं निरूपयति ।

श्रीरामवेलणकरः

वेलणकरोमहाराष्ट्रप्रदेशस्य रत्नागिरि जनपदे सारन्दग्रामे जातः मुम्बय्यां विलसनमहाविद्यालयेऽधीत्य एम० ए० उपाधिमर्जितवान् । स भारतीयशासनस्य डाकतारविभागे नियुक्तः सर्वोच्चपदमवाप्तवान् । तस्य गुरुर्हरिदामोदरवेलणकरस्तस्य संस्कृताध्ययनाध्यापनाभ्यां यावज्जीवं लोककल्याणवर्तनमियेष । तदनुसृत्य शासनसेवायां रतस्तस्मा विरतश्च निरन्तरं संस्कृताराधनायां संलग्नो विभाति । श्रीरामो यथानाम महासत्वसम्पन्नो निर्भीकः कर्मयोगीव राजते ।

श्रीरामः संस्कृतेन, मराठीभाषयाङ्गलभाषया च नैकविधं साहित्यं संवर्धयन्नास्ते । संस्कृतेन तस्य काव्यानि सन्ति–विष्णुवर्धापनम्, गुरूवर्धापनम्, जयमंगला, जीवन-सागरम्, जवाहरचिन्तनम्, विरहलहरी, जवाहरगीता गीर्वाणसुधा, अहोरात्रम् ।

संस्कृतनाट्यविरचने तस्य सातिशया गतिः वर्तते बहुविधाः सन्ति तस्य नाट्यकृतयः । तथा हि—

सङ्गतिनाटकम्-संगीतसौभद्रम्, कालिदास-चरितम्, कालिन्दी ।

संगीतनभोनाट्यम्-कैलासकम्पम्, स्वातन्त्र्य-लक्ष्मी, हुतात्मा दधीचिः, राज्ञी दुर्गावती,

स्वातन्त्र्यचिन्ता, स्वातन्त्र्य-मणिः, मध्यमपाण्डवम् । गीतनाट्यम्-मेघदूतोत्तरम् ।
विंशतिप्रायास्तस्य रूपकरचनाः सन्ति । तासु कतिपया अधोविवृताः ।

कालिदास-चरितम्

श्रीरामेण 1961 ख्रीष्टाब्दे संस्कृत-नाट्यमहोत्सवे संस्कृति-समित्या प्रयोजयितुं कालिदासचरितं विरचितम् । कल्पनामण्डितमत्र कालिदासवृत्तं तस्य काव्यप्रज्ञानिबन्धानुरूपं विलसति । कविर्मन्यते यत् कालिदास उज्जयिनीमहाराजस्य परराष्ट्रसचिवो योद्धुकामं विदर्भराजं मिलति सन्दिशति च ।

यदि न च परिहार्य सङ्गरः सर्वयत्नैः ।
समरचतुरे सेना नः सदा सिद्धहस्ताः ॥

विपरीतबुद्धिर्विदर्भराजेन स कारागारे निक्षिप्तः । कूटविधाभिः कालिदासः कारागाराद्विमुक्त उज्जयिनीं समागतः । तदनन्तरं स कुन्तलदेशे विक्रमस्य राजदूतोऽभवत् । बहुविधानि कुचक्राणि राजकुले जातानि कालिदासस्य पतनाय, किन्तु स मनस्वी नितरां सारस्वतः लोकेभ्यः काव्यदृष्टिं समर्पयितुं स्वतन्त्रजीवनं यापयितुं च सर्वबन्धविमुक्तो बभूव ।

कालिदासचरिते कवेर्जीवनौदात्तस्य प्रतिच्छाया प्रतिबिम्बति । कालिदासस्यापरं संस्करणमेव वेलणकरः इति प्रतिभाति ।

मेघदूतोत्तरम्

गीतनाट्यमिदं मेघदूतोत्तरं मध्यप्रदेशस्य कतिपयनगरेषु प्रयोजितं सुरभारतीनामिकया संस्थया । यक्षस्य वियोगानन्तरं यक्षिण्या तस्य मिलनभवश्यम्भावि वर्तते इति शाश्वतप्रवृत्तिः सर्वत्र कविवराणाम् । कालिदासेन नैतद्दर्शितम् । इयं तस्य त्रुटिरपाकृता श्रीरामेणास्मिन् गीतनाट्ये । तथा हि-कुबेरो यक्षाधिपः स्वयमेव राजगिरिमुपगम्य यक्षं प्रत्यवदत्—

यक्ष याहि द्रुतचरणं चिररहितं ते सदनम् ।
प्रतीक्षामाणां जायां सान्त्वय तामलकायाम् ।

हुतात्मा दधीचिः

रेडियो-नाटकमिदं पौराणिकर्षेर्दधीचेर्बलिदानं वर्णयति । काचिदभिनवा कथात्र विलसति । तदनुसारेण मेघव्रतः समुद्रेण निगडितः तस्य पत्नी समुद्रतटाश्रितं दधीचिं पत्युः स्वातन्त्र्यार्थं न्यवेदयत् । वृत्तासुरः साभिमानं समागत्य महर्षिं न्यक्करोतिस्म । परिणामतो महर्षे क्रोधाग्निना स दग्धः । तस्मिन्नग्नौ-स्वयमप्पदाहयत् ।

नाट्यमिदं संगीतिकमस्ति । आद्यन्तं गेयपदानि प्रवृक्तानि ॥

अस्मिन् नाट्ये प्रभञ्जनः कथयति—

स्वातन्त्र्यार्थं सकलजनता प्राणदानं हि कुर्यात् ।

कविर्नाट्यान्ते राष्ट्रं सन्दिशति—यदा यदा रिपुरुदेति भूमे वीरसुतः स्वयं जुहोति होमे ॥
स्वातन्त्र्ये मुक्तिः सति नियमे स्मरणमिदं स्यादनवरतम् ।

दिनेदिने सम्भवन्तु भुवने दधीचि-मुनयो मातृरक्षणे ।
तत्त्यागोज्ज्वलजीवनगाने श्रीरामसुधाव्रतचरितम् ।।

रानी दुर्गावती

रानी दुर्गावतीति गेयनाटकं संगीतिका वा 1964 ख्रीष्टाब्दे दिल्लीआकाशवाणीतः प्रसारिता। अस्या उद्देश्यं लेखकेन वर्णितम्—

नेतारो बहवो वसन्ति भुवने सत्तासनाधिष्ठिता
नित्यं सर्वजनोपदेशचतुराः स्वार्थार्जनैर्निर्जिताः ।
त्यक्तासुर्विरला तु भूमितनया रानीव दुर्गावती
तस्या जीवन-मृत्युकाव्यचरितं स्फूर्तिप्रदं स्यादिह ।।

रानी दुर्गावती अकबरीयाक्रमणादात्मानं रक्षितुं राजधानी-जाबालिपुरतो मण्डलां प्रति प्रायात् । मध्ये नरहीनद्यास्तोयविप्लवेन साभीष्टं स्थानं गन्तुमसमर्था मुगलसेनाभिर्युध्यमाना स्वनिग्रहणं नातिदूरं पश्यन्ती स्वयमेवात्मानं जघान ।

कालिन्दी

भौगोलिकमिदं रूपकं नाटिकेयमिति च लेखकेन संज्ञिता कालिन्दी हिंसाऽहिंसयोस्तुलनात्मके बलाबले नैकनायकानां परस्पर-संघर्षेण व्यनक्ति । अत्र पात्राणि प्रकृतिरूपाणि । यथा चण्डप्रताप इति प्रकृतिरूपेण सूर्यो मानवरूपेण अयोध्यानरेशः ।

कैलास-कम्पम्

कैलासकम्पमिति रेडियोनाटकमङ्कत्रयेण निष्पन्नं 1964 ख्रीष्टाब्दे दिल्लीतः प्रसारितम् । कथानुसारेण कैलासं परितोहिमालय-प्रदेशे चीनभारतयोर्युद्धं भवति । नाट्ये पात्राणि सन्ति कैलासः, शशाङ्कः, स्वर्गङ्गा, गणेशः, इन्दुः, उमा, महेश्वरश्च । युद्धान्ते सर्वत्र शान्तिर्विराजते ।

भारतस्य कथं कल्याणं भवेदिति कविः प्रतनोति—

विधाता बलानां नियन्ता खलानां
निहन्ता रिपूणां प्रणेता शुभानाम् ।
अनन्तावधिः शान्तितेजाः प्रजानां
विनेता प्रभो जायतां भारतानाम् ।।

स्वातन्त्र्यलक्ष्मीः

रेडियो-रूपकमिदं 1857 ख्रीष्टाब्दस्य क्रान्तिं निरूपयति । कविर्नायिकां राज्ञीलक्ष्मीं समुत्थापयति—

श्रीमातृक्षितिरक्षणे क्षतिरपि क्षान्त्या यथा लक्षिता
राष्ट्रैक्याय यया स्वकायविलयो धैर्यप्रकर्षोवृतः ।
मर्यादामबलापि दर्शितवती त्यागस्य या देवता
साध्वास्तां हृदयानि देशजनुषां स्वातन्त्र्यलक्ष्मीरिह ॥

सा आंगलशासकैः सन्धिं नैच्छत् ।

छत्रपतिशिवराजम्

पञ्चाङ्कात्मकमिदं बृहन्नाटकं शिवामहाराजस्य राज्याभिषेकस्य त्रिशतीमहोत्सवोपलक्षे विरचितम् अत्र शिवराजस्य शौर्येण, सत्त्वेन, समुदाचार-सौष्ठवेन च भारतस्याभ्युत्थानदिशा प्रकल्पिता वर्तते । तत्र 25 दृश्यानि 25 पात्राणि च विलसन्ति ।

तिलकायनम्

तिलकायनमङ्कत्रयेण तिलकस्याभियोगानां न्यायालये विचारणा-प्रक्रियां प्रस्तौति मण्डालेकारावासे च तस्य जीवनचर्या निरूपिता । नाटके तिलककृता प्रजा-प्रशस्तिर्वर्तते ।

श्रीलोकमान्यस्मृतिः

नाट्यमिदमङ्कद्वयेन तिलकस्य स्मृतिं जागरयति । प्रजानां तिलकं प्रति निस्सीमश्रद्धासीदिति प्रदर्शितमत्र ।

अमियनाथचक्रवर्ती

हरिनामामृतमिति नाटकस्य प्रस्तावनायां सूत्रधारः कवेः परिचयं प्रस्तौति परिषदः स्वकीयेन सदस्येन परात्मना, दुर्गानाथात्मजेनैव सतीनाथानुजेन च । श्रीमतामियनाथेन रचितं चक्रवर्तिना, सुबोध-संस्कृतैर्नाट्यं प्रतिवर्षं प्रदर्श्यते ॥

तत्रैव लेखकस्यान्यनाट्यकृतयः संज्ञितानि सन्ति धर्मराज्यम् सम्भवामि युगे युगे, श्रीकृष्णचैतन्यम् मेघनादवधं च ।

अमियनाथः एम० ए० काव्यतीर्थाद्युपाधिभिर्भूषितो राजकीयमहाविद्यालये प्राध्यापक आसीत् । हुगलीनगरे तेन संस्कृतपरिषद् स्थापिता । संस्कृतस्य प्रचारार्थं सरलभाषया प्रणीतानि नाटकानि तेन प्रयोजितानि । हुगलीनगरे तेन संस्कृतमहासम्मेलनमायोजितम् । 1970 ख्रीष्टाब्देऽमियनाथोऽदिवंगतः ।

हरिनामामृतम्

भक्तिरसप्राधान्ये हरिनामामृते महाप्रभोःश्रीकृष्णचैतन्यस्य नीलाचल-गमनंयावत् चरितं निरूपितम् । अत्र कीर्तन-नृत्य-गीतानां सम्मिश्रणेनाभिनयो बहुरोचते ।

धर्मराज्यम्

धर्मराज्यानुसारेण पाण्डवानामिन्द्रप्रस्थे धर्मराज्यं कौरवाणां च हस्तिनापुरे धर्मराज्यमासीत् । दिग्विजयानन्तरं पाण्डवानां राजसूय-यज्ञोऽभवत् । तस्मिन्नवसरे कृष्णं निन्दन् शिशुपालोहतः ।

पाण्डवान् पराजेतुं धृतराष्ट्रानुज्ञया द्यूतक्रीडा समारब्धा । तत्र द्रौपदी अपि कौरवैर्जिता । सापमानिता । तदाभीमेन प्रतिज्ञातं यत् दुर्योधनं तस्योरूभंजनेन हनिष्यामि । द्रौपद्याः केशकर्षणं दुःशासनेन कृतम् । द्रौपदीप्रतिज्ञातवती यदहं केशसंहारं दुःशासनस्य शोणितेन करिष्यामि । पुनरपि द्यूतं क्रीडितम् तत्र पराजिताः पांण्डवा वनवासायापाकृताः । नारदोमार्गे तेभ्यो निवेदयति-कथं नाम पाण्डवानां धर्मराज्यमखिले भारते प्रभविष्यति । कौरवाणामधर्मराज्यं विनंक्ष्यति चेति ।

प्रकीर्णानि रूपकाणि

गणेशपरिणयम्

काशीस्थो वैद्यनाथशर्मा बालकविरिति विख्यात 1902 ख्रीष्टाब्दे गणेश-परिणयमिति सप्ताङ्कं नाटकं विरचितवान् । अत्र गणेशसेना सिन्धुराजं जयति, देवाश्च कारागाराद् विमोचयति । ब्रह्मणः कन्या-सिद्धिर्बुद्धिश्च गणेशेन परिगृहीते ।

वसन्तमित्रभाणः

वसन्तमित्रस्य रचियितान्ध्रप्रदेशीयो मंगलगिरिः कृष्णद्वैपायनाचार्यो विंशशताब्द्याः प्रथमचरणे प्रादुरभवत् । तस्य नाटकं श्रीकृष्णदानामृतं सुप्रसिद्धम् । वसन्तमित्रभाणे देवदासीनां नर्तकीनां, वारवधूनां च चित्रणं विद्यते ।

कथं नाम सुगृहिण्यो वारं निषेवन्ते'' इति प्रदर्शितमत्र । तत्र वृद्धैः व्यूढाः, पतिभिरूपेक्षिताश्च वारवनिता भवन्ति । भाणेऽस्मिन्नात्मविस्मृतये ईश्वरवल्लीति मादकद्रव्यस्योपयोगश्चर्चितः ।

प्रकृति-सौन्दर्यम्

प्रकृति-सौन्दर्यमिति नाटकस्य रचयिता मेधाव्रतशास्त्री मूलतः सौराष्ट्रीयो महाराष्ट्रे नासिकसन्निधौ येवलाग्रामे 1893 ख्रीष्टाब्दे जातः । स महर्षि दयानन्दस्य व्याख्यानेन प्रभावितस्तस्य मतं स्वीचकार, येवलाग्रामे चार्यसमाजं स्थापयामास । तस्य पिता चतुर्थाश्रमे संन्यासी भूत्वा नित्यानन्द इति ख्यातो हिमालये शरणं जग्राह । मेधाव्रत आर्यगुरुकुलेष्वधीत्य वैदिकसंस्थासु नैकस्थलेष्वध्यापयामास । 1941 ख्रीष्टाब्दतोऽध्यापनं परित्यज्य स विविधप्रदेशेषु पर्यटन् वैदिकादर्शान् प्रचारयामास । 1947 ख्रीष्टाब्दे स वानप्रस्थमभिनिश्य योगाभ्यासं प्रारभत । दण्डकारण्ये कुसुरग्रामेतेन प्रतिष्ठापितं दिव्यकुञ्जोपवनं महादेवी नद्या उपतटं चकास्ते । तत्रत्या प्रकृतिरमणीयता सातिशयं मनोहरति ।

मेधाव्रतोबाल्यतः कविरभूत । प्रारम्भिकरचनास्तस्य देशोन्नतिकाव्यम्, ब्रह्मचर्यशतकम्, प्रकृति-सौन्दर्यं चासन् । स्वकृतीनां प्रकाशनाय स्वपत्न्या आभारणान्यपि विक्रीय स स्वीयं कुमुदिनीचन्द्र इति ख्यातमुपन्यासं

प्राकाशयत् । तेन नैकमहाकाव्यानि वहूनि लघुकाव्यानि, शतकानि, गीतकाव्यानि च विरचितानि । तस्य गद्यकाव्पेषु कुमुदिनी-चन्दं शुद्धिगंगावतारं हिन्दूस्वराज्यस्य प्रभातकाल इति सुप्रथितानि ।

एकमेव षडंकं नाटकं प्रकृति-सौन्दर्यं तेन विरिचतम् । एतस्य प्रथमाभिनयो वसन्तोत्सव आयोजितः । तत्र प्रकल्पिते विवृत्ते प्रकृतेर्मनोहारिवर्णनं नायकस्य राज्ञश्चन्द्रमौलेस्तस्थ मित्रस्य चन्द्रवर्णस्य च विमानयात्रा प्रसङ्गेन हिमालय-तपोवनानि, षड्ऋतुनिदर्शनं च समन्वितम् ।

पाण्डित्यताण्डवितम्

पाण्डित्यताण्डवितमिति प्रहसनस्य रचयिता 1895 ख्रीष्टाब्दे जातः काशीवासी वटुकनाथशर्मा हिन्दू-विश्वविद्यालयेऽधीत्य तत्रैव प्राध्यापकोऽभवत् । तस्य पाण्डित्यं सच्चारित्र्यं शिष्यानुरागश्च भूयिष्ठमवतं-सयन्तिस्म । तस्य प्रमुखकाव्यरचनाः सन्ति बल्लबदूतम्, शतकसप्तकम्, आत्मनिवेदनशतकम् सीतास्वयंवरं-महाकाव्यं च ।

नाटकक्षेत्रे वटुकमहाभागस्य नैसर्गिकी हास्यप्रतिभा विलसति । सोऽस्मिन् सन्दर्भे पण्डितसमाजस्य हेयविरूपप्रवृत्तीर्हलधरमिश्र - दण्डधरमिश्र - कैयटकैरव-साहित्य - सौरिभादीन् नायकीकृत्य विवृणोति । बटुको यथानाम शृङ्गारविहारं दाक्ष्येण परित्यजति नाटकेऽस्मिन् ।

परिणामः

चूडानाथभट्टाचार्येण सप्ताङ्कैः परिणामं नाटकं प्रणिनाय । स काटमाण्डूनगरे शासकीयमहाविद्यालये प्राचार्य आसीत् । तत्र योरपीय—संस्कृति—मृगमरीचिका—पाशित—युवतीयुवकानां पतनोन्मुख—प्रवृत्तयः सम्यगुपवर्णिताः ।

सिंहलविजयम्

उत्कलवासी सुदर्शनपतिः पञ्चाङ्कं सिंहलविजयं प्रणिनाय । अङ्का अत्र दृश्येषु विभक्ताः सन्ति । उत्कलराजेन पुरा सिंहलविजयं कृतवानिति वृत्तं निरूपितम् । उडिया-गीतानां यथोचितसन्निवेशः सविशेषं मनोहरति ।

मालाभविष्यम्, लालावैद्यम्, हा हन्त शारदे, ध्रुवावतारञ्च

नागपुरवासी स्कन्दशङ्कर-खोतः परिहास-परायणः प्रहसनविचरनेनातिशेते । मालाभविष्ये माला-चौर्यं समाश्रित्य मायापुरीवासिनां परिहासात्मकोजीवनविधिः वर्णितः ।

लालावैद्यं छद्मपरायणवैद्यानां हास्यकरचिकित्साविधानं निरूपितम् । "हा हन्त शारदे" इति प्रहसने शिक्षितपत्नीनां बुद्धिहीनव्यवहारेण शिक्षितपतीनां जीवनं शोचनीयं जातं इति प्रत्यक्षीभवति ।

स्कन्दस्य पत्नी कमला ध्रुवावतारे प्रहसनेन सहादर्शबालकस्य सुधीरस्य चारित्रकादर्शं ध्रुवानुरूपं निबध्नाति ।

काश्मीर–सन्धान–समुद्यमम् हैदराबाद–विजयम्

दक्षिण-कनारा-जनपदे कन्यानपुरे 1903 खीष्टाब्दे जातो नीर्पाजे भीमभट्टो विद्यार्थिजीवन एव नाट्यरचनां प्रारभत। तस्यैकाङ्क काश्मीर-सन्धान-समुद्यमस्याभिनयः परेडाल-महाजन-विद्यालयस्य वार्षिकोत्सव आयोजितः। नाटकेऽस्मिन् नेतॄणां प्रयासा वर्णिता येन कश्मीरदेशो भारतस्याङ्गमभवत् भट्टस्यापरं नाटकं हैदराबादविजयमिति प्रख्यातम्। स्वपराक्रमेण युद्धबलेव हैदराबादे भारतीयाधिकारः स्थापितः इति कथावृत्तम् नाटकेऽस्मिन् दश दृश्यानि सन्ति।

कृषकाणां नागपाशः

"कृषकाणां नागपाशः इति नामके रेडियो रूप के यथानाम कृषकाणां दुर्गतिर्निरूपिता। अस्य लेखकः प्रो० वागीशशास्त्री काश्यां सम्पूर्णानन्द संकृत-विश्वविद्यालयेऽनुसन्धानसञ्चालको विश्वविद्यालयस्य संस्कृत-शोध पत्रिकायाः सारस्वती सुषमायाः सम्पपादकश्चास्ति। नागपाशानुसारेण कृषकाणां दुर्दशा महात्मागान्धी शृणोति। स आदिशति यत् भूमौ सर्वेषां समानाधिकारः स्थात्। रूपकेऽस्मिन् ग्राम्यजीवनं, ग्राम्याणां परस्पर-व्यवहारश्च सम्यग्दर्शिते। यथास्थानं गीतानां प्रयोगेण रूपकस्यास्वादो वृद्धिंगतः।

नागेशम्

एकाङ्कमिदं नागेशं नाम नाटकं वामदेवेन विरचितम् लेखकः उत्तरप्रदेशे देवप्रयागस्य निवासी। नाटकेऽस्मिन् शृङ्गबेरपुरवास्तव्यो महावैयाकरणो नागेशो नायकः। काश्यां निवसतः नागेशस्य गृहे एकदा तस्य श्यालकः समागतः। भगिन्या दुर्दशां दृष्ट्वा स प्रावोचत्—

जीर्णापर्णकुटी प्रकामविवरा कालादनाप्तच्छदा। इति नागेशस्य पत्नी चिन्तितवती गृहे तु मूषका क्षुधया म्रियन्ते किं भोजयामि भ्रातरम्। सा नागेशं प्रत्यवदत्-भ्रात्रे नास्ति भोज्यं गृहे इति। नागेशः क्वचित् शुष्कं शाकं प्राप्तवानासीत्। तत्तु पत्न्यै दत्तं कार्यार्थं, तया च प्रक्षिप्तम्। क्वचित् किंचित् याचतामिति प्रार्थितः स पारेगङ्गं राजानं याचितुं नौकामारोहत् किन्तु तारिकं दातुं न समर्थः सोऽपाकृतोनाविकेन व्यंग्येन वर्जितश्च-किमसि नागेशो यमहं निःशुल्कं तारयेयम् इति। नागेशस्य स्वाभाविकी वृत्तिरासीत्
याचिते ह्यपमानं स्याज्जीवन्मृत्युरवाप्यते।

गृहं प्रत्यागतः स पत्नीं प्रबोधयत्—
यथेच्छं व्याहरेल्लोको मृत्युर्वाद्य भवेत्पुनः।
पदवाक्यप्रमाणज्ञो नागेशो नैव याचताम्।

तस्मिन् क्षणे तत्र समायातः प्रच्छन्न एव शृंगबेरपुरस्य राजारामसिंहो येन नागेशस्य नौकाया अवतारणं दृष्टमासीत्। स महापण्डितमजानात् तस्मै भूरिधनं दत्तवांश्च। वामदेवस्य लेखनी भावोत्कर्षिणी वर्तते। इदं रूपकं तु वैलक्षण्यं धत्ते नैकविधम्।

कुचेलम्, सैरन्ध्री

कुचेलस्य लेखिका श्रीमती देवकीमेनन मद्रासनगरे क्वीनमेरीमहाविद्यालये संस्कृतविभागस्याध्यक्ष-

आसीत्। ततो विश्रान्ता स केरलप्रदेशे एर्णाकुलम् नगरे वसतिस्म। कुचेलं सप्तभिः एकद्विपृष्ठात्मकाङ्कैः कृतम्। अत्र सुदामा (कुचेलः) नायको गार्हस्थ्ये नितान्तदरिद्र आसीत्। कृष्णदर्शनेन बहुधनं लब्धवानिति कथा। गेयप्रधाननाट्यमिदं आरभि-कापि-धन्यासि-मुखारि-हुसेनि-कल्याणीत्यादिभिः रागैर्मण्डितम्।

सैरन्ध्रीति गीतनाट्यं कृष्णस्य मथुरागमनकाले कृष्णबलरामयौः प्रसाधनकारिका पुण्यप्रभावेण पूर्वं कुब्जापि विशेष सौन्दर्यं लभते अस्य प्रेक्षणकस्यान्ते मङ्गलगानं प्रवर्तते।

कृतार्थकौशिकम्, सत्यसावित्रं, परशुरामचरितं च

कृतार्थकोशिकस्य रचयिता श्रीकृष्णजोशी अल्मोड़ानगरे जातः 1883 खीष्टाब्दे। प्रयागे स महा-महोपाध्याय-गङ्गानाथ-झामहोदयस्य डॉ० थीबो महाभागस्य च शिष्यौ बभूव। श्रीकृष्णस्य देशसेवा प्रवृत्तय उदग्रा आसन्। बङ्गभङ्गान्दोलने स सक्रिययोगदानमकरोत्। 1927 खीष्टाब्दतः स वाराणस्यां हिन्दूविश्व-विद्यलये धर्माध्यक्षपदमलंचकार।

श्रीकृष्णो बहुज्ञो बभूव। साहित्य-दर्शन-व्याकरण-वेद-वेदाङ्गादिषु प्रतिष्ठो नित्यं स्वाध्यायेन ज्ञान-संवर्धनं चकार। तेन रामरसायनं, स्यमन्तकमखण्डभारतमिति महाकाव्यानि सर्वदर्शनमंजूषामद्वैतवेदान्त-दर्शनं च रचितानि। षडङ्के कृतार्थकौशिके विश्वामित्रस्याल्पज्ञता कथा विलसति। महाराजगाधेः पुत्रो विश्वा-मित्रो दस्युभिर्वन्दीकृतः। दस्युराजकन्ययोग्रया स बन्धनाद्विमुच्यते। तया सह गान्धर्वरीत्यां व्यूढ आसीत् विश्वामित्रः। विश्वामित्रः तपोमार्गं परित्यज्य राष्ट्ररक्षणे व्यावृतो भवति।

हर्षदर्शनम्

1960 खीष्टाब्दे विरचितस्म हर्षदर्शनस्य प्रणेता पुण्यपत्तनवासी डेंग्वेकरपाण्डुरङ्गःशास्त्री बभूव। पाण्डुरङ्गः प्रागेव कुरुक्षेत्र-मिति महाकाव्यं लिखितवान्। पञ्चाङ्केऽस्मिन्नैतिहासिके नाटके हर्षस्य पूर्वभारतवि जयोपक्रमाः तत्सम्बन्धिकूटनयाश्च वर्णिताः सन्ति।

सुसंहतभारतम्

ओस्मानिया विश्वविद्यालयस्य संस्कृतप्राचार्यः पुल्लेलरामचन्द्रुडु संस्कृतेन नैककाव्यानि बहवो निबन्धा नाटकानि च विरचितानि। नाटकेषु सुसंहतभारतं तस्य श्रेष्ठा कृतिः[1]। षडङ्केऽस्मिन्नाटके भारतस्य एकसूत्र-निबन्धनाय संस्कृतस्य महिमा प्रशंसितः। वैदेशिका भारतस्यैक्यं न वाञ्छन्ति। भारतस्यैक्यं वाञ्छन्तो गान्धीनेहरू–पटेलादयो नेतारश्चिन्तिता सन्ति। भारतं स्वतन्त्रं भवतीति महती चिन्ता चर्चिलस्य। भारतस्य विभाजनं विपत्तिमयं जातम्। भारतीयशासकानां स्वदेशे च महान् भरोऽदृश्यत सर्वैः। नाटकस्य भरतवाक्यमस्ति—

---

1. सुसंहतभारतस्य प्रकाशनं सागरिकापत्रिकायाः तृतीयवर्षे प्रथमाङ्केऽभवत्।

स्वदेशक्षमार्थं सकलजनतासौ प्रयततां
पराश्चास्मत् सीमाक्रमणकुधियो यान्तु विजिताः ।
समृद्धोऽयं देशो विविधविभवैः संचितबलो
विधत्तां सर्वत्राप्यनुपहतशान्तिं च भुवने ॥

धन्योऽहं धन्योऽहम्, समानमस्तु मे मनः, धन्येयं गायनीकला

धन्योऽहं धन्योऽहमिमिति नाटके संस्कृतं तथा च सावरकरः–द्वे मे श्रद्धास्थानमिति तस्य लेखकस्य गजानन—बालकृष्णपलसुले—महोदयस्य सात्त्विकः परिचयः । पुण्यपत्तन—परिसरे 1921 खीष्टाब्दे जातः स एम० ए०, पीएच डी० उपाधिभिर्मण्डितः पुण्यपत्तनमेवाजीवनं कार्यक्षेत्रं कृतवान् । स संस्कृत - पाक्षिक - भारतवाणीपत्रिकायाः सम्पादको बहुविधसाहित्यं रचितवान् । तद्यथा-विनायक-वीरगाथा, विवेकानन्दचरितम् हिन्दूसम्राट्–स्वातन्त्र्यवीरः, सान्त्वनम्, वयमन्योऽन्यं पृच्छामहे, अग्निजाकमलेति । तस्य बह्व्यः कविताः देशभक्तिपराः प्रकाशिताः सन्ति ।

धन्योऽहं धन्योऽहमिति चतुरङ्कस्य नाटकस्य नायको वीर-सावरकरो भारतीय-स्वातन्त्र्य-संग्रामस्याग्रगण्यः सेनानीर्बभूव । अयं जनः कवेः श्रद्धाभाजनम् । स्वचरितनायकं नैकविधकाव्यप्रसूनैः सोऽपूजयत् । अत्र पञ्चदशवर्षीयः सावरकरः पित्रा सहारण्यकमधीते जीवनौदात्यं च परिचिनोति । तदनन्तरं स्वजीवनं सर्वशो भारतमातु-निगडमपाकर्तुं समर्पयामास आधुनिकशैल्या विरचितमिदं नाटकं चरितात्मकमस्ति ।

"समानमस्तु मे मनः" इति भारतस्यैकात्मता कथं दृढीभवेदिति त्रिभिरङ्कै र्निदर्शयति । लेखको भाषानुसारिराज्यविभाजनं विषमं पदं मन्यते । भारतस्यैक्यं निष्ठापयितुमादिकालतो महामनीषिणां प्रयासास्तेषां परिणामाश्च सम्यगुद्घाटिता अत्र । भारते" एकात्मताजीविनोऽपेक्षिता न तु केवलमेकात्मतावादिनः इति ब्रह्मवाक्यं सारभूतं विलसत्यत्र ।

"धन्येयं गायनीकला" पलसुले-महाभागस्य विशुद्धं प्रहसनं सर्वथा शृंङ्गारविरहितं संशोभते । नायकोऽत्र ठणठणपुराधीशश्चक्रमादित्यः कर्तनालयस्योद्धाटनं विधत्ते । तेन कस्यचिद् व्याघ्रस्य पुच्छं कृत्तम् । कथं नाम ग्रीवा न कृत्ता इति पृष्ठे । प्रत्युत्पन्नमतिः सकथयति-ग्रीवा तु केनचित् प्रागेव कृत्तासीत् । प्रहसनकारेष्वनन्यतम एव गजाननः ।

साक्षात्कारम्, अजेयभारतम्, केसरिचक्रमम्

साक्षात्कारस्य कविः शिवप्रसादो भारद्वाजो एम० ए०, एम० ओ० ल० उपाधिभिः समलङ्कृतो होशियारपुरे विश्वेश्वरानन्द-संस्थाने प्राध्यापक आसीत् । साक्षात्कारनामके भाणे तेन वामदेवनामकस्याभ्यर्थिनोऽध्यापकपदाय साक्षात्कारेऽधिकारिणामसंगतप्रश्नाः, वेतनविषमकोच्चावचवितर्कास्तेषां शोषणवृत्तिश्च हास्यकरविधिना समुपस्थापिताः । अजयेभारतमिति रेडियोनाटके भारतचीनयुद्धे भारतीयानां पराक्रमगाथाः निदर्शिताः ।

तत्र गीतं वर्तते—

जय जय भारत हे
कोटि - कोटि - जनकण्ठ - सुभृतरव
नित्यगीतगौरव - पुण्यस्तव ।

केसरिचङ्कुमाभिधे ध्वनिरूपके भारद्वाजेन लालालाजपतरायस्य समग्रं जीवनं संक्षेपेण चित्रयित्वा तस्वादर्शेन भारतीय लोकसेवायै, राष्ट्रसम्मान-रक्षायै च समुत्साहिताः ।

प्रतापशाक्तम्, सिद्धार्थप्रव्रजनम्, शिक्षणम्, जवाहरस्वर्गारोहणम्, कीचकहननम् अपूर्वः शान्तिसंग्रामः अन्वर्थकोलालबहादुरोऽभूत्

बहूनां काव्यानां रचयिता विश्वनाथः केशवच्छत्रे श्रेष्ठो नाटककारोऽपि महत्वमर्हति । मराठीभाषया-संस्कृतेन च बहु लिखितम् प्रमुखरचनाः सन्ति-सुभाषचरितम्, एकनाथचरितम् भारतीय-स्वातन्त्र्योदयम् । तस्य नाटकेषु प्रतापशाक्तं महाराणा-प्रतापस्य शाक्तसिंहेन पुनर्मिलनं वीररसप्रथया पल्लवयति । सिद्धार्थ-प्रव्रजनं संगीतनाटकमङ्कत्रयेण निष्पादितम् । अङ्का इमे दृश्यै विभक्ताः । चरितात्मकेऽस्मिन्नाटके यथानाम वत्तं विवृत्तम् ।

विश्वनाथस्य शिक्षणाभिधं नाटकं बाह्यतो यद्यपि प्रणयात्मकमस्ति, प्रधानतो अर्वाचीनशिक्षण-पद्धतेः दुर्विलसितं प्रपञ्चयति । अत्र छात्रा अध्यापकमुपहसन्ति बकोऽयं गच्छतीति । विद्यालयेषु छात्राणां, छात्रीभिर्मिलनायोगः तेषां चरित्रहासः, गिरिवनविहारेषु प्रणयानन्दोपक्रमाश्च, सुन्दरीणां छात्रीणा दर्शनाय युवकानां सम्मर्दं इत्यादयो वैदेशिकसभ्यतानुसरणेन भारतीयसंस्कृतेर्हानिमेव प्रकल्पयन्ति ।
जवाहरस्वर्गारोहणे जवाहरकालस्य स्वर्गे देवैः सम्माननं प्रदर्शितम् स्वर्गलौके स पूर्वजान् मिलित्वा परं प्रहर्षितोऽवलोक्यते । नन्दीवरप्रदाने रघुवंशस्य प्रथमाङ्कद्वयस्य वृत्तं निरूपितम् ।

अपूर्वः शान्ति-संग्राम इतिनाटके गान्धि महाभागस्य दाण्डी पदयात्रा-लवणनिर्माणं, शासकीयकर्मकरैः दण्डप्रहारश्च वर्णितानि ।

1966 ख्रीस्टाब्दे विरचितम्, "अन्वर्थको लालबहादुरोऽभूदिति नाटकं शास्त्रिमहाभागस्य पाक-प्रशमनयोजनां निरूपयति ।

भूपोभिषक्त्वं गतः

1956 ख्रीष्टाब्दे प्रणीतं गणेशशास्त्रिणो भूपोभिषक्त्वं गतः "इति नाटकमेकाङ्कं पञ्चप्रवेशेषु विभक्तं वर्तते अत्र नान्दी-प्रस्तावना-भरतवाक्यानि च संक्षिप्तानि सन्ति । कथा नायिका प्रोषितभर्तृका निर्मला रूग्णा बर्तते । धनं बिना न कश्चिच्चिकित्सक आगच्छेदिति चिन्ताग्रस्तः निर्मलायाः पुत्रः सुभाषो राज-मार्गे भिक्षमाणः प्रच्छन्नराजभावं भूपं मिलति । भूपस्तस्य वृत्तं श्रुत्वा तस्मै स्वर्णमुद्रां दत्वा वैद्यरूपेण तस्य गृहं गत्वा च रुग्णामपश्यत । नासीत् तस्याः काचिद् रोगबाधा । भोजनाभावात् कृशकाया स्वात्मानंरूग्णां बौधति स्म । पत्रे भूपः किंचिदलिखत । ततोगतवांश्च अस्मिन्नन्तराले सुभाषो केनापि वैद्येन सहागतः ।

वैद्याय निर्मला पूर्वागतभूपस्य पत्रमदाद् यस्मिन् लिखितमासीत् मुद्राशतं प्रेषयामि । भविष्येऽपि आवश्यकं धनं राजकोशतः प्राप्नोतु इति राष्ट्रियचरितनिर्माणायैतादृशानां नाटकानां महती उपयोगितास्ति ।

नारीजागरणम्, गोमहिमाभिनयः

काशीवासी पण्डितराजो दर्शनकेसरी गोपालशास्त्री काशीविद्यापीठे दर्शनविषयस्य प्राचार्य आसीत् । नैकशः स स्वातन्त्र्यसंग्रामे कारागारं गतः । तस्य नाटकेषु नारीजागरणाय भारतीयानां प्रायः स्मरणीयानां श्रेष्ठनारीणां सांस्कृतिकयोगदानं निरूपितम् । कविर्भारतीयमहिलां योरोपीय-संस्कृति-रञ्जितां द्रष्टुं न क्षमते । गोमहिमाभिनये लोकाभ्युदयाय गवां माहात्म्यं निर्दशितम् ।

शिववैभवं रमामाधवम्

महाराष्ट्रीयो विनायकवोंकीलः 1890 ख्रीष्टाब्दे जातः पुण्यपत्तने शिक्षा विभागे प्राचार्यो बभूव । तस्य नाटकेषु शिववैभवं रमा-माधवं चैतिहासिकवृत्तमुपजीवतः । शिववैभवे शिवराजस्य पञ्चाङ्केषु निरूपिताः । रमा-माधवे पेशवा–माधवरावो महाराष्ट्र-साम्राज्यस्य पतनकालेऽहर्निशंपरिश्रमेण संघीभूय शत्रून् विजयते स्म । तस्याः पत्नी रमाकविना वर्णिता—

नवविकसितपद्मं किं रमाख्यं गुणाढ्यं, सकलकुलवधूनां वैजयन्ती किमेषा ।
रमण हृदयरक्ता माधवस्यैककान्तिः, क्षितिपतितिवंशे शोभते पुण्यमूर्तिः ॥

जवाहरलालविजयम्

जवाहरलालविजयस्य प्रणेता रमाकान्तमिश्रो बिहारप्रदेशं स्वजनुषा समलमकरोत् । जवाहरलालो न केवलस्वयमोवोदात्तोऽपितु अपरेभ्यो जनेभ्यः कोटिश आत्मन औदात्त्यं वितीर्णवान् । तप एवासीत्तस्य सत्याग्रहयोजनायां कारावासः । आंगलशासकानां जवाहरस्य हानये कूटकर्माणि उद्घाटितानि नाटकेऽस्मिन् ।

पाददण्डम्, रामवनगमनम्

सागरस्था श्रीमती वनमाला-भवालकरदेवी सागरविश्वविद्यालये संस्कृत विभागे प्रवाचकपदाधिष्ठिता नैकलघुकाव्यानि नाटकानि चारचयत् । तस्याः पाददण्डमिति नाटकं भारत-चीनयुद्धप्रकरणमुपजीवति । युद्ध पंगूभूय निर्वर्तितो नायकः सुधीरः पूर्वं प्रणयिन्या ललितया सोल्लासपरिग्रहबन्धेन स्वीक्रियते । ललिता सुधीरस्य पाददण्ड इति लेखिकाया अभिप्रेतम् । वनमाला-देव्या नैकसंगीतनाटकाः प्रणीताः, स्वीयेनापि अभिनयेन रञ्जनीकृताश्च । तया अङ्कत्रयेण रामवनगमनम् पार्वतीपरमेश्वरीयं चोपनिबद्धे । उभे नाट्ये बहुरागापन्नैर्गीतिः समलंकृते ।

साम्मनस्यम्, आराधना, प्रबुद्धः, विडम्बना, माभूदेवम्

शङ्कराचार्येण साहित्य-मार्तण्डोपाधिना विभूषितः वासुदेवविष्णुपाठकोऽहमदाबादस्य महाविद्यालये प्राचार्यः सन् साम्मनस्यमिति त्रैमासिकपत्रिकायाः सम्पादकः नित्यनूतनकाव्यसर्जनाभिः संस्कृत-भारती समु-

न्नयति । बहुविधानि सन्ति वासुदेवस्य रूपकाणि । तेषां प्रधानमुद्देश्यं वर्तते चरित्रनिर्माणं, महापुरुषाणां देशोन्नायकानामादर्श स्थापनं च ।

१. वासुदेवस्य साम्मनस्यं एकाङ्कं प्रहसनं, आराधना पद्यात्मकनृत्यनाटिका, प्रबुद्धः नवदृश्यात्मकं नाटकम्, माभूदेवं पद्यात्मकनृत्यनाटिके, शूद्रापि पूज्या एकाङ्कनाट्यम्, विद्याधनं सर्वधनप्रधानम् एकाङ्क, नाट्यम् सर्वदमनः एकाङ्कं बालनाटकम्, दशमोग्रहः एकाङ्कप्रहसनम्, मङ्गलम् एकाङ्कं नाट्यम् इति रूपकाणि सन्ति ।

विवेकानन्दविजयम्

विवेकानन्द-विजयस्य प्रणेता श्रीधरो भास्करो वर्णेकरो नागपुरविश्वविद्यालये डी० लिट्० पर्यन्त-मधीत्य तत्रैव संस्कृत-विभागाध्यक्षः प्राचार्यश्च बभूव । बह्व्यस्तस्य रचनाः लघुकाव्यं, गीतकाव्यं, महाकाव्यं च सन्ति । तस्य महाकव्यं शिवराज्योदयं सर्गशतकैः शिवाजी चरितं वीररसोदितं वर्णयति । अन्याः प्रमुख-रचनाः सन्ति-जवाहरतरंगिणी, स्वातन्त्र्यवीरशतकम्. रामकृष्ण-परमहंसीयम्, वात्सल्य-रसायनं च । रचना-सुगान्धिसंस्कृतिमनुसन्धत्ते ।

विवेकानन्दविजयं दशाङ्कं महानाटकमस्ति । कन्याकुमारी-सन्निधौ विवेकानन्द मन्दिरदर्शनेन कवेः प्रतिभा नाटकमिदं समारोपयितिस्म ।

इन्दिरा-विजयम्

इन्दिरा-विजयस्य प्रणेता वेङ्कटरत्नः संस्कृतेन, तेलगु-भाषयाङ्गलभाषया चोपन्यास-काव्य-रूपकाणि विरचितवान् । एकाङ्कमिदं नाटकं नैकलघुदृश्यैर्विभक्तम् । तत्र नान्दी, प्रस्तावना, भरतवाक्यं च विलसन्ति । वृत्तमत्र पाकिस्तानदेशे मुजीब निग्रहानन्तरं प्रारम्यते बांगलदेशनिर्माणं यावत् समाप्यते च । वेङ्कटस्य घटना-चित्रण-चातुरी वैलक्षण्यं भजते । प्रत्यक्षदृष्टमिवेन्दिरायाभारतीयसेनायाश्च पराक्रमचारित्र्यं निरूपितम् । इन्दिराया औदार्य,' कर्मण्यता, मानवता-संरक्षणञ्च कविना सातिशयं चित्रितानि ।

बङ्गला देशविजयम्

बङ्गलादेशविजयस्य रचयिता महापण्डितः पद्मशास्त्री उत्तरप्रदेशस्य पिथौरागढ़ जनपदस्य सिंगालीग्रामे जातः राजस्थाने जयपुरे संस्कृतस्य वरिष्ठप्राध्यापकोऽस्ति । तस्यान्या रचनाः सन्ति लेनिनामृतमिति पञ्चदशसर्गात्मकं महाकव्यम्, स्वराज्यम्, पद्यपञ्चयन्त्रम्, लोकतन्त्रविजयं च ।

वंगला-देशविजयं तु व्यायोग इति कविः प्रथयति । अत्र भारतीयसाह्येन पूर्वपाकिस्ताने स्वातन्त्र्य-मवाप्यत इति निष्कर्षः ।

गान्धि विजयम् उन्मत्तकीचकम्

गान्धिविजयमिति नाटकस्य प्रणेता क. स० नागराजः पण्डितकुलोत्पन्नो वैज्ञानिकीं शिक्षां बीं०

एस-सी० पर्यन्तं प्राप्तवान् परतोमहीशूरनगरे विद्युद्विभागे कार्यरत आडिटकार्यालस्य पर्यवेक्षकपदाद् विश्रान्तः । कश्मीराणां संस्कृतसाहित्यकयोगदानविषये शोधनिबन्धेन पीएच, डी० उपाधिमर्जितवान् । यदा-बंगलौरनगरे स महाविद्यालयेषु प्राध्यापकोऽभवत् नागराजो भारतीयसंस्कृतेः परमोपासकः तामेव ससम्मानं स्वीकर्तुं लोकानुपदिशति । संस्कृतेन तस्य महाकाव्यं सीतास्वयंवरम्, खण्डकाव्यं शबरीविलासं, गद्यकाव्यं भारतीय-देशभक्तचरितं च सम्यग्विलसन्ति ।

पञ्चाङ्के गान्धिविजये स्वातन्त्र्यप्राप्तये महात्मनो गान्धिनः सत्याग्रहविधेः सिद्धान्ताः व्यावहारिक-स्वरूपं च वर्णितम् नाटकेऽस्मिन् नायकाः सन्ति-महात्मा गान्धी, मोतीलालः, सुभाषचन्द्रः, जवाहरलालः, विष्णु-शिवादयो देवाश्च राष्ट्रियाभ्युदयाय निर्माणात्मकभावनाः कविवरस्य नितान्तमुदात्ता राजन्ते ।

नचिकेश्तचरितम्

नचिकेतश्चरितस्व लेखिका बह्मचारिणी वेलादेवी एम० ए० तर्कवेदान्त-व्याकरणतीर्थोपाधि-भूषिता एकाङ्कमिदं नाटकमरचयत् । बालोचितेयं कृतिराद्ये ऋषिपुत्राणां क्रीडां निरूपयति । पितुर्यज्ञे यमाय दत्तः । यमस्तस्मै वेदान्तोपदेशं ददाति ।

प्राचीनर्वाचीना वा प्रातःस्मरणीया महामानवा राजानः, ऋषयः, कवयः, देवाः, आचार्याः, सन्तः राष्ट्रनायकाः, वीराङ्गनाश्च वह्वः सन्ति । तेषां चरितेन चरित्रेण च लोकोत्थानं समभवत्, भारतस्य प्रतिष्ठा च जगति समवर्धत । तान् स्वकृतिषु नायकरूपेण सश्रद्धं निरूपमन्तीमे कवयः । नामग्राहं तेषां स्मरणेन भाव-शुद्धिर्भवति । तद्यथा—

महामानाबाः— मनुः, शिविः, दधीचः, हरिश्चन्द्रः, रघुः, रामः, कृष्णः, बुद्धः, प्रह्लादः ।

ऋषयः— याज्ञवल्क्यः, भारद्वाजः, वसिष्ठः, व्यासः ।

कवयः— व्यासः, वाल्मीकिः, कालिदासः, तुलसीदासः रवीन्द्रः ।

देवाः— इन्द्रः, शिवः, विष्णुः, ब्रह्मा, गणेशः ।

राजानः— युधिष्ठिरः, अर्जुनः, भीमः, चन्द्रगुप्तः, अशोकः, चन्द्रगुप्तविक्रमादित्यः, हर्षः, भोजः, पृथ्वीराजः, राणाप्रतापः, छत्रपतिः, शिवराजः ।

वीराङ्गनाः— यशोधरा, दुर्गावती, लक्ष्मीबाई, सारदा, मीरा, निवेदिता, इन्दीरागान्धी ।

आचार्याः—शङ्करः, गोरखनाथः, रामानन्दः, रामानुजः, दयानन्दः ।

सन्तः— चैतन्यः, तुकाराम, ज्ञानेश्वरः, अरविन्दः ।

राष्ट्रनायकाः — लोकमान्यः तिलकः, सावरकरः, लाला लाजपतरायः, महात्मागान्धी, राजेन्द्रप्रसादः, सुभाषचन्द्रः, सरदारपटेलः, जवाहरलालनेहरूः, लालबहादुरशास्त्री ।

एतैर्महासत्त्वैर्भारते मानवतामुत्थापयितुं स्वीयेन त्यागेन, तपसा शौर्येण, अध्यात्मदर्शनेन, मनीषया च यत्कृतं

१—कालिदासः तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः इतिवचनेन सत्काव्यपद्धतिं निदर्शयति ।

तदेव तादृश वा: भारतं पुनरपि उन्नेष्यतीति कृतधियः कवयस्तेभ्यः स्मारंस्मारं श्रद्धाकुसुमरूपाणि नाटकानि संग्रथ्य समर्पितवनतः।

बिशंशताब्दीय-नाटककारेषु

प्रथमस्तु काशिराजः प्रभुनारायणसिंहोऽभवत् पुरापि हर्षादय बहवो राजानः संस्कृतकवय आसन्। किन्तु महाश्चयकरंत्विदमेव सत्य यत् प्राचीनकविपरम्परामनुसरन्तो बहव आधुनिकनाट्यकारा नाटकानि प्रणीय तानि स्वमित्रमण्डलं नटीकृत्याभिनयन्ति स्म। स्वकृतीनां प्रकाशनं तेषामर्थाभावेन विषमं कर्मासीत्। महालिगशास्त्रिणा नाटक एतादृशी स्वीय मनोव्यथा वर्णिता।

अभिनवपरम्पराया नाट्यकवयो विश्वविद्यालयेषु महाविद्यालयेषुच प्राध्यापकाः, शासनाधिकारिणः अधिवक्तारश्च सन्ति। विश्वविद्यालयीय-प्राध्यापकेषु बेङ्कटोराघवन् अग्रगण्यः। न केवल भारतेऽपितु विश्व-प्राङ्गणेंऽपि स स्वीयानुत्तमप्रतिभया भारतीयसाहित्यस्य संस्कृतेश्च माहात्म्यं प्रतिष्ठापयामास। न केवलं बहुविधानि नाटकानि, अपितु महाकाव्यं लघुकाव्यं च संस्कृतेन प्रणिनाय। नवतिवर्षीयः श्रीजीवन्याचयतीर्थों नित्यमेव संस्कृतनाटकप्रणयने व्यापृतः। यतीन्द्रविमलचतुर्धुरीणःत्रिंशन्नाटकानां रचियिता संस्कृतकालेजस्य प्रधानाचाय आसीत्। उस्मानिया विश्वविद्यालयस्य प्राचार्यद्वंयंरामलिङ्गशास्त्री, राचन्द्रड्डुच स्वनाटकैर्लब्ध-प्रतिष्ठमेव। वर्धमानविश्वविद्यालयस्य सिद्धेश्वरभट्टाचार्यः, नागपुर-विश्वविद्यालयस्य बर्णेकरः, हिन्दूविश्व-विद्यालयस्य रेवाप्रसाद द्विवेदी-सर्वे प्राचार्याः सन्त्यन्यतमाः प्रसिद्धनाटककाराः।

शिक्षा विभागबाह्या अपि विद्वांसो नाट्यकाराः सन्ति। एतेषां श्रेष्ठो वर्तते श्री रामवेलणकरः। स तु केन्द्रीयशासनाधिकारी पोस्टमास्टरजनेरलोऽभवत्। तेन कालिदासचरितादिकं षोडशनाटकानि प्रणीतानि। अनन्यतमोऽस्ति वीरेन्द्रकुमारो भट्टाचार्यो यः पूर्वं दर्शनाध्यापकः, परतः आई० ए० एस० अभवत्। तेन संस्कृतेन बहुनि नाटकानि काव्यानि च प्रणीतानि। विश्वनाथ-सत्यनारायणस्तेलुगुभाषाया महापण्डितः श्रीरामायणकल्पवृक्षनामकेन तेलुगुग्रन्थेन ज्ञानीपीठपुरस्कारं लब्धवान् स संस्कृतेन गुप्तपाशुपतम्, अमृतशर्मिष्टं च नाटकद्वय विरचितवान्।

अधिवक्तृषु महालिंगशास्त्री संस्कृतनाट्यरचनया सर्वानतिशेते। स मद्रासनगरस्योच्चन्यायालयेऽधि-वक्ताभवत् नैकविधानां संस्कृतकाव्यानां रचयिता स दशनाटकानि प्रणीतवान् उत्तरप्रदेशीयेऽधिवक्ता-श्रीकृष्णजोशीनैकनाटकानि रचितवान्।

विदुष्योऽपि संस्कृतनाटकरचनाविधो पारंगताः सन्ति। तासु सर्वोत्तमास्ति रमाचौधरी, पूर्वोक्त-यतीन्द्रविमलस्य पत्नी। सा प्राचार्यासीत् कलकत्तानगरस्थ—लेडी—ब्रावौर्न—महिलामहाविद्यालयस्य, परतः सा रवीन्द्रभारतीविश्वविद्यालयस्य कुलपतिपदं—मध्यतिष्ठत्। आंगलभाषया बङ्गभाषयापि च रचिता-स्तस्याः कृतयो महत्वपूर्णाः सन्ति। लीला रावेतिख्याता विदुषी सुप्रसिद्धक्षमादेव्या दुहिता भारतीयां योरपीयां च नाट्यशैलीमनुसृत्य बहूनि मनोहराणि नाटकानि विरचितवती। सागर-विश्वविद्यालयस्य प्रवाचिका भवालकरश्रीमतीवनमाला पाददण्डादिकं नाटकं नैकसगीतनाट्यानि च प्रणीतवती। देवकीमेननेति ख्याता विदुषी मद्रासनगरे क्वींनमेरी-महाविद्यालये संस्कृतविभागाध्यक्षासीत् तथा कुचेलादिकानि नैक-प्रेक्षणकानि रचितानि।

उदात्तं किंचिदुद्देश्यमभिलक्षितं कविभिः स्वीयनाटकानाम् त्यागस्तपः, देशभक्तिः, लोकसेवा, चरित्रनिर्माणं, लोकानां परस्परानुरागस्य संवर्धनं च प्रेक्षकेषु यथा सम्भवेत् तथा चरित्रचित्रणवृत्तनिरूपणं च कुर्यादित्यस्मिन् विषये ते सम्यगवहिता दृश्यन्ते । नाट्यात् शाश्वतोपलब्धिः भवति रसादीनाम् । व्युत्पत्तिर्महती जायते ततः । अस्यां दिशि कवीनां प्रयासाश्चरितार्था एव । प्राचीननाटकेभ्य एकोऽन्योविशेषः परिलक्ष्यतेऽभिनवनाटकेषु एतेषु नवीननाटकेषु शृङ्गाररसस्य प्रधानता क्वचिदेव दृश्यते । तेषु वीररसोऽङ्गी विद्यते । प्रहसनेषु भाणेषु च विशुद्धं हास्यं प्रायः प्रवर्तते । अश्लीलं वा शृङ्गारितं वा हास्यं विरलमेव ।

अपरं च महत्वपूर्णमुद्देश्यमासीत् संस्कृताय लोकरूचेर्जागरणम् । नाटकेषु सरलातिसरलभाषायाः प्रयोगेण प्रेक्षकाणां विशेषतो बालकानां संस्कृतज्ञानमभीष्टमासीन्नाटककाराणाम् ।

नाटकानि केवलं पठनाय नाभवन् । तेषां प्रस्तावनासु प्रायशोऽभिनयविवरणं विद्यते । भारतस्य विविधप्रदेशषु विदेशेष्वपि अभिनया आयोजिताः । प्रेक्षकास्तत्र राष्ट्रपतयो, राजानः, मन्त्रिणश्चासन् । यतीन्द्रस्य रमायाश्च नाटकानामभिनयेषु दिल्लीनगर्यां दर्शका आसन्—लोकसभा स्पीकरः—अननाशयन—आयंगरः, न्यायाधीशः पतञ्जलि-शास्त्री, राष्ट्रपतिः राधाकृष्णन्, मन्त्री केशकरश्च ।

विंशशताब्दिकानि नाटकानि प्राचीनभारतीयनाट्यशास्त्रीयलक्षणानि नानुसरन्ति । भरतोपदिष्टानां सन्धिसन्ध्यङ्ग-सन्ध्यन्तर-लास्याङ्ग-वीथ्यङ्गा-दीनां सन्निवेशः क्वचिदेव वर्तते । प्रवेशकविष्कम्भकादयो विलीनाः सन्ति । कार्यावस्था अर्थप्रकृतयश्च नानुसहिताः । अङ्केषु विभाजनं प्रायो दृश्यते किन्तु अङ्कस्थाने दृश्यान्येव बहुषु नाटकेषु वृत्तविभाजनं कुर्वन्ति । कतिपयनाटकेष्वङ्का दृश्यैर्विभक्ताः सन्ति । नान्दीभरतवाक्यं च क्वचिदृश्येत एव । संस्कृतनाटकेषु योरपीयप्रभावोऽनभिप्रेतोऽपि वर्धमानः प्रतिभाति ।

विंशशताब्दिकनाटकेषु नाट्यवैविध्यं परिलक्ष्यते । तेषां प्रधानभेदाः सन्ति—नाटकं, प्रकरणं, प्रहसनं भाणः, व्यायोगः, एकाङ्की च । छायानाट्यं सातिशयं लोकप्रियं दृश्यते । योरपीय नाट्यशैलीमनुसृत्य रेडियोनाटकानि, गीत-नृत्य-नाटकानि च भूयिष्ठ प्रणीतानि । प्राचीननाटकानि प्रायशः दीर्घकायानि बभुवुः । आधुनिकनाटकानि लघुकायानि सन्ति ।

आधुनिकनाटकेषु प्राकृतभाषाणां प्रयोगस्तु बिरल एव । तासां स्थाने प्रान्तीयभाषा हिन्दीभाषा वा प्रयुज्यन्ते ।